परितस्त्र धौतमुखरुक्म
विलसद्दिमांशुमण्डलाः ।
तेनुरतनुवपुषः पृथिवीं
स्फुटलक्ष्यतेजस इवात्मजाः श्रियः ॥ ७८ ॥
प्रधिमण्डलोद्धतपराग
घनवलयमध्यवर्त्तिनः ।
पेतुरशनय इवाशनकै
र्गुरुनिस्वनव्यथितजन्तवो रथाः ॥ ७९ ॥

परितइति । किं चेति चार्थः । धौतेषु शोधितेषु मुखरुक्मेषु मुखस्य रुक्माभरणेषु विलसत्प्रत्येकं प्रतिफलदहिमांशुमण्डल मर्कविम्बं येषां ते तथोक्ताः । अतएव स्फुटलक्ष्यमन्तर्गत्वा वहिः स्फुरितन्तेजोऽन्तःसारो येषां ते इव स्थितादत्युत्प्रेक्षा । तेजोव्याख्यातं पञ्चमे तेजोनिरोधेत्यत्र । अतनुवपुषोमहाकायाः श्रियः आत्मजाः अश्वाः । लक्ष्मीपुत्रोऽश्वश्चाक्षो चेति वैजयन्ती । परितः पृथिवीं तेनुः व्याप्नुवन्तः ॥ ७८ ॥

प्रधीति । चक्रधारा प्रधिर्नेमिरिति हलायुधः । प्रधिमण्डलै र्नेमिवलयैरुद्धताउत्थापिताः परागाः पांसवएव घनामेघास्तेषां वलयानि मण्डलानि तेषां मध्यवर्त्तिनः गुरुभिर्निस्वनैः स्वघोषैः व्यथिताभीषिताजन्तवः प्राणिनोयैस्ते रथाअशनयः वज्राइवा शनकैः पेतुस्तीव्रमधावन् । अत्र रथानामशनिलिनेत्प्रेक्षा परा गाणां घनत्वरूपणसापेक्षेति सङ्करः ॥ ७९ ॥

दधतः शशाङ्कितशशाङ्क
रुचि लसदुरश्छदं वपुः ।
चक्रुरथ सह पुरन्ध्रिजनै
रयथार्थसिद्धि सरकम्महीभृतः ॥ ८० ॥
दयिताय सासवमुदस्त
मपतदवसादिनः करात् ।
कांस्यमुपहितसरोजपत
द्भ्रमरौघभारगुरु राजयोषितः ॥ ८१ ॥

दधतइति । लसदुरश्छदः कवचो यस्मिन् कर्मणि तद्यथा तथा । उरश्छदः कङ्कटकोऽजगरः कवचोऽस्त्रियामित्यमरः । अतएव शशाङ्कितो मृगलाञ्छितो यः शशाङ्कः इन्दुस्तस्य रुचिरिव रुचिर्यस्येत्युपमा । तद्वपुर्दधतो दधानाः महीभृतो राजानः पुरन्ध्रिजनैरङ्गनाजनैः सह । अयथार्था असत्या सिद्धिर्मदकार्य्योत्पत्तिर्यस्मिन् तद्यथार्थसिद्धिरहितं अभिहतचित्तत्वादुन्मादक मित्यर्थः । सरकं मधुपानं चक्रुः । उत्साहवर्द्धनार्थमिति भावः । मणौ शीधौ शीधुपाने सरकं मधुभाजनमिति वैजयन्ती ॥ ८० ॥

अथ कर्मसमाप्तेः प्रायाणिकामन्त्रणाय प्रियाङ्कगतानां भटानामागामिशुभसूचिकास्तात्कालिकचेष्टाः वर्णयति । दयितायेत्यादि । दयिताय प्रेयसे उदस्तं पानार्थमुत्क्षिप्तं सासवं समद्यं अतएवोपहिते वासनार्थं निहिते सरोजे पतन् भ्रमरौघएव भारस्तेन गुरु दुर्भरं । गुरुस्तु वाक्पतौ श्रेष्ठे तुङ्गे पितरि दुर्भरइति

भृशमङ्गसादमरुणत्व
मविशददृशः कपोलयोः ।
वाक्यमसकलमपास्य मदं
विदधुस्तदीयगुणमात्मना शुचः ॥८२॥

शब्दार्णवे । कांस्यं पानभाजनं । कांस्योऽस्त्री पानभाजनमित्यमरः । वृहृवदिहनिकमिकषिभ्यः सइति कमेरुणादिकः सप्रत्ययः । तस्मै हितं कंसीयं लोहविशेषः । प्राक्क्रीताच्छइति छप्रत्ययः । तस्य विकारः कांस्यं पानपात्रं । कंसीयपरशव्ययोर्यञञौ लुक्चेति यञ्प्रत्यये छस्य लुक् । राजयोषितः कस्याश्चिद्राजवध्वाः मर्म्मच्छिदः अवसादिनः शैथिल्यभाजः करादपतत् तच्च दुर्निमित्त मिति भावः । एतेनास्याभाविविरहशोकादेवाप्रमत्तदृष्टेः काचि चिन्ता व्यज्यते । अत्रावसादभारगौरवयोर्विशेषणगत्या पात्रपात हेतुत्वात् काव्यलिङ्गम् ॥ ८१ ॥

भृशमिति । शुचोभाविविरहभावनाप्रसूताः शोकाः अवि शददृशः शोकादेवाप्रसन्नदृष्टेः कस्याश्चिदिति शेषः । मदमपास्य तदुत्पत्तिं प्रतिरुध्य तदीयं गुणं तद्धर्मं मदकार्य्यभूतमित्यर्थः । अङ्गसादमङ्गशैथिल्यं कपोलयोररुणत्वं असकलमसमाप्तं वाक्यं चात्मना स्वयं । प्रकृत्यादिभ्यउपसङ्ख्यानात् तृतीया । भृशं विदधुः करणेन शृङ्गारस्तिरस्कृतइत्यर्थः अत्र मदाभावेऽपि तत्कार्य्यो दयात्तस्यावलोकननिमित्तकत्वात्। उक्तनिमित्ताश्चोविभावना भेदः ॥ ८२ ॥

सुहृदः समीकगमनाय
युवभिरथ सम्बभाषिरे ।
शोकपिहितगलरुद्धगिर
स्तरसागताश्रुजलकेवलोत्तराः ॥ ८३॥
विपुलाचलस्थलघनेन
जिगमिषुभिरङ्गनाः प्रियैः ।
पीनकुचतटनिपीडदल
द्वरवारबाणमुरसा लिलिङ्गिरे ॥ ८४ ॥

सुहृद इति । अथास्मिन्नवसरे युवभिः समीकगमनाय युद्ध गमनाय । समीकं साम्परायिकमित्यमरः । सुहृदः शोकपिहिते शोकावृते गले कण्ठे रुद्धगिरः प्रतिबद्धोत्तरवाचस्तथापि तरसा वेगेनागतमश्रुजलमेव केवलं निर्णीतमुत्तरं यासां ताः । निर्णीतं केवलं चोक्तमिति विश्वः। सम्बभाषिरे संभाषिताः । योद्धुं गच्छाम इत्यामन्त्रिता हा कष्टमिदमेवान्तिमदर्शनमिति वाक्यभेदेऽप्यश्रुपाते नैवानन्तरं दत्तोत्तरा आसन्नित्यर्थः. अत्राप्यश्रुपातादुर्निमित्तमिति भावः एतेन गन्तव्यं चेत् गम्यतां वयश्च युष्मच्छोकभाजा इत्यनिष्टविध्याभासरूपाक्षेपालङ्कारोऽभिव्यज्यते। अनिष्टविध्याभासस्येति सूचेष्टनिषेधाभासवदस्यापि लक्षणात् ॥ ८३ ॥

विपुलेति । जिगमिषुभिर्युद्धाय गन्तुमिच्छुभिः । प्रियैः कर्तृभिः अङ्गनाः विपुलं यदचलस्य स्थलं तद्वद्घनेन दृढेन उरसा निजवक्षसा करणेन पीने कुचतटे निपीडनितरां पीडनं तेन दलन्तो विदीर्यमाणाश्चावराः श्रेष्ठावारबाणाः कञ्चुकायस्मिन् कर्मणि तथा

न मुमोच लोचनजलानि
दयितजयमङ्गलैषिणी ।
यातमवनिमवसन्नभुजा
न्न गलद्विवेद वलयं विलासिनी ॥ ८५ ॥
प्रविवत्सतः प्रियतमस्य
निगडमिव चक्षुरक्षिपत् ।
नीलनलिनदलदामरुचि
प्रतिपादयुग्ममचिरोढसुन्दरी ॥ ८६ ॥

तथा। कञ्चुको वारबाणोऽस्त्रीत्यमरः। आलिलिङ्गिरे आलिङ्गिताः। अत्र वारबाणानां दलनासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ८४ ॥

नेति। दयितस्य जयमङ्गलं तदर्थमङ्गलमित्यर्थः। अश्वघासादिवत्तदर्थे षष्ठीसमासः। तदिच्छतीति तदेषिणी विलासिनी काचिदङ्गना लोचनजलान्यश्रूणि न मुमोच अश्रुपातस्यामङ्गलत्वादिति भावः। अमङ्गलं तदन्यतः प्रवृत्तमेवेत्याह यातमिति। अवसन्नभुजाश्लेषकशिथिलात्करात् गलद्भ्रश्यदेवावनिभुवं यातं प्राप्तं वलयं कङ्कणं न विवेद। अवश्यम्भाविनां कोऽपि निवारक इति भावः। एषा च दैवचिन्तिकेति। अत्रावसादस्य विशेषणगत्या वलयपातहेतुत्वात्काव्यलिङ्गम् ॥ ८५ ॥

प्रेति। अचिरोढसुन्दरी काचिन्नवोढा स्त्री प्रविवत्सतः प्रवासं कर्तुमिच्छतः। वसेः सन्नन्ताल्लटः शत्रादेशः। प्रियतमस्य प्रतिपादयुग्मं पादयुग्मे। विभक्त्यर्थेऽव्ययीभावः। नीलनलिनदलदामरुचि नीलोत्पलमालासच्छायमित्युपमा। निगडमिव

व्रजतः क्व तात वजसीति
परिचयगतार्थमस्फुटम् ।
धैर्य्यमभिनदुदितं शिशुना
जननीनिभर्त्सनविवृद्धमन्युना ॥ ८७ ॥

शृङ्खलमिव चक्षुर्न्दम्पतिमक्षिपत् प्रेरयदित्यर्थः । चक्षुषोदूरे पदमपि गन्तुन्न शशाकेत्यर्थः तच दुर्निमित्तमिति भावः प्रयाणे स्त्र्यवलोकनिषेधात् । उक्तोपमासापेक्षा चक्षुषोनिगडत्वोत्प्रेक्षेति सङ्करः ॥ ८६ ॥

व्रजतइति । जनन्याः अपशकुनभीतायाः मातुर्निभर्त्सनादि वृद्धमन्युना प्रवृद्धकोपेन शिशुना वालकेन हे तात जनक। तातस्तु जनकः पितेत्यमरः । क्व वजसि कुत्र व्रजसि इत्यस्फुटं उदितमुक्तं । वदेः कर्म्मणि क्तः वचिस्वपीत्यादिना सम्प्रसारणम् । व्रजसीति सरेफपदमपाटवाद्रेफमुच्चारितमित्यर्थः । तथापि परिचया दभ्यासपाटवाद्गतार्थं । पितृभ्यां केवलावगताभिधेयं वचनमिति शेषः । व्रजतः प्रस्थातुः धैर्य्यं प्रयाणोत्साहमभिनत् गमनकारिणोदु र्निमित्तत्वादिति भावः । उक्तं च योगयात्रायाम् । यानात्पुरा निपतनं ब्रुवतीव कश्चित् गर्भेण भारब्रुवती स्वपुरः स्थिता स्त्री । मागच्छ तिष्ठ कुतइत्यलमर्थवाचिशब्दाश्च राजगमने प्रतिषेधकाः स्युरिति । अत्र दम्पत्योर्दैन्यविषादचिन्ताशङ्कादयः सञ्चारिणो ऽनुसन्धेयाः ॥ ८७ ॥

शठेति । अपरा स्त्री रणरागिणं युद्धोत्साहिनं रमणं हे शठ वञ्चक नाकलोकललनाभिरप्सरोभिस्सहेत्यर्थः । वहयुक्ते

शठ नाकलोकललनाभि-
रविरतरतं रिरंससे ।
तेन वहसि मुदमित्यवद-
द्व्रणरागिणं रमणमीर्ष्ययाऽपरा ॥ ८८ ॥

म्रियमाणमप्यगलदश्रु
चलति दयिते नतभ्रुवः ।
स्नेहमकृतकरसन्दधता-
मिदमेव युक्तमतिमुग्धचेतसाम् ॥ ८९ ॥

ऽप्रधान इति सहार्थे तृतीया । वृद्धो यूनेति वत् । अविरतरत-मविच्छिन्नसुरतं यथा भवति तथा रिरंससे रन्तुमिच्छसि । रमेः सन्नन्ताल्लट् पूर्ववत्सन इत्यात्मनेपदं । तेनाप्सरोरिरंसाकरणेन मुदं वहसीति ईर्ष्यया सापत्न्याक्षमया अवदत् अर्थाद्विरहासहनया प्रस्थानप्रतिषेधपरया व्याहृतमिदमेवास्य मरणमिति भावः ईर्ष्यात्र कण्ठोक्तएव संचारी ॥ ८८ ॥

म्रियमाणमिति । दयिते चलति प्रतिष्ठमाने सति नतभ्रुवः वध्वाः अश्रु म्रियमाणममङ्गलभिया धार्य्यमाणमपि । धरतेः कर्म्मणि लटः शानजादेशः । अगलदस्रवत् शोकातिरेकाद्धारयितुमशक्य-माणीदित्यर्थः । तथाहि अकृतकरसमकृत्रिमरागं स्नेहं प्रेम दधता-मतएव अतिमुग्धचेतसां अत्यन्ताकपटबुद्धीनां इदमेवासंवरणं युक्तम् । अन्यथा स्नेहव्याघातेन तत्कालविरुद्धमश्रुमोचनं नानुचित-मिति भावः । रसस्नेहयोरागप्रेमापरनाम्नोरवस्थाभेदात् भेदः

सह कज्जलेन विरराज
नयनकमलाम्बुसन्ततिः ।
गण्डफलकमभितः सुतनोः
पदवीव शोकमयकृष्णवर्त्मनः ॥ ९० ॥
क्षणमात्ररोधि चलितेन
कतिपयपदन्नतभ्रुवः ।
स्रस्तभुजयुगगलद्वलय
स्वनितम्प्रति क्षुतमिवोपशुश्रुवे ॥ ९१ ॥

रागस्तत्सम्बन्धी प्रेम तद्वियोगासहिष्णुतेति रससागरे । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ८९ ॥

सहेति । सुतनोः शुभाङ्ग्याः गण्डफलकमभितो गण्डस्थलयोरित्यर्थः । अभितः परितइत्यादिना द्वितीया । नयनकमलाम्बुसन्ततिरश्रुधारा कज्जलेनाञ्जनेन सह शोकएव शोकमयस्तस्य कृष्णवर्त्मनः शोकाग्नेःपदवी निःसरणमार्गइव विरराज शुशुभे येन वर्त्मना अग्निर्गच्छति तत् कृष्णं भवतीति कृष्णवर्त्मा । अत्राप्यश्रुपातएव दुर्निमित्तमिति भावः ॥ ९० ॥

क्षणेति । कतिपयं च तत्पदं च तत् । जातावेकवचनम् । कतिचित्पदानीत्यर्थः । पदशब्दस्य तदवच्छिन्नदेशवाचित्वादत्यन्तसंयोगे द्वितीया । चलितेन प्रस्थितेन केनचिदिति शेषः क्षणमात्ररोधि क्षणमात्रप्रतिबन्धकम् । प्राणदानुकजीविनामवसरे सत्यधिकं स्थातुमनौचित्यादिति भावः । नतभ्रुवः स्रस्तानामङ्गसादेन झटिति प्रकोष्ठाये पतितानां भुजयुगगलद्वलयानां स्खलद्व

अभिवर्त्म वल्लभतमस्य
विगलदमलायतांशुका।
भूमिनभसि रभसेन यती
विरराज काचन समम्महोल्कया ॥ ८२ ॥
समरोन्मुखे नृपगणेऽपि
तदनुमरणोद्यतैकधीः।
दीनपरिजनहृतास्रुजला
न भटीजनः स्थिरमना विचक्रमे ॥ ८३ ॥

चलत्कङ्कणानां ध्वनितं रणत्कारं प्रति प्रतिमुखं श्रुतमिव उपशुश्रुवे उपश्रुतं। स्त्री क्षुतं क्षवः पुंसीत्यमरः। रणत्कारे क्षुतभ्रान्त्या निवृत्तं क्षणमात्रं स्थितमित्यर्थः। अक्षुते क्षुतभ्रान्त्या भ्रान्तिमदलङ्कारः दैन्यविषादाख्याः सञ्चारिणः ॥ ८१ ॥

अभीति। वल्लभतमस्य प्रियतमस्याभिवर्त्माभिमार्गं विगलदङ्कपादात् संस्रमानममलमायतं चांशुकं वस्त्रं यस्याः अन्यत्र विगलन्तो विशीर्य्यमाणा अमला उज्ज्वलाः आयता दीर्घाश्च ता अंशवो रश्मयो यस्याः सा। शैषिकः कप्रत्ययः। भूमिर्नभ इव तस्मिन् भूमिनभसि रभसेन वेगेन यती यान्ती। इणः शतर्य्युगितश्चेति ङीप्। काचनाङ्गना महोल्कया समं सदृशं विरराज। अत्र प्रस्तातुरग्रे स्वकान्तायामदोल्कासादृश्यभवनमेव दुर्निमित्तमिति भावः। उपमालङ्कारः ॥ ८२ ॥

समरेति। नृपगणे समरोन्मुखेऽपि तस्य नृपगणस्यानुमरणे तदनुमरणे उद्यतोद्युक्ता अतएवैका मुख्या धीर्यस्य सः। दीनैरार्त्त

विदुषीव दर्शनममुष्य
युवतिरतिदुर्लभम्पुनः ।
यान्तमनिमिषमविह्वलमनाः
पतिमीक्षते स्म भृशमादृशः पथः ॥ ९४ ॥

शोकेन परिजनेन हृताश्रुजलो मुक्तबाष्पोदासीमुक्ताश्रुबिन्दुरित्यर्थः । तथापि स्वयं स्थिरमनाश्चलितचित्तोभटीजनोभटस्त्रीलोकः । जाताविकवचनं पुंयोगादाख्यायामिति ङीपोऽलुक् । न विचक्रमे न तत्रास सहमृत्युप्रयाणां कुतः संत्रासइति भावः । अत्र मरणोद्योगस्य विशेषणगत्या अक्षैर्यहेतुत्वात्काव्यलिङ्गभेदः ॥ ९३ ॥

विदुषीति । युवतिः काचिदङ्गना अमुष्य पत्युर्दर्शनं पुनः पश्चादतिदुर्लभम् तस्यापुनरावृत्तेरिति भावः । विदुषी जानती वेत्युत्प्रेक्षा । विदेः शतुर्वसुरिति वस्वादेशः उगितश्चेति ङीप् । अविह्वलमना अविह्वलचित्ता सती यान्तं योद्धुं गच्छन्तं पतिं भर्तारं आदृशःपथः आदृष्टिपथात् दृष्टिपथातिक्रमपर्य्यन्तमित्यर्थः । आङ्मर्य्यादाभिविध्योरिति विकल्पादाङोन समासः । अत्रमनिमिषं निमेषरहितं यथा तथा ईक्षते स्म ॥ ९४ ॥

सम्प्रतीति । सम्प्रतीदानीमेव कुशली अक्षतः सन् युधा युद्धात्पुनः उपेयाः प्रत्यावर्त्तस्वेति सविहं भर्त्तुरीरिता भर्त्रे प्रयुक्ता आशीराशीर्वादः सद्यः प्रसह्य बलात् गलदश्रुवा स्रवदश्रुणा तस्या भटस्त्रियास्तस्य वध्वा एव । अस्तीति प्रतिषेधान्वदीत्वादव्यागमः । ने वधोर्हिनयेन प्रत्याचचक्षे प्रत्याख्याता निराकुरुतेत्यर्थः अमङ्गलेनाश्रु

सम्भ्रम्यपेयाः कुशली पुनर्युधः
सस्नेहमाशीरिति भर्त्तुरीरिता ।
सद्यः प्रसह्य द्वितयेन नेत्रयोः
प्रत्याचचक्षे गलता भटस्त्रियाः ॥ ९५ ॥

काचित्कीर्णा रजोभिर्दिवमनुविदधे भिन्नवक्रेन्दुलक्ष्मी
रश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः ।
भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत्कम्पमापुः
प्रस्थाने पार्थिवानामशिवमिति पुरोभावि नार्य्यः शशंसुः
॥ ९६ ॥

पातेन निष्फलीकृतेत्यवश्यं भवितव्यं भवत्येवेति भावः । वा लिटीति विकल्पान्न चक्षिङः ख्याञादेशः । अश्रुपातस्य नेत्रविशेषण द्वारा आशीः प्रत्याख्याने हेतुत्वात्काव्यलिङ्गभेदः ॥ ९५ ॥

काचिदिति । काचित् स्त्री रजोभिरार्त्तवैरङ्गसंस्कारत्यागा त्पांशुभिश्च कीर्णा । स्याद्रजः पुष्पमार्त्तवमिति । पांशुर्ना न द्वयो रजइति चामरः । दिवस्त्वौत्पातिकपांशुवर्षणाद्रजःकीर्णता । वक्रमिन्दुरिव अन्यत्र वक्रमिवेन्दुर्भिन्नास्तस्य लक्ष्मीर्यस्याः सा भिन्नवक्रेन्दुलक्ष्मीः । बहुव्रचनान्तो बहुव्रीहिः । एवमपि एकवचनान्तस्यैव लक्ष्मीशब्दस्योरःप्रभृतिषु पाठान्न तन्निमित्तः कप्रत्ययः शैषिकस्तु वैभाषिकः इत्यविरोधः । काचिन्नारी दिवमनु विदधे अनुचकार । काश्चिन्नार्य्यः दिश इवाश्रीकावीतशोभाः । उद्भ्रान्तसत्त्वा उद्भ्रान्तचित्ता उद्भ्रान्तजन्तुकाश्च सत्यः । अन्तरात्मनि मध्ये च दाहं सन्तापं । अन्यत्रौत्पातिकं प्रज्वलनं दधिरे दधुः

इति श्रीमाघकृते शिशुपालवधे
महाकाव्ये पञ्चदशः सर्गः ॥ १५ ॥

अन्यानार्य्यांगत्याइव वातसमूहाइव। पाशादिभ्योयदिति यत्प्रत्ययः। प्रतिदिशं दिशिदिशि। अव्ययीभावे शरत्प्रभृतिभ्यः टच् इति समासान्तः टच् प्रत्ययः। भ्रेमुर्बभ्रमुः। वा जृभ्रमुत्रसामिति विकल्पा देत्वाभ्यासलोपौ। अपरानार्य्योभूम्या तुल्यं भूमिवत् कम्पमापुः इतीत्थं पार्थिवानां प्रस्थाने प्रयाणे नार्य्योभाव्यशुभं पुरः पूर्व्वं शशंसुः सूचयामासुरित्यर्थः। अत्र नारीणां भाव्यशुभसूचनस्य रजोदाहादिवाक्यार्थहेतुकं काव्यलिङ्गं तत्र नारीणां वृदिगा द्युपमाभिस्तद्रजोदाहादिवन्नारीरजोदाहादीनां अशुभसूचकत्व मित्युपमाकाव्यलिङ्गयोरङ्गाङ्गिभावेन सङ्करः। सञ्चारिणस्य पूर्व्वत्रदिशादादयः सुगमाः। अत्र काश्चित्कीर्णारजोभिर्दिवमनु विदधुर्भिन्नवक्त्रेन्दुलक्ष्म्योनिश्रीकाः काश्चिदिति पाठे काचित्कीर्णे त्येकवचनप्रक्रमभङ्गे दोषोनास्ति न चैवमुपमानोपमेययोर्भिन्नवचनत्व दोषः लोकेषु चन्द्रादिष्वेकत्व नियतेषु दोषबुद्ध्यनुदयात्। यथाह दण्डी। न लिङ्गवचने भिन्ने न हीनाधिकतापि वा। उपमा दूषणायालं यत्रोद्वेगोनधीमतामिति। स्रग्धरावृत्तम्। म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयमिति लक्षणात् ॥८६॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ काव्यव्याख्याने सर्व्वङ्कषाख्ये पञ्चदशः सर्गः ॥ १५ ॥

दमघोषसुतेन कश्चन
प्रतिशिष्टः प्रतिभानवानथ ।
उपगम्य हरिं सदस्यदः
स्फुटभिन्नार्थमुदाहरद्वचः ॥ १ ॥

अथानन्तरसर्गे हरेश्चैद्यदूतसंवादं वर्णयति। दमघोषेत्यादि। अथ सन्नाहानन्तरं दमघोषसुतेन शिशुपालेन प्रतिशिष्टः प्रहितः प्रतिभानमस्यास्तीति प्रतिभानवान् अवसरोचितोत्तरस्फुरणशक्तिमानित्यर्थः । कश्चन कश्चिद्दूतः हरिं कृष्णमुपगम्य प्राप्य सदसि सभायां स्फुटौ भिन्नावर्थौ पृथगर्थौ प्रियाप्रियरूपौ यस्मिंस्तत् स्फुटभिन्नार्थं युगपदुभयार्थाभिधायकमित्यर्थः तथैव वक्ष्यति उभयं युगपन्मयोदितमित्यादिना सान्त्वमथेतरच्च ते इति। अदः इदं वक्ष्यमाणं वचः उदाहरत् व्याहरत् । अस्मिन्सर्गे वैतालीयाख्यं मात्रावृत्तम्। षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः । न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुरिति लक्षणात् ॥ १ ॥

स्फुटभिन्नार्थमुदाहरद्वच इत्युक्तं तदेव चतुर्दशभिः श्लोकैरभिधत्ते । अभिधायेत्यादि । शिशुपालस्तदा अर्थस्वीकारकाले तत्तादृशमप्रियमभिधाय परमनुशयं अनुतापङ्गतः अभिमनाः उत्कण्ठितचित्तस्सन् उपेत्यागत्य सख्यः समन्योर्भवतस्तव माननां पूजां कर्त्तुं समीहते अनुनेतुमिच्छतीत्यर्थः अयं मधुरोऽर्थः । परुषस्तु । तदा तदप्रियमभिधाय परं अनुशयं केवलं न प्राप्तः किन्तु हन्तव्य इति दीर्घद्वेषङ्गतः प्राप्तः ।

अभिधाय तदा तदप्रियं
शिशुपालोऽनुशयम्परङ्गतः ।
भवतोऽभिमनाः समीहते
सरुषः कर्त्तुमुपेत्य माननाम् ॥ २ ॥

रुजे शब्देऽथानुशयो दीर्घद्वेषानुतापयोरित्युभयत्राप्यमरः। अतएव नास्तिभीर्यस्येत्यभि निर्भीकं मनो यस्य सोऽभिमनाः निःशङ्क चित्तः सन् उपेत्य स्वयमागत्य सरुषः सकोपस्य भवतो माननां हननं कर्त्तुं समीहते । मानना हनने माने इत्युभयत्रापि केशवः । भवन्तं हन्तुमिच्छतीत्यर्थः । मन स्तम्भेइति धातोश्चौरादिकात् ण्यट् णिचोलुक्। अत्र चतुर्दशश्लोक्यां परहृदयपरीक्षापराणां दूतानामप्रियाप्रिये द्वे अपि वक्तव्ये चमत्काराय तु श्लेषभङ्ग्याभिधीयेते इति प्रियाप्रिययोर्द्वयोरपि प्रकृतत्वादभिधेयत्वाच्छब्द मात्रसाधर्म्याच्च केवलप्रकृतगोचरः श्लेषः । प्रकृताप्रकृतोभयगतम्‌कस्ये च्छब्दमात्रसाधर्म्यं श्लेषोयमिति लक्षणात् । न चोभयगतः भिन्ना स्त्वोरन्यतरगम्यतया तदुत्थापनात् इह उभयं युगपन्मयोदितत्वरया साम्वमथेतरच्च ते इति वक्ष्यमाणलिङ्गादुभयोर्वाच्यत्वात्र गमादित्यलं प्रपञ्चेन ॥ २ ॥

विपुलेनेति । उन्मनाः उत्सुकचेताः स चैद्यः परितः प्रचुरं प्रभूतं यथा तथा अधिगता प्राप्ता अङ्गनिर्वृतिः सुखत्स्पर्श कृतमङ्गसुखं येन तं त्वां विपुलेन विशिष्टपुलकेन। पुलः स्यात्पुलके ऽपि पुलस्त्य विपुलेऽन्यवदिति विश्वः । विग्रहेण वपुषा निर्दयं

विपुलेन निपीड्य निर्दयं
मुदमायातु नितान्तमुन्मनाः ।
प्रचुराधिगताङ्गनिर्वृतिं
मस्तिस्त्वाङ्कलु विग्रहेण सः ॥ ३ ॥
प्रणतः शिरसा करिष्यते
सकलैरेत्य समं धराधिपैः ।
तव शासनमाशु भूपतिः
परवानद्य यतस्त्वयैव सः ॥ ४ ॥

गाढं निपीड्यालिङ्ग्य नितान्तं मुदमायातु खलु । पक्षस्तु । उन्मना मनस्वी स चैद्यः प्रचुरेणाधिना मनोव्यथया गताङ्गनिर्वृतिं विगतशरीरसौख्यं त्वां विपुलेन महता विग्रहेण समरेण । विग्रहः समरे काये इति विश्वः । निर्दयं निष्कृपं निपीड्य हत्वा मुदमायातु ॥ २ ॥

प्रणतइति । भूपतिः चैद्यः सकलैर्धराधिपैस्त्वामं सह एत्या गत्य शिरसा प्रणतः प्रणामं कृतवान् । कर्त्तरि क्तः । आशु तव शासनमाज्ञां करिष्यते त्वदाज्ञाकरोभविष्यति । कुतः यतः स चैद्यो ऽस्मिन् अवसरे त्वयैव परवान् त्वदेकपरतन्त्र. । पक्षस्तु । शिरसा प्रणतोनमस्कृतोनराधिपैरिति भावः । कर्म्मणि क्तः । भूपतिस्तव शासनं शास्तिं शिक्षां करिष्यते यतस्त्वयैव परवान् शत्रुमान् त्वमेक एवास्य शत्रुरवशिष्टइति भावः । अन्यत्समम् । शासनं राजदत्तोर्व्यां लेखाज्ञाशास्त्रशास्तिष्विति विश्वः ॥ ४ ॥

अधिवह्निपतङ्गतेजसो
नियतस्वान्तसमर्थकर्म्मणः
तव सर्व्वविधेयवर्त्तिनः
प्रणतिम्बिभ्रति केन भूभृतः ॥ ५ ॥
जनताम्भयशून्यधीः परै
रभिभूतामवलम्बसे यतः ।
तव कृष्ण गुणास्ततोनरै
रसमानस्य दधत्यगण्यताम् ॥ ६ ॥

प्रणामे हेतुमाह । अधीति । अधिगतं वह्निपतङ्गयोरग्नि भान्वोरिव तेजो येन तस्य तत्तुल्यतेजस इत्यर्थः नियतस्वान्तोनियत चित्तः स चासौ समर्थकर्म्मा च । खञ्जकुब्जवद्विशेषणसमासः । तस्य यथाक्रमस्य सर्व्वे त्रिधेयवर्त्तिनोवशवर्त्तिनः कर्म्मकरा यस्य तस्य तव के भूभृतः प्रणतिं नतिं न बिभ्रति सर्व्वेऽपि बिभ्रती त्यर्थः । परुषस्तु । प्रणामे हेतुमाह । अधिवह्नि अग्नौ पतङ्गस्य शलभस्येव तेजः पौरुषं यस्य तस्य । पतङ्गः शलभे भानाविति विश्वः । नियते अव्यभिचारे स्वान्ते स्वविनाशे समर्थं हेतुभूतं कर्म्म यस्य तस्य सर्व्वेषां विधेये वर्त्तते विधेयं वर्त्तयति वा सर्व्वविधेय वर्त्तिनः सर्व्वकिङ्करस्य निष्पौरुषस्य तव केन गुणेन भूभृतः प्रणतिम्बिभ्रति न केनापीत्यर्थः ॥ ५ ॥

जनतामिति । हे कृष्ण हे हरे भयशून्यधीर्निर्भीकचित्तः सन् परैः शत्रुभिरभिभूतां जनतां जनसमूहं । ग्रामजनेत्यादिना समूहे तल् प्रत्ययः । यतोऽवलम्बसे परिरक्षसि रक्षसीत्यर्थः ।

अहितादनपत्रपस्त्रस
न्नतिमात्रोज्झितभीरनास्तिकः।
विनयोपहितस्त्वया कुतः
सदृशोऽन्योगुणवानविस्मयः ॥ ७ ॥

ततोहितोमरैरसमानस्य सर्व्वोत्कृष्टस्य तव गुणाः आर्त्तभूभरणादयः अगण्यतामसङ्ख्येयतां दधति। परत्र तु। हे मलिनात्मक भयशून्य धीर्मूढबुद्धिः परैस्त्वदन्यैः। परं दूरान्यमुख्येषु परोऽरिपरमात्मनो रित्युभयत्रापि वैजयन्ती। अभिभूतां अवधीरितां अवतामपशु पालनपारतन्त्र्यादिना पृथग्जनत्वं। भावेऽर्थे तल्प्रत्ययः। यतो ऽवलम्बसे आश्रयसि। ततोमरैरसमानस्य ततोऽपि हीनस्येत्यर्थः। तव गुणाः लेशतः स्वभावतोऽपीति भावः अगण्यतामनादरणीयता न्दधति ॥ ६ ॥

अहितादिति। त्वया सदृशोऽन्योगुणवान् गुणाढ्यः कुतः न कुत्रापीत्यर्थः। कुतस्त्वं अहितादनर्थात्त्रसन् अधर्म्मभीरुरित्यर्थः। अपत्रपोनिस्त्रपोन भवतीति अनपत्रपस्त्रपावान् अकार्य्यजुगुप्सु रित्यर्थः। अतिमात्रमत्यन्तमुज्झितभीस्त्यक्तारिभयइत्यर्थः। न अस्ति मतिरस्येति नास्तिकः नास्तिपरलोकः। अस्तिनास्तिमतिरिति ठक्। स न भवतीत्यनास्तिकः आस्तिकइत्यर्थः। विनयेनानौद्धत्ये नोपहितोविशिष्टः विनयवानित्यर्थः। विस्मयोविशिष्टगर्व्वोनभवतीति अविस्मयोऽगर्वः। परत्र तु। त्वया सदृशोऽन्योगुणवान्न भवतीत्य गुणवान् निर्गुणः कुतः कुत्र न कुत्रापीत्यर्थः। कुतः त्वमहिता च्छत्रोस्त्रसन् भीरुः। नास्ति अपत्रपा लज्जाविशेषोयस्येत्यनपत्रपः

कृतगोपवधूरतेर्घ्नतो
वृषमुग्रे नरकेऽपि सम्प्रति ।
प्रतिपत्तिरधः कृतैनसो
जनताभिस्तव साधु वर्ण्यते ॥ ८ ॥

निर्लज्जः । लज्जा सापत्रपान्यतइत्यमरः । नतिमात्रेण प्रणमेनै
वोज्झितभीरपाकृतारिभयः न तु पराक्रमेणेति भावः । अस्ति
मतिरस्येत्यास्तिकोऽस्तिपरलोकः । पूर्व्ववत् ठक् । स न भवतीत्य
नास्तिकः नास्तिकइत्यर्थः विनयोनयातीतः अपहितोहितादपेतः
विस्मयोविगर्व्वोन भवतीति अविस्मयोगर्वी गर्व्वयुक्तइत्यर्थः ।
अत्राहितादित्यर्थश्लेषः अन्यत्र शब्दश्लेषइत्यनयोः सङ्करः ॥ ७ ॥

कृतेति । गोप्यएव बध्वोगोपबध्वः । स्त्रियाः पुंवदित्यादिना
पुंवद्भावः । तासु रतिः कृता येन तस्य गोपीजनवल्लभस्येत्यर्थः ।
वृषं वृषभरूपिणं अरिष्टाख्यं असुरं घ्नतोमारयतः । हन्तेर्लटः
शत्रादेशः । अधःकृतैनसोनिरस्तकल्मषस्य तवोग्रे भयङ्करे नरके
नरकासुरे प्रतिपत्तिः प्रवृत्तिः पुरुषकारइति यावत् सम्प्रति
जनताभिर्जनसमूहैः साधु वर्ण्यते । अहोमहद्दुष्करं कृतमित्युप
श्लोक्यते । परुषस्तु । गोपानां बधूषु रतिः कृता येन तस्य पार
दारिकस्य वृषं धर्म्मं वृषभं वा घ्नतः । सुकृते वृषभे वृषइति
विश्वः । अतएव कृतैनसः पापकृतः तेन उग्रे दारुणे नरके
निरये अधःप्रतिपत्तिरधःप्राप्तिः । प्रतिपत्तिः पदप्राप्तौ
पौरुषे गौरवेऽपि चेति विश्वः । जनताभिः साधु वर्ण्यते दुस्तरोऽस्य

विहितापचितिर्महीभृता
द्विषतामाहितसाध्वसो बलैः ।
भव सानुचरस्त्वमुच्चकै
र्महतामप्युपरि क्षमाभृताम् ॥ ९ ॥
घनजालनिभैर्दुरासदाः
परितो नागकदम्बकैस्तव ।
नगरेषु भवन्तु वीथयः
परिकीर्णा वनजैर्मृगादिभिः ॥ १० ॥

पापिष्ठस्य नरकपात इत्युद्बोध्यते इत्यर्थः । अत्र गोपपरदारिको ऽप्यधःकृतैनादिति विरोधाभासः श्लेषेण सङ्कीर्यते ॥ ८ ॥

विहितेति । सहानुचरः सानुचरस्त्वमत्योमहीभृता चैद्येन विहितापचितिः कृतपूजः । लोकवेदयोः सानुचरस्यैव राज्ञः पूज्यत्वप्रसिद्धेरिति भावः । अतएव बलैः सैन्यैर्द्विषतां शत्रूणा माहितसाध्वसो जनितभयः सन् महतामपि क्षमाभृतां राज्ञा मुपरि उच्चकैरुन्नतस्त्वं भव सर्वोत्कर्षेण वर्त्तस्व । पक्षस्तु । महीभृता चैद्येन विहितापचितिः कृतहानिः । भवेदपचितिः पूजाव्ययहानिषु निष्कृताविति विश्वः । अतएव द्विषतां बलैराहित साध्वसोभीषितः सन्महतां क्षमाभृतां भूधराणामुपरि सानुषु चरतीति सानुचरः स भव । चरेष्टः । अत्रापि शब्दार्थश्लेषसङ्करः ॥ ९ ॥

घनेति । तव नगरेषु वीथयो रथ्याः घनजालनिभैर्घनमूककल्पैः वनजैर्वनभवैर्मृगादिभिः मृगप्रभृतिभिर्दोमण्डामृग

सकलापिहितस्वपौरुषो
नियतव्यापदवर्द्धितोदयः ।
रिपुरुन्नतधीरचेतसः
सततव्याधिरनीतिरस्तु ते ॥ ११ ॥

श्चेत्येवं त्रिविधैरपीत्यर्थः । नागकदम्बकैर्गजवृन्दैः परितः परिकीर्णाः व्याप्ताः अतएव दुरासदाः दुष्प्रवेशाभवन्तु । राज्ञां सन्धाने महैश्वर्य्यं च ते भविष्यतीत्यर्थः । परुषस्तु । घनजालनिभैः सान्द्रानायतुल्यैः । आनायः पुंसि जालं स्यादित्यमरः । नागकदम्बकैः सर्प्पसङ्घैर्वनजैर्मृगादिभिर्मृगव्याघ्रपुलिन्द्रप्रभृतिभिः । अथवा मृगादिदिभिः मृगभचकशार्दूलादिभिः दुरासदाभवन्त राजविग्रहादरण्यप्रायं गताभवन्त्वित्यर्थः ॥ १० ॥

सकलेति । उन्नतमुदारं धीरमविकारं चेतोयस्य तस्य ते तव रिपुः सकलैरपिहितं तिरस्कृतं स्वपौरुषं यस्य सः । नियतानित्या व्यापदोविशिष्टापदोयस्य सः । अवर्द्धितोदयः असम्पूरिताभ्युदयः सततव्याधिः सततरोगः । अनीतिर्नीतिरहितः एवं विधोऽस्तु । परुषस्तु । अथैतस्मः असमनस्विनः ते रिपुस्त्वेवः सकलैरपिहितस्वपौरुषः अतिरस्कृतात्मविक्रमः । वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरित्यल्लोपे नञ्समासः । नियतं नित्यं व्यापत् विगतापत् अवर्द्धितोदयः अच्छिन्नोदयः । वृधु च्छेदने वृद्धाविति धातोः कर्म्मणि क्तः । उन्नतधोरुदारबुद्धिः सततया धिर्विगताधिर्मनोव्यथारहितः । अनीतिरीतिबाधरहितोऽस्तु । अतिवृष्टिरनावृष्टिः शलभामूषिकाः खगाः । प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः । अत्र कर्म्मच

विकचोत्पलचारुलोचन
स्तव चैद्येन घटामुपेयुषः।
यदुपुङ्गव बन्धुसौहृदा
त्त्वयि पाता ससुरोनवासवः ॥ १२ ॥

सदभङ्गेनार्थद्वयप्रतिपादनाज्जतुकाष्ठवदेकशब्दप्रतीतेः शब्दश्लेषः ॥ ११ ॥

विकचेति । पुमान् गौरिव पुङ्गवः पुरुषर्षभः । उपमित समासः । गोरतद्धितलुकीति समासान्तष्टच्प्रत्ययः । यदूनां पुङ्गव यदुश्रेष्ठ । श्रेष्ठोत्तरौ तु पुङ्गवाविति वैजयन्ती । चैद्येन कर्त्रा घटां घनसन्धिं उपेयुषस्तव सम्बन्धीनि विकचोत्पलानि वासनार्थं निहितानि तान्येव चारुलोचनानि यस्य सः । सह सुरया माध्व्या गौड्या वा ससुरः । गौडी पैष्टी च माध्वी च विज्ञेया सा सुरा त्रिधेति वचनात् । अत्र राजन्यवैश्ययोः पैष्ट्यामेव निषेधः । नवासवो नवमद्यं नालिकेरादिकमिति सुरासवयोर्भेदः । बन्धुसौहृदात् बन्धौ त्वयि स्नेहात् पाता पास्यति त्वद्गृहे सह पानं करिष्यते सम्प्रति ते सत्प्रतिपन्नत्वादिति भावः । पिबतेः कर्मणि लुट् । परत्र तु । हे यदुपुङ्गव यादवश्रेष्ठ चैद्येन सह घटां उपेयुषः समराभियोगकृतस्य तव विकचोत्पलचारुलोचनः । ससुरः सदेवो वासवोऽपि बन्धुसौहृदात् उपेन्द्रे त्वयि सौभ्रात्रा दित्यर्थः । पाता त्राता न किं पुनर्मत्सकाभोज्यादयः इति भावः । पातेस्तृच् । सुहृदयस्य भावः सौहृदमिति विग्रहः युवादित्वादण्प्रत्ययः हृदयस्य हृल्लेखेति हृद्भावविधानसामर्थ्याच्च

चलितानकदुन्दुभिः पुर
स्सबलस्त्वं सह सारणेन तम् ।
समितौ रभसादुपागत
स्सगदस्सम्प्रतिपत्तुमर्हसि ॥ १३ ॥

सङ्गेत्युभयपदवृद्धिः अतएव सौहृदसौहृदशब्दाभ्यामणि सङ्गावाविति वामनः सुहृदस्तु सौहार्दमेव । शब्दार्थश्लेषसङ्करः ॥ १२ ॥

चलितेति । रभसाद्दर्पादुपागतः प्राप्तस्त्वं चैद्यं तं पुरश्चलिता नकदुन्दुभिः पुरोगतवसुदेवः । वसुदेवोऽस्य जनकः स एवानक दुन्दुभिरित्यमरः । सबलोबलभद्रसहितः । सारणेन सारणाख्येन पुत्रेण सह सगदः गदाख्येन अनुजेन सहितः समितौ सभायां सम्प्रतिपत्तुं सम्भावयितुं अर्हसि सर्वबन्धुसमेतः प्रत्येतुमर्हसीत्यर्थः । पक्षस्तु । समितौ समरे रभसाद्वेगादुपागतः । रभसोवेगहर्षयोः । समितिः समरे साम्ये सभायामपि संगतेत्युभयत्रापि विश्वः । तं चैद्य पुरतः चलिताआनकाः पटहाः दुन्दुभयोभेर्यश्च यस्य सः । आनकः पटहोऽस्त्री स्यात्भेरी स्त्री दुन्दुभिः पुमानित्यमरः । सबलः ससैन्यः । सगदः गदया कौमोदक्या सहितः सन्सहसा झटिति । रणेन युद्धेन सम्प्रतिपत्तुमभियोक्तुमर्हसि । अत्रापि शब्दार्थश्लेषसङ्करः ॥ १३ ॥

समरेष्विति । किञ्च समरेषु रिपून् विनिघ्नता अतिशूरे णेत्यर्थः । शिशुपालेन समेत्यैक्यं प्राप्य सम्प्रति सुचिरं बहुकालं ललतः चरत्यानि पुमांसः सालताः यादवाः । उत्सादिभ्योऽञ् ।

समरेषु रिपून्विनिघ्नता
शिशुपालेन समेत्य सम्प्रति ।
सुचिरं सह सर्व्वसात्वतै
र्भव विश्वस्तविलासिनीजनः ॥ १४ ॥

विजितक्रुधमीक्षतामसौ
महतान्त्वा महितम्महीभृताम् ।
असकृज्जितसंयतम्पुरो
मुदितः सप्रमदम्महीपतिः ॥ १५ ॥

तै: सर्व्वै: सर्व्वसात्वतैः सह विश्वस्तविलासिनीजनः शिशुपालभय निवृत्तिविस्रब्धविलासिनीजनोभव । समौ विस्रम्भविश्वासावित्य मरः । परमस्तु । रिपुघातिना शिशुपालेन सह समरेषु समेत्य सङ्गत्य सम्प्रत्येव सर्व्वसात्वतैः सह विश्वस्तविलासिनीजनोभव । विश्वस्ता विधवा समेत्यमरः । आदितश्चेति चकारादनुमतस्य च यार्थाच्छ्वसेर्निष्ठायामिटप्रतिषेधः । शिशूनामनुद्धतानामेवायं पालयिता नोद्धतानामिति सर्व्वया यादवानयैव हनिष्यतीति भावः ॥ १४ ॥

विजितेति । असौ महीपतिश्चैद्यः मुदितः सन् विजितक्रुधं मैत्री बन्धान्निरस्तक्रोधं महतान्महीभृतां राज्ञां महितं पूजितं । गति बुद्धीत्यादिना वर्त्तमाने क्तः तद्योगे षष्ठी । असकृदसङ्ग्रामेजिताः संयता आजयोयेन स तं । समुदायः स्त्रियां संयत्समित्याजिसमिद्युधइत्य मरः । सप्रमदं सहर्षं त्वा त्वां । द्वितीयायाश्चेति त्वादेशः । पुरो ऽग्रे ईक्षतां पश्यतु । परमस्तु विजितक्रुधं संत्यक्तक्रोधं महतां मही

इति जोषमवस्थितं द्विषः
प्रणिधिं गामभिधाय सात्यकिः ।
वदति स्म वचोऽथ चोदित
श्चलितैकभ्रु रथाङ्गपाणिना ॥ १६ ॥

श्रुतां चैद्यादीनामहितमरिमसङ्ख्यातस्यासौ संयतस्य । स्नातानु लिप्तवत्पूर्व्वकालेति समासः । सङ्क्षेन सङ्गस्य संयतइति वैजयन्ती । सप्रमद सश्लोकं त्वामिति पदच्छेदः असहदीप्सतां ॥ १५ ॥

इतीति । इतीत्थम्भूतां गां वाचं अर्ज्जुनोनेत्रदिग्वाण भूवाग्वारिषु गौर्मतेति विश्वः । अभिधाय जोषमवस्थितं । तूष्णीं जोषं भवेन्मौनइति वैजयन्ती । द्विषः प्रणिधिं दूतं सात्यकिः शैनेयः अथ दूतवाक्यानन्तरं रथाङ्गं चक्रं पाणौ यस्य तेन रथाङ्गपाणिना हरिणा । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति पाणेः परनिपातः । चलिता प्रेरिता एका भ्रूर्यस्मिन् कर्म्मणि रत् । गोस्त्रियोरुपसर्ज्जनस्येति ह्रस्वः । चोदितः अस्येत्तर देहोति भ्रूसंज्ञया प्रेरितस्सन्नित्यर्थः वचोवदति स्मावादीत् ॥ १६ ॥

किन्तदयस्तदेकविंशतिश्लोकैराह । मधुरमित्यादि । इतिना कुशलेन त्वया वहिः प्रकाशे मधुरं प्रियं अन्तर्गर्भे अप्रियं वचस्तथा तेन प्रकारेणावाचि उक्तं । वचेः कर्म्मणि लुङि चिणि वृद्धिः । यथा येन प्रकारेण सकलार्थतया सम्पूर्णाभयार्थतया हेतुना अन्तःप्रियं वहिरप्रियं विभाव्यते अवधार्य्यतेऽप्रियगर्भ प्रियं यदुक्तं तदस्माकं तु प्रियगर्भमप्रियमेव प्रतीयते । इदमक

मधुरं बहिरन्तरप्रिय
कृतिनाऽवाचि वचस्तया त्वया।
सकलार्थतया विभाव्यते
प्रियमन्तर्बहिरप्रियं यथा ॥ १७ ॥
अतिकोमलमेकतोऽन्यतः
सरसाम्भोरुहवृन्तकर्कशम्।
वहति स्फुटमेकमेव ते
वचनं शाकपलाशदेश्यताम् ॥ १८ ॥

चातुर्य्यं तवैवेत्यभिप्रेत्योक्तं कृतिनेति अतोऽस्य श्रद्धेयमिदं वचइति भावः ॥ १७ ॥

अथ वा बहिरेव प्रियं अन्तरेवाप्रियं तथापि न ग्राह्यमित्युपमया व्यनक्ति । अतीति । एकतोबहिरतिकोमलं अन्यतः अन्तः सरसमार्द्रं यदम्भोरुहस्य वृन्तं प्रसवबन्धनं तदिव कर्कशं परुषं एकमेव ते तव वचनं ईषदसमाप्तं शाकपलाशं महापत्राख्यतरुपर्णं तत्तुल्यं। शाकः पलाशसारः स्यात् वरदारुः करच्छदः। महापत्रो महाशाकः स्थिरदारुर्हमीटकइत्यभिधानरत्नमालायां । ईषदसमाप्तौ कल्पदेश्यदेशीयरइति देश्यप्रत्ययः कल्पदेश्यदेशीयानि साहश्यवाचकानीति दण्डी । तस्य भावस्तत्ता तां स्फुटं वहति। अन्तः परुषस्य बहिर्माधुर्य्यं शाकपलाशवदिति भावः । अत्र शाकपलाशोपमायाः पद्मवृन्तोपमासापेक्षत्वात् सङ्करः ॥ १८ ॥

नन्वप्रियगर्भेऽपि वाक्ये गुणग्राहिभिः प्रियमेव गृह्यतां हंसैः क्षीरमिवाम्भसीत्याशङ्क्याह । प्रकटमिति । प्रकटं प्रकाशं मृदु नाम

प्रकटम्मृदु नाम जल्पतः
परुषं सूचयतोऽर्थमन्तरा ।
शकुनादिव मार्ग्गवर्त्तिभिः
पुरुषादुद्विजितव्यमीदृशात् ॥ १९ ॥
हरिमर्च्चितवान्स भूपति
र्यदि राज्ञस्तव कोऽत्र मत्सरः ।
न्यसनाय ससौरभस्य कः
स्तरुसूनस्य शिरस्यसूयति ॥ २० ॥

मृदु कल्यं जल्पतः कथयतः । अन्तरान्तः परुषमनिष्टमर्थं सूचयतः ईदृशादन्तः शुद्धिशून्यात्पुरुषादोदृशः शकुनादिव वहिः शुभङ्करं कुर्व्वतोऽन्तरा परुषं सूचयतः पिङ्गलादिपक्षिण इव मार्ग्गवर्त्तिभि रध्वगैस उद्विजितव्यं भवाद्भितोऽपि यात्रां विषसंपृक्तान्नवद् विलक्षणानर्थहेतुत्वादिति भावः । विज इडितीट् ङित्त्वान्न गुणः ॥ १९ ॥

एवं दूतं निर्भर्त्स्य अथ चैद्यं तद्दोषोद्घाटनपूर्व्वकं भर्त्सयते । हरिमित्यादि । स भूपतिर्युधिष्ठिरो हरिमर्चितवान यदि पूजितवान् । अत्र दर्शनेन तव राज्ञश्चैद्यस्य मत्सरः कः निरर्थक इत्यर्थः । ससौरभस्य परिमलयुक्तस्य तरुसूनस्य । तरुग्रहणं सूनस्य साधारणताद्योतनार्थं । शिरसि न्यसनायार्पणाय कोऽसूयति न कोऽपीत्यर्थः । क्रुधद्रुहेत्यादिना सम्प्रदानसंज्ञा । सर्व्वश्च गुणवत्सु गुणमेव मन्यते तटस्थानां किमत्र वृथा सन्तापेनेति

सुकुमारमहो लघीयसां
हृदयन्तद्गतमप्रियं यतः ।
सहसैव समुद्गिरन्त्यमी
क्षपयन्त्येव हि तन्मनीषिणः ॥ २१ ॥

भावः । अत्र हरितत्सूनयोर्वाक्यद्वये बिम्बप्रतिबिम्बभावेनार्थ्य शिरोधारणरूपसमानधर्मनिर्देशात् दृष्टान्तालङ्कारः ॥ २० ॥

अथ कथं महान् महतः पूजां सहतइत्याशङ्क्य हरिचैद्ययोर्महदन्तरं मनसि निधाय सामान्यतः सुजनदुर्जनयोरन्तरं चतुर्भिराह । सुकुमारमित्यादि । लघीयसामल्पीयसां हृदयं सुकुमारं तत् कुतः यतोऽमी लघीयांसस्तद्गतं हृदयगतं अप्रियं सहसैव झटित्येव समुद्गिरन्ति समुच्चारयन्ति मनीषिणस्तु तत्प्रियं कथञ्चित् सम्भाव्यमानमपीति शेषः अन्तरेव क्षपयन्ति जरयन्ति न तूद्गिरन्तीत्यर्थः । अहो इत्याश्चर्य्ये । चैद्यस्तद्गिरति नैवं हरिरिति अहो महदन्तरमनयोरिति भावः । अतएवा प्रस्तुतात् सामान्यात् प्रस्तुतविशेषप्रतिपत्तिरूपोऽयमप्रस्तुतप्रशंसा भेदः । अप्रस्तुतस्य कथनात्प्रस्तुतं यत्र गम्यते । अप्रस्तुत प्रशंसेयं सारूप्यादिनियन्त्रितेति लक्षणात् । आदिशब्दात्सामान्य विशेषसङ्ग्रहः । एवमुत्तरश्लोकत्रयेऽपि द्रष्टव्यं विशेषन्तु वक्ष्यामः ॥ २१ ॥

उपकारेति । किञ्च सज्जनः स्वभावतः सततं सर्व्वजनस्योपकारपरोभवति तद्रूपाधिवशात् कदाचित्कश्चिदेवेति भावः । तथापि सर्व्वोपकारित्वेऽपि तदुन्नतिरस्य सज्जनस्योत्कर्षः

उपकारपरः स्वभावतः
सततं सर्व्वजनस्य सज्जनः ।
असतामनिशन्तथाप्यहो
गुरुहृद्रोगकरी तदुन्नतिः ॥ २२ ॥

परितप्यत एव नोत्तमः
परितप्तोऽप्यपरः सुसंवृतिः ।
परवृद्धिभिराहितव्यथः
स्फुटनिर्भिन्नदुराशयोऽधमः ॥ २३ ॥

असतामसाधूनामनिशं गुरुहृद्रोगकरी अत्यन्तहृदयसन्तापकारिणी अहो आश्चर्य्यं । हृत्तोहेल्लित्यादिना ताच्छील्ये टप्रत्यये टिड्ढाणञित्यादिना ङीप् । हरिचैद्याविवक्षूताविति सैवाप्रस्तुतप्रशंसा ॥ २२ ॥

परितप्यतइति । किन्तु उत्तमः परवृद्धिभिर्न परितप्यते न व्यथते एव उत्तमस्यापरशुभद्वेषएव नास्तीत्यर्थः । अपरो मध्यम एवेत्यर्थः परितप्तोऽपि शोभना संवृतिः परितापगोपनं यस्य सः सुसंवृतिः सन्तमपि परशुभद्वेषं न प्रकाशयतीत्यर्थः । अधमस्तु परवृद्धिभिराहितव्यथः उत्पादितसन्तापः तथा स्फुटं निर्भिन्नः प्रकाशितोदुराशयः परशुभद्वेषलक्षणोदुरभिप्रायोयस्य सः परशुभद्वेषं प्रकाशयत्येवेत्यर्थः । चैद्यस्याधमोहरिस्तूत्तमइति प्रतीतेः पूर्व्वोक्तएवालङ्कारः ॥ २३ ॥

ननु मानिनां परोत्कर्षे परद्वेषोभूषणमेवेत्याशङ्क्य नेत्याह । अनिराकृतेति । अनिराकृता अनिवारिता तापसम्पत्तापातिशयोयया

अनिराकृततापसम्पद
म्फलहीनां सुमनोभिरुज्झिताम् ।
खलताङ्खलतामिवासती
म्प्रतिपद्येत कथम्बुधोजनः ॥ २४ ॥
प्रतिवाचमदत्त केशवः
शपमानाय न चेदिभूभुजे ।
अनु हुङ्कुरुते घनध्वनि
न्नहि गोमायुरुतानि केशरी ॥ २५ ॥

तां एकत्र सन्तापजननैकस्वभावादपरत्राश्रमच्छायाविरहाच्चेति भावः । तथा फलहीनां एकत्र दृष्टामुत्र चोपकारशून्यां मत्युतो भयत्राप्यनर्थकरीं चेति भावः। अन्यत्र सर्व्वार्थरहितां सुमनोभिर्बुधैरुज्झितां अन्यत्र पुष्पैर्वर्जितां । सुमनाः पुष्पमालत्योः स्त्री देवबुधयोः पुमानिति वैजयन्ती । असतीं दुष्टां अन्यत्र निरुपाख्यां खलस्य भावः खलता तां खलतां दुर्ज्जनत्वं । खस्य लता तां खलतां गगनलतिकामिव बुधोजनः सदसद्विवेककुशलोजनः कथं प्रतिपद्येतावलम्बेत न कथमपीत्यर्थः । त्वया मत्सरेण कस्यापि गुणइति भावः । तथापि स खलतां प्रतिपद्यते न चैवं हरिरिति प्रतीतेः सैवाप्रस्तुतप्रशंसा खलतामिवेत्युपमया सङ्कीर्य्यते । सत्यं न सत्यपि ज्ञानमर्थे शब्दः करोति होति न्यायादसत्याअपि खलतिकायाः प्रतीतिसत्यतया खलतोपमत्वप्रसिद्धिः ॥ २४ ॥

नन्वेवं महानुभावोहरिः किमर्थं तथा सदसि राज्ञा निर्भर्त्स्यमानोमौनमास्थितइत्याशङ्क्य सत्यमनादरान्न तु कातर्य्यादित्याह ।

जितरोषरया महाधियः
सपदि क्रोधजितो लघुर्जनः ।
विजितेन जितस्य दुर्मते
र्मतिमद्भिस्सह का विरोधिता ॥ २६ ॥
वचनैरसतां महीयसो
न खलु व्येति गुरुत्वमुद्धतैः ।
किमपैति रजोभिरौर्वरै
रवकीर्णस्य मणेर्महार्घता ॥ २७ ॥

प्रतीति । केशवः अपमानाय क्रोशते । खरितेत्वादात्मनपदम् । चेदिभूभुजे । क्रियाग्रहणात् सम्प्रदानत्वम् । प्रतिवाचं प्रत्युत्तरं नादत्त । केशरी सिंहो घनध्वनिमनुकुरुते प्रतिगर्जति गोमायुरुतानि शिवारुतानि नानुकुरुते । स्त्रियां शिवा भूरिमाय गोमायुमृगधूर्त्तका इत्यमरः । महतामधमेष्ववज्ञैव नीतिरिति भावः । दृष्टान्तालङ्कारः ॥ २५ ॥

किञ्च राज्ञो हरिणा विरोधोऽपि न योग्य इत्याह । जितेति । महाधियः सुधियो जितारोषरयो यैस्ते तथोक्ताः । लघुरल्पो जनस्तु सपदि क्रोधजितः एवं विजितेन जितक्रोधेन जितस्येत्यर्थः । दुर्मते र्मूर्खस्य मतिमद्भिः पण्डितैः सह विरोधिता स्पर्द्धा का । मूर्ख पण्डितयोर्मैत्रीव स्पर्द्धापि न सङ्गतेत्यर्थः । मूर्खस्यायं चैद्य इति अप्रस्तुतात् सामान्यात् विशेषप्रतीतेरप्रस्तुतप्रशंसाभेदः ॥ २६ ॥

नापि चैद्यप्रलापैः कृष्णस्य किं खलाघवमित्याशयेनाह । वचनै रिति । उद्धतैर्निष्ठुरैरसतां दुर्जनानां वचनैर्महीयसोमहत्तमस्य

परितोषयिता न कश्चन
स्वगतो यस्य गुणोऽस्ति देहिनः ।
परदोषकथाभिरल्पकः
स्वजनं तोषयितुं किलेच्छति ॥ २८ ॥

गुरुत्वं गौरवं न व्येति नापैति खलु । श्रोर्वरैर्भौमैः । उर्वरा सर्व्व शस्याढ्यभूमौ स्यादूमिमाचकरति विश्वः । रजोभिरवकोर्णस्य च्छन्नस्य मणेर्महार्घता महामूल्यत्वं । मूल्ये पूजाविधावर्घ इत्यमरः । अपैति किं नापैत्येवेत्यर्थः । अत्र मणिमहीयसोर्लोकभेदेन प्रतिबिम्बकरणादृष्टान्तालङ्कारः । महीयस इति सामान्याद्धरेरिति विशेषप्रतीतेरप्रस्तुतप्रशंसा चेति सङ्करः हरिमिणोरुपमाध्वनिश्च ॥ २७ ॥

युक्तञ्चैतत्पारुष्यं दुरात्मनामित्याह । परीति । यस्य देहिना जन्तोः परितोषयिता परेषामानन्दयिता स्वगतो गुणः कश्चन कश्चिदपि नास्ति अल्पकः तुच्छस्स इति शेषः । यत्तदोर्नित्य सम्बन्धात् । परदोषकथाभिरन्यजनदोषोक्तिभिः स्वजनं न तु मध्यस्थमिति भावः । तोषयितुमिच्छति किल ईहते खलु । चैद्यस्यापि निर्गुणत्वात्परदूषणं युक्तमिति अतएवाप्रस्तुतप्रशंसा भेदः ॥ २८ ॥

नन्वात्मनो निर्दोषत्वाभिमानादित्थं विकत्थनमित्याशङ्क्याह । सहजेति । असाधवः खलाः स्वदुर्नये स्वदोषे महत्यपीति भावः । सहजा स्वाभाविकी अन्धा अपश्यन्ती दृग्येषां ते जात्यन्धा इत्यर्थः । परदोषाणां सूक्ष्माणामपीति भावः । ईक्षणे दर्शने दिव्यचक्षुषो

सहजान्धदृशः स्वदुर्नये
परदोषेक्षणदिव्यचक्षुषः ।
स्वगुणोच्चगिरो मुनिव्रताः
परवर्णग्रहणेष्वसाधवः ॥ २९ ॥

प्रकटान्यपि नैपुणं महत्
परवाच्यानि चिराय गोपितुम् ।
विवरीतुमथात्मनो गुणान्
भृशमाकौशलमार्य्यचेतसाम् ॥ ३० ॥

ऽप्रतिहतदृष्टय: । किञ्च स्वगुणेषूच्चगिर: आत्मप्रशंसायामति प्रगल्भवाच इत्यर्थ: परवर्णग्रहणेषु परस्तुतिवचनेषु । स्तुतौ वर्णन्तु वाचर इत्यमर: । मुनिव्रता मौनव्रतिन: । अर्शादिभ्योऽच् । चैद्यस्त्वेवं दिध इति प्रतीतेरप्रस्तुतप्रशंसा ॥ २९ ॥

साधवस्तु नैवमित्याह । प्रकटानीति । आर्य्यचेतसां सुमनसां प्रकटान्यपि परवाच्यानि परदूषणानि चिराय गोपितुं गोपायितुं संवरितुमित्यर्थ: । आयादय आर्द्धधातुके वेति विकल्पादाय प्रत्ययाभाव: । महन्नैपुणं कौशलं । अथेति वाक्यारम्भे । अथात्मनो गुणान् विवरीतुं प्रकटयितुं आत्मप्रशंसां कर्त्तु मित्यर्थ: भृशमाकौशलमत्यन्तमकौशलं साधवो न परान्निन्दन्ति नवात्मानं प्रशंसन्ति । आत्मप्रशंसां परगर्हामिव वर्जयेदित्याप स्तम्बीये निषेधस्मरणादिति भाव: । नञ: शुचिश्वरचेत्रज्ञ

किमिवाखिललोककीर्त्तितं
कथयत्यात्मगुणं महामनाः ।
वदिता न लघीयसोऽपरः
स्वगुणं तेन वदत्यसौ स्वयम् ॥ ३१ ॥

कुशलनिपुणानामिति विकल्पाश्रवन्नं पर्व्वपदस्यापि वृद्धिः । अस्यैव भूतइति विशेषप्रतीतेरप्रस्तुतप्रशंसैव ॥ ३० ॥

किमिति । किञ्च महामना महात्मा । अखिललोककीर्त्तितं अतएव सर्व्वलोकप्रख्यातमात्मगुणं किमिव किमर्थं कथयत्येव अतएव सर्व्वैः लोकैः कीर्त्त्यमानत्वादित्यर्थः । लघीयसस्तुच्छस्य तु स्वगुणं वदिता वक्ता । वदेस्तृच्प्रत्ययः । अतएव न लोकेत्यादिना षष्ठीप्रतिषेधः । अपरोऽन्योनास्ति तेन कारणेनासौ लघीयान् स्वगुणं स्वयमेव वदति न केवलं निषेधात् किञ्च प्रयोजनाभावादपि महान् आत्मप्रशंसां न करोति तुच्छस्तु वक्त्रन्तरासम्भवात् स्वयमेव तां प्रलपतीत्यर्थः । पूर्व्वार्द्धे पदार्थहेतुकं काव्यलिङ्गं उत्तरार्द्धे वाक्यार्थहेतुकं बोध्यम् । इत्यनयोः चैवं विधाविति विशेषप्रतीतेरप्रस्तुतप्रशंसा चेति सङ्करः ॥ ३१ ॥

किञ्च महात्मानः क्रुद्धाः काले पराक्रमन्ति दुरात्मानस्तु केवलं प्रलपन्तीत्याह । विसृजन्तीति । परे नराः सत्पुरुषाः विषमाशीविषवत् क्रूरसर्पवदित्युपमा । अविकत्थनोऽनात्मश्लाघिनएव क्रुधं क्रोधं विसृजन्ति वमन्ति पराक्रमन्तीत्यर्थः । अन्तरभ्यन्तरे असारकृपतां निःसारकृपतां दधतोदधानाः । काम्यस्ताः कतुरिति गुमभावः । इतरे जनादुर्जनाः पटहाइव

विहृजल्पविकत्थिनः परे
विषमाशीविषवन्नराः कथम्।
द्धतोऽन्तरसाररूपतां
ध्वनिसाराः पटहा इवेतरे ॥ ३२ ॥
नरकच्छिदमिच्छतीक्षितुं
विधिना येन स चेदिभूपतिः ।
द्रुतमेतु न हापयिष्यते
सदृशन्तस्य विधातुमुत्तरम् ॥ ३३ ॥

ध्वनिरेव सारो बलं येषां ते ध्वनिसारा वाक्शूरा एव न तु बाहुबल शालिन इति भावः। अत्रापीदृशो हम्यविद्याक्यिप्रस्तुतसामान्यात् प्रस्तुतविशेषप्रतीतेरप्रस्तुतप्रशंसाभेदः ॥ ३२ ॥

अभिधाय तदा तदप्रियमित्यादिना यदुक्तेन युगपत्प्रिया प्रियेऽभिहिते तत्रोत्तरमाह। नरकेति। स महीपतिश्चेदिभूपति येन विधिना येन प्रकारेण सन्धिना विग्रहेण वा। नरकच्छिदं नरकस्याप्यन्तकं किमन्येषामसुराणामिति भावः। ईक्षितुं इच्छति तस्य विधेः सदृशमुत्तरं प्रतिक्रिया ओदोविरोधो वा विधातुं न हाप यिष्यते अविलम्बेन विधास्यत इत्यर्थः। जहातेर्ण्यन्तात्कर्मणि लृट् विधानक्रियया अनभिधानेऽपि प्रधानभूतक्रियया अभि हितत्वादुत्तरमिति न कर्मणि द्वितीया। द्रुतं शीघ्रमेतु आगच्छतु आगमने स्वयमेव क्षीयत इति भावः ॥ ३३ ॥

नन्वभिधायेत्यादौ मया साम्यमेव विवक्षितं न विग्रहस्तत् किम् भयाभ्यनुज्ञापेत्याशङ्क्याह। समनन्तरेति। ऋज्वित्यामन्त्रणे। अतो

समनद्ध किमङ्ग भूपति
र्यदि सन्धित्सुरसौ सहामुना।
हरिराक्रमणेन सन्नति
ङ्किल बिभीत भियेत्यसम्भवः ॥ ३४ ॥

महतस्तरसा विलङ्घय
न्निजदोषेण कुधीर्विनश्यति ।
कुरुते न खलु स्वयेच्छया
शलभानिन्धनमिद्धदीधितिः ॥ ३५ ॥

भूपतिश्चैद्योऽमुना हरिणा सह सन्धित्सुर्यदि सन्धातुमिच्छुर्येन । दधातेः सन्नन्तादुप्रत्ययः । किं समनद्ध किमर्थं सन्नद्धवान् ततो नायं सन्धित्सुरिति भावः । नह्यतेः स्वरितेत्वात्कर्तरि लुङि तङ् झलो झलीति सकारलोपः । कृष्णभीषणार्थं सन्नाह इत्यत आह । हरिः सिंहः कृष्णश्च किलाक्रमणेनाभिभवेन याभीस्तया सन्नतिं नम्रतां बिभीत बिभृयादित्यसम्भवः सम्भवो नास्ति खलु इत्यर्थः ॥ ३४ ॥

अथाक्रमणेऽनिष्टमाचष्टे । महत इति । कुधीरसद्विचारस्तद्विपरीतबुद्धिमान् महतो महानुभावान् तरसा बलेन । तरसा बलरंहसी इति विश्वः । विलङ्घयन्नाक्रामन् निजदोषेण स्वापराधेनैवात्मनाशरूपेण विनश्यति । तथाहि इद्धदीधितिर्दीप्तार्चिरग्निः स्वया निजयेच्छया शलभान् पतङ्गान् । समौ पतङ्गशलभाविति अमरः । इन्धनं दाह्यं न कुरुते खलु किन्तु त एव निःशङ्कत्याभिपत्य इन्धनमित्यर्थः इतः परत्र पश्यतेति भावः । दृष्टान्तालङ्कारः ॥ ३५ ॥

यदपरि पुरा महीपति
र्मुखेन स्वयमागसां शतम्।
अथ सम्प्रति पर्य्यपूपुर
त्तदसौ दूतमुखेन शार्ङ्गिणः ॥ २६ ॥
यदनर्गलगोपुराननः
स्त्वमितो वक्ष्यसि किञ्चिदप्रियम्।
विवरिष्यति तच्चिरस्य नः
समयोद्घोषणरक्षितां क्रुधम् ॥ २७ ॥

नन्वसहने शार्ङ्गिणः शतापराधसहनप्रतिज्ञाभङ्गः स्यादित्यत्राह। यदिति। पुरा पूर्वं महीपतिश्चैद्यो मुखेन स्ववाचा यत् आगसां अपराधानां शतं। आगोऽपराधो मन्तुश्चेत्यमरः। शार्ङ्गिणः कृष्णस्य स्वयं नापूरि नापूरयदित्यर्थः। पूरयतेः कर्त्तरि लुङ् दीपजने त्यादिना विकल्पाच्चिण्प्रत्यये तलोपलुक्। अथ स्वप्रलापानन्तरं सम्प्रतीदानीमसौ चैद्यः दूतमुखेन दूतवाचा तत् आगसां शतं पर्य्यपूपुरत् परिपूरयामास। दूतमुखत्वात् राज्ञां तेन कृष्णक्रोधावसरदानेन महदुपकृतमायुष्मतेति भावः। पूरयतेर्लुङि णौ चङ्युपधाया ह्रस्वमभ्यासदीर्घः ॥ २६ ॥

निगमयन् फलितमाह। यदिति। अनर्गलमविष्कम्भं विवृतमिति यावत्। तद्विष्कम्भोऽर्गलं न नेत्यमरः। यद्गोपुरं पुरद्वारं तदिवाननं यस्य स वाच्यावाच्यविवेकशून्य इत्यर्थः। त्वमितः इतः परं यदप्रियं वक्ष्यसि तदप्रियं चिरस्य चिरात्प्रभृति। चिराय चिररात्राय चिरस्याद्याश्चिरार्थका इत्यव्ययेष्वमरः।

निशमय्य तदूर्जितं शिने-
र्वचनं नप्तुरनाप्तुरेनसाम् ।
पुनरुज्झितसाध्वसो द्विषा-
मभिधत्ते स्म वचो वचोहरः ॥ २८ ॥
विविनक्ति न बुद्धिदुर्विधः
स्वयमेव स्वहितं पृथग्जनः ।
यदुदीरितमप्यदः परै-
र्न विजानाति तदद्भुतं महत् ॥ २९ ॥

समयो दीक्षणेन संवित्प्रतीक्षणेन रक्षितां रक्षामित्यर्थः । समयाः शपथाचारकालसिद्धान्तसंविद इत्यमरः । कथं क्रोधं विवरिष्यति । दृतेवेति दीर्घविकल्पः । इतः परं त्वमपि दण्ड्य एवेति भावः ॥ २७ ॥

निशमय्येति । एनसामनाप्तुः अप्राप्तुः सत्यवादिन इति भावः । आप्नोतेस्तृच् । शिनेर्नाम्नः कस्यचिद्यादवस्य नप्तुः पौत्रस्य सात्यकेरिति भावः । तदूर्जितं अर्थयुक्तं वचनं निशमय्य श्रुत्वा । ल्यपि लघुपूर्वादिति णेरयादेशः । पुनर्भूयोऽप्युज्झितसाध्वसं त्यक्तभयं यथा तथा द्विषां । वचो हरतीति वचोहरो दूतः । हरतेरनुद्यमनेऽच् । वचोऽभिधत्ते स्म अभिहितवान् ॥ २८ ॥

विविनक्तीति । बुद्ध्या दुर्विधो दरिद्रः बुद्धिशून्य इत्यर्थः । निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतश्च स इत्यमरः । पृथग्जनः पामरजनः स्वयमेव परोपदेशं विनैवात्महितं न विविनक्ति तद्युक्तमेवेति भावः । किन्तु परैरुदीरितं उपदिष्टमप्यदो हितं न

विदुरेष्यदपायमात्मना
परतः श्रद्दधतेऽथ वा बुधाः ।
न परोपहितन्न च स्वतः
प्रमिमीतेऽनुभवादृतेऽल्पधीः ॥ ४० ॥
कुशलङ्खलु तुभ्यमेव त
द्वचनङ्कृष्ण यदभ्यधामहम् ।
उपदेशपराः परेष्वपि
स्वविनाशाभिमुखेषु साधवः ॥ ४१ ॥

विजानातीति यत् तन्मयेदमुक्तं । यतः स्वार्थं न गृह्णातीति भावः ॥ ३९ ॥

अथ किमुक्तं मूर्खेष्वित्याशयेनाह । विदुरिति । बुधाः बुद्धिमन्तः एष्यन्तमागामिनं अपायमनर्थमात्मना स्वयमेव । प्रकृत्यादिभ्य उपसंख्यानात्तृतीया । विदुर्विदन्ति । विदो लटो वेति विकल्पाज्जुसादेशः । अथ वा परतोऽन्यस्मादाप्तात् श्रद्दधते विश्वसन्ति आप्तोक्तं गृह्णन्तीत्यर्थः । श्रदन्तरोरुपसंख्यानमिति उपसर्गसंज्ञोपसंख्यानाद्धातोः प्राक् प्रयोगः । अल्पधीर्मूढस्तु अनुभवादृते स्वानुभवं विना । अन्यारादितरर्त्त इति पञ्चमी । न प्रमिमीते न जानाति अधमस्तु स्वानुभवैकप्रमाण इत्यर्थः अधमस्त्वमिति भावः । अत एवाप्रस्तुतसामान्यात्प्रस्तुतविशेषप्रतीतेरप्रस्तुतप्रशंसाभेदः ॥ ४० ॥

अतः प्रस्तुते किमायातं तत्राह । कुशलमिति । हे कृष्ण अहं यद्वचनमभ्यधां अभिधायेत्यादिना राज्ञां सन्धिर्गुणाय विग्रह

उभयं युगपन्मयोदित-
न्त्वरया सान्त्वमथेतरच्च ते ।
प्रविभज्य पृथङ्मनीषया
स्वगुणं यत्किल तत्करिष्यसि ॥ ४ ॥

अथ वाभिनिविष्टबुद्धिषु
व्रजति व्यर्थकतां सुभाषितम् ।
रविरागिषु शीतरोचिषः
करजालङ्कमलाकरेष्विव ॥ ४३ ॥

स्वनर्थायेत्येवमवोचमित्यर्थः । तद्वचनं तुभ्यमेव कुशलं हितं । चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैरिति चतुर्थी । नन्वहितेषु हितोपदेशात्प्रत्ययः कथमित्याशङ्क्यामर्थान्तरन्यासेन परिहरति । साधवः सुजनाः स्वविनाशाभिमुखेषु प्रबलविरोधादात्मविनाशहेतुभूतकर्मप्रवृत्तेष्वित्यर्थः । परेषु शत्रुष्वपि उपदेशपराः उपदिशन्त्येव कृपालुतयेति भावः ॥ ४१ ॥

तथापि अर्थद्वये मद्वाक्ये किङ्कार्यं तत्राह । उभयमिति । मया सान्त्वं सामादि । अथेति पक्षान्तरे इतरदसान्त्वं विग्रहश्चेत्यर्थः । युगपदुदितं त्वन्तु मनीषया बुद्ध्या पृथग्भेदेन प्रविभज्य विविच्य यत्स्वगुणं तव द्वयेऽपि त्वरया यच्छुभोदर्कं तत्करिष्यसि किल खलु हंसः क्षीरमिवाम्भसीति भावः ॥ ४२ ॥

अथ वा सुजनस्वभावात् कृतोऽपि हितोपदेशो मूर्खेषु निष्फल इत्याह । अथ वेति । अथ वा अभिनिविष्टबुद्धिषु दुराग्रहग्रस्तचित्तेषु विषये सुभाषितं हितोपदेशवचनं रविरागिषु

अबुधैः कृतमानसंविद
स्तव पार्थैः कुतएव योग्यता ।
सहसि प्लवगैरुपासित
न्न हि गुञ्जाफलमेति सोष्मताम् ॥ ४७ ॥
अपराधशतक्षमन्नृपः
क्षमयात्येति भवन्तमेकया ।
हृतवत्यपि भीष्मकात्मजा
न्त्वयि चक्षाम समर्थएव यत् ॥ ४८ ॥

संकेतागारनामसु । सम्भाषणे तोषणे चेति विश्वः । तव योग्यता कुतएव न कुतोऽपीत्यर्थः । तथा हि सहसि मार्ग्गशीर्षे । मार्ग्गशीर्षे सहामार्ग्ग इत्यमरः । प्लवगैरुपासितं सेवितं गुञ्जाफलं काकफलानि । जातावेकवचनम् । काकचिञ्चीगुञ्जे तु कृष्णलेत्यमरः । सोष्मता मुष्णतां नैति न हि पुंसां मूढपरिग्रहापरिग्रहौ गौरवागौरवयोः प्रयोजकावित्यर्थः अत्र कृष्णगुञ्जाफलयोर्विशेषयोरेव वाक्यभेदेन प्रतिविम्बकरणात् दृष्टान्तालङ्कारः ॥ ४७ ॥

यदपूरीत्यादिना सात्यकिना कृतापराधक्षमत्वमुक्तं तत्रोत्तरमाह । अपराधेति । नृपश्चैद्यः अपराधस्य शतक्षमं राज्ञः कृतापराधसहिष्णुं भवन्तं । एकया क्षमया एकापराधसहनेनेत्यर्थः । अत्येति अतिक्रामति । अपराधकोटीनामपि तदंशेनापि साम्यासम्भवादिति भावः । तामेव क्षमां दर्शयति । त्वयि भीष्मकात्मजां रुक्मिणीं हृतवत्यपि समर्थः प्रतीकारक्षम एव सन्नपि चक्षाम क्षाम्यति स्मेति यत् तया क्षमयेत्यर्थः ॥ ४८ ॥

गुरुभिः प्रतिपादितांवधू
मपहृत्य स्वजनस्य भूपतेः ।
जनकोऽसि जनार्द्दन स्फुटं
हतधर्म्मार्थतया मनोभुवः ॥ ४९ ॥

राक्षसः क्षत्रियस्यैवमिति स्मरणात् राक्षसोद्वाहस्य चात्त्रधर्मत्वा द्रुक्मिणीहरणे कोऽस्माकमपराधः राज्ञोवा कात्र क्षमेत्या काङ्क्षायामाह । गुरुभिरिति । हे जनार्द्दन गुरुभिः पित्रादिभिः प्रतिपादितां राज्ञे दत्तां अतएव स्वजनस्य बन्धोर्भूपते महाराजस्य वधूं जायामपहृत्य । हतौ धर्म्मार्थौ येन तत्तया हेतुना हतधर्म्मार्थतया स्फुटं मनोभुवः कामस्य जनकोऽसि हत धर्म्मार्थतया काममात्रनिष्ठोऽसीत्यर्थः । नायं राक्षसोविवाहः । हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं तथा । प्रसह्य कन्या हरणं राक्षसोविधिरुच्यते इति कन्याहरणस्य राक्षसत्वलक्षणात् । अयन्तु परदारापहरणे बन्धुद्रोहोराजद्रोहश्चेत्युभे पापिष्ठस्य कामान्धस्य ते परममाहमिकत्वमिति भावः ॥ ४९ ॥

सत्यमोहृगेवाहं ततः किमित्याशङ्क्य किमन्यद्वधादित्याह । अनिरूपितेति । अनिरूपितरूपसम्पदः गोमूत्रवदकृरूपधारित्वा दज्ञातरूपविशेषस्यावाङ्मनसगोचररूपवैभवस्येति च गम्यते । अन्यत्र आरोपितकृष्णरूपं तमः तेजोविशेषाभावस्तमइति च मत द्वयेऽपि प्रमाणानवधृतरूपसम्पदइत्यर्थः । अन्यस्मतस्कृत्यकृतेः कोकिलपक्षकान्तेस्तव तमसोवा तिमिरस्येव । वा स्यात् विकल्पोप मयोरिति विश्वः । सर्व्वगतस्य विततस्येदिपोऽभोऽऽमानंऽऽमामिव

अनिरूपितरूपसम्पद
स्तमसोवान्यभृतच्छदच्छवेः ।
तव सर्व्वगतस्य सम्प्रति
क्षितिपः क्षिप्नुरभीशुमानिव ॥ ५० ॥

क्षुभितस्य महीभृतस्त्वयि
प्रशमोपन्यसनं वृथा मम ।
प्रलयोल्लसितस्य वारिधेः
परिवाहोजगतः करोति किम् ॥ ५१ ॥

सम्प्रतीदानीमेव क्षिप्नुः क्षेप्ता आहन्तेत्यर्थः शास्तासौदुरात्मनामिति भावः । त्रसिगृधिधृषिक्षिपेः क्नुरिति क्नुप्रत्ययः । न लोकेत्यादिना क्नुयोगे षष्ठ्यानिषेधे वेति शेषे षष्ठी पर्य्यवसानान्न कर्म्मत्वलाभः । अभीषुः प्रग्रहे रश्मावित्यमरः । विश्वप्रकाशादयः सर्व्वेऽप्याभिधानिकामूर्द्धन्यान्तेषु पेठुः लोकवदघोस्तालव्यान्तोदृश्यते । अभीशूनां महिम्नमित्यादि ॥ ५० ॥

तर्ह्यस्मदर्थं त्वया राजा सान्त्वयितव्यइत्याशङ्क्य नेत्याह । क्षुभितस्येति । त्वयि विषये क्षुभितस्यातिक्रुद्धस्य महीभृतोराज्ञोमम प्रशमोपन्यसनं शान्त्युपदेशोवृथा निष्फलः । तथा हि प्रलयोल्लसितस्य कल्पान्तक्षुभितस्य वारिधेः जगतः परिवाहोजगत्कृतो जलनिर्ग्गमनमार्ग्गः किङ्करोति न किञ्चिदित्यर्थः । दृष्टान्तालङ्कारः ॥ ५१ ॥

तर्हिसन्धित्सुना राज्ञा किमर्थं भवानिह प्रहितस्तत्राह । प्रहितइति । प्रधनाय युद्धाय माधवान् यादवानाकारयितु

प्रहितः प्रधनाय माधवा
नहमाकारयितुम्महीभृता ।
न परेषु महौजसश्छला
दपकुर्व्वन्ति मलिम्लुचाइव ॥ ५२ ॥
तदयं समुपैति भूपतिः
पयसाम्पूर इवानिवारितः ।
अविलम्बितमेधि वेतस
स्तरुवन्माधव मा स्म भज्यथाः ॥ ५३ ॥

माक्रातुं । यद्धमायोधनं जन्यं प्रधनं प्रविदारणम् । क्षतिरा कारणाक्रानमिति चामरः । महीभृता राज्ञाहं प्रहितः प्रेरितः ननु रन्ध्रे हन्तव्याः श्चत्रवोनाक्रातव्याद त्यचाह । नेति । महौजसो महावीराः परेष्वरिषु मलिम्लुचाः पाटच्चराइव । पाटच्चरमलि म्लुचाइत्यमरः । छलात् कपटात् नापकुर्व्वन्ति । तस्मादाक्रानं कर्त्तव्यमिति वाक्यार्थहेतुकद्वाव्यलिङ्गमुपमालङ्कारसङ्कीर्णं ॥५२॥

तदेवागमनप्रयोजनमुक्त्वा हितमुपदिशति । तदयमिति । तत्तस्माद्युद्धार्थत्वादयं भूपतिश्चैद्यः पयसाम्पूरः प्रवाहइवानिवा रितः समुपैति हे माधव अविलम्बितं शीघ्रं वेतसः एधि भव तद्वत्तस्मादात्मानं रक्षेत्यर्थः । अस्तेर्लोट् सिपि हेर्द्धिः घ्वसोरेद्धावभ्यासलोपश्चेति एत्वं धि चेति सकारलोपः । माधव त्वं तरुवत् महावृक्षवत् मा स्म भज्यथामाभज्यस्व अतः चात्मानं न विनाशयेत्यर्थः । भजेः कर्म्मण्याशिषि लिङः स्मोत्तरे लङ् चेति लङ् न माङ्योगे इत्यडभावः । उपमालङ्कारः ॥ ५३ ॥

परिपाति स केवलं शिशू-
निति तन्नामनि मा स्म विश्वसीः ।
तरुणानपि रक्षति क्षमी
स शरण्यः शरणागतान्द्विषः ॥ ५४ ॥
न विदध्युरशङ्कमप्रिय-
महतः स्वार्थपराः परे कथम् ।
भजते कुपितोऽप्युदारधी-
रनुनीतिं नतिमात्रकेण सः ॥ ५५ ॥

ननु राज्ञि शिशुपाले यूनामफलमित्याशङ्क्याह । परिपातीति । स शिशुपालः केवलमित्यवधारणे क्रियाविशेषणम् । शिशूनेव परिपातीति शिशूनेव पालयतीति तन्नामनि तस्य शिशुपालसंज्ञायां मा स्म विश्वसीः मा विश्वासं कुर्वित्यर्थः । श्वसेः स्मोत्तरे लङ् चेति लङि रुदश्च पञ्चभ्य इति ईडागमः । चकाराल्लुङि वा तत्र अस्ति सिचोऽपृक्त इति ईडागमः ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् इति वृद्धिप्रतिषेधः न माङ्योग इत्यडभावस्तद्भवेच्च । किन्तु क्षमी क्षमावान् । शमित्यादित्वादिनिः । शरणे रक्षणे साधुः शरण्यः रक्षणक्षमः । तत्र साधुरिति यत्प्रत्ययः । स शिशुपालः शरणं रक्षितारमागतान् प्राप्तान् । शरणं गृहरक्षित्रोः शरणं रक्षणे गृह इत्युभयत्रापि विश्वः । द्विषः शत्रून् तरुणान् यूनोऽपि रक्षति अतो नितरां शरणमागच्छेत्यर्थः ॥ ५४ ॥

ननु वयं द्रोहकारः सोऽप्यतिक्षुभितः किल कथं नः पालयेदित्याशङ्क्याह । नेति । स्वार्थपराः स्वार्थनिष्ठाः परे शत्रो

हितमप्रियमिच्छसि श्रुतं
यदि सन्धत्स्व पुरा न नश्यसि ।
अन्तरैरथ तुष्यसि प्रियै
र्जयताज्जीव भवावनीश्वरः ॥ ५६ ॥

महतोऽधिकस्य कथं अप्रियं अपकारं अशक्तं यथा तथा न विदध्युः कुर्य्युरेव कार्य्यवशादित्यर्थः । किन्तु उदारधीर्महामतिः । उदारोदात्तमहतोरित्यमरः । स राजा कुपितोऽपि नति मात्रकेण प्रणतिमात्रकेण अनुनीतिं अनुनयं भजते अनुगृह्णीयतीत्यर्थः । प्रणिपातः प्रतीकारः संरम्भोहि महात्मनामिति भावः ॥ ५५ ॥

किं बहुना तवायं हितोपदेशमङ्गीकुर्वित्याशयेनाह । हितमिति । श्रुतं अप्रियं हितमिच्छसि यदि अप्रियं हितं श्रुतमाप्तादाकर्णितं ग्रहीतुमिच्छसि चेदित्यर्थः । सन्धत्स्व राज्ञा सन्धेहि पुरा न नश्यसि अन्यथा विनङ्क्ष्यसीत्यर्थः । यावत्पुरानिपातयोर्लडिति भविष्यदर्थे लट् । अथेति पक्षान्तरे । अन्तरैरसत्यैः प्रियैस्तुष्यसि यदि जयतात् जयतु । तुह्योस्तातङाशिष्यन्यतरस्यामिति तोस्तातङादेशः । जीव अवनीश्वरः सार्व्वभौमोभव । ततः किमेभिः प्रियालापैः अप्रियमपि प्रियमेव गृहाणेति भावः ॥ ५६ ॥

ननु कंसाद्यनेकविजयी कृष्णः कथं विजेष्यते राज्ञेत्याशङ्क्याह । प्रतिपक्षेति । प्रतिपक्षजिदनेकारिहन्तापि भवान् असंशयं संशयो नास्ति । अर्थाभावेऽव्ययीभावः । युधि संग्रामे चैद्येन शिशुपालेन विजेष्यते । जयतः कर्म्मणि लृट् शेषे प्रथमः । समासे

प्रतिपक्षजिदप्यसंशयं
युधि चैद्येन विजेष्यते भवान्।
ग्रसते हि तमोपहम्मुहु-
र्ननु राहुाह्वमहर्पतिं तमः ॥ ५७ ॥
अचिराज्जितमीनकेतनो
विनमन्वृष्णिगणैर्नमस्कृतः।
क्षितिपः क्षयितोद्धतान्धको
हरलीलां स विडम्बयिष्यति ॥ ५८ ॥

ग्रसत इति तमोपहं सर्वतमोपहारिणम्। अपे क्लेशतमसोरिति डप्रत्ययः। अह्नां पतिं अहर्पतिं सूर्यं। अहरादीनां पत्यादिषूपसङ्ख्यानमिति वैकल्पिको रेफादेशः। राह्वाह्नं राह्वाख्यं तमः। आख्याह्वे अभिधानं चेत्यमरः। मुहुर्ग्रसते ननु गिलति हि। अत्र हरिसूर्ययोराहुचैद्ययोश्च वाक्यभेदेन प्रतिबिम्बकरणा दृष्टान्तालङ्कारः ॥ ५७ ॥

किं च न भवानेकएव विजेष्यते किन्तु सर्वैर्यादवैः सहेत्याह। अचिरादिति। स क्षितिपः राजा। अचिरादविलम्बितमेव जितो मीनकेतनः कार्ष्णिः प्रद्युम्नः स्मरश्च येन सः। वृष्णयो यादवभेदास्तेषां गणैर्विधेनमस्कृतो भीत्या प्रणतः सन्। अतएव विनमन् दाम्यमानः। अन्यत्र वृष्णीति पदच्छेदः वृषिणि उक्षणि विलसन् वृषारूढ इत्यर्थः। गणैः प्रमथैर्नमस्कृतः। गणाः प्रमथसङ्ख्योघा इति वैजयन्ती। क्षयिता नाशिता उद्धता दीप्ता अन्धका यादव भेदाः। अन्धकासुरो येन सः। हरलीलां शम्भुविभ्रमं

निहतोन्मदद्दुष्टकुञ्जरा-
द्दधतो भूरियशः क्रमार्ज्जितम्।
न बिभेति रणे हरेरपि
क्षितिपः का गणनास्य वृष्णिषु ॥ ५९ ॥

न तदद्भुतमस्य यन्मुखं
युधि पश्यन्ति भियाद्य शत्रवः।
द्रवतामनु पृष्ठमीक्षते
वदनं सोऽपि न जातु विद्विषाम् ॥ ६० ॥

विडम्बयिष्यत्यनुकरिष्यति । अत्र हरलीलामिति साहृश्याक्षेपा-न्निदर्शना श्लेषसङ्कीर्णा ॥ ५८ ॥

ननु देवासुरैरप्यजय्या यादवाः कथं राज्ञा जेयास्तत्राह। निहतेति । क्षितिपश्चेदिपो निहतउन्मदो दुष्टः कुञ्जरः कुवलया-पीडाख्योयेन तस्मात् । अन्यत्र हतानेकमत्तमातङ्गात्। अतएव क्रमार्ज्जितं भूरि यशः दधतः हरेः कृष्णात् सिंहात् चेति ध्वनिः। रणे न बिभेति । अस्यैतादृशस्यैद्यस्य वृष्णिषु यादवेषु मेषेषु च। वृष्णिस्तु यादवे मेषे इति विश्वः । का गणना कृष्णमगणयतो यादवाः के इत्यर्थः अत्र कुञ्जरघातिनः सिंहस्य का कथा मेषे-ष्वित्यर्थान्तरप्रतीतिध्वनिरेव न श्लेषः हरेर्वृष्णिविशेषस्यापि श्लिष्टत्वा-त्प्रकृताप्रकृतश्लेषे तदनङ्गीकारादित्युक्तं प्राक् ॥ ५९ ॥

हरेरपि न बिभेति इत्युक्तं तदेव समर्थयितुं तस्य पराक्रमाना-मर्थसमाप्तिर्वर्णयति । नेति। युधि शत्रवो भियाऽस्य मुखं न पश्यन्तीति यत्तन्नाद्भुतं अत्र कुतः सोऽपि द्रवतां भयात्पलाय-

प्रतनूल्लसिताचिरद्युतः
शरदम्प्राप्य विखण्डितायुधाः ।
दधतेऽरिभिरस्य तुल्यतां
यदि नासारभृतः पयोभृतः ॥ ६१ ॥

मानानां विद्विषां पृष्ठं कायपार्श्वाङ्गं ईक्षते । जातु कदाचित् वदनं न ईक्षते ननु खलु द्वयोरन्यतरमुखेऽप्यन्योन्यस्य मुख विलोकनामन्तरात्स्वयं विद्विषां अभिमुखस्थाप्यस्य मुखादर्शनाद् द्भुतमित्यर्थः अत एव वाक्यार्थहेतुकङ्काव्यलिङ्गम् ॥ ६० ॥

प्रतन्विति । शरदं ऋतुं प्राप्य विखण्डितायुधाः खण्डितेन्द्रचापाः अन्यत्र शरान् ददातीति शरदस्तं शरदं शर वर्षिणं प्राप्य खण्डितशस्त्राः प्रतनूल्लसिताचिरद्युतोऽल्पस्फुरित विद्युतः अन्यत्र प्रतनूल्लसिताः स्वल्पोल्लसितास्ता एवाचिरद्युतोऽस्थिर द्युतः । पयोभृतो मेघा आसारभृतः वृष्टिमन्तः न यदि शरदि वृष्टिशून्यत्वादिति भावः । सुहृद्बलशून्या इत्यर्थः । आसारः । प्रसर वेगवृष्टौ सुहृद्बलदनि वैजयन्ती । अस्यारिभिस्तुल्यतां दधते । अत्र पयोभृतामुपमानानामुपमेयभावोक्तेः प्रतीपा लङ्कारः तेष्वासारसम्बन्धेऽपि संभावनया तदसम्बन्धोक्तेरतिशयोक्ति भेदश्चेति सङ्करः ॥ ६१ ॥

विशेषकमाह । मलिनमित्यादि । मुकुरवकुलत् । रण रेणुभिर्मलिनं अत एव द्विषतामङ्गनाश्रुभिः क्षालितं नाहत्वारीन् रणान्निवर्त्तत इति भावः । यस्याङ्घ्रियुगं चरणयुगलं । अथ रेणुक्षालितानां नृपाणां प्रणतानां राज्ञां मौलिमरीचयो मकुट

मलिनं रणरेणुभिर्मुहु-
र्द्विषतां क्षालितमङ्गनाश्रुभिः ।
नृपमौलिमरीचिवर्णकैः
खलु यस्याङ्घ्रियुगं विलिप्यते ॥ ६२ ॥
समराय निकामकर्कशं
क्षणमाकृष्टमुपैति यस्य च ।
धनुषा सममाशु विद्विषां
कुलमाकुञ्चितभङ्गमानतिम् ॥ ६३ ॥

मौलिरत्नमयूखैरेव वर्णकैर्विलेपनैश्चन्दनैः । चन्दने चापि वर्णकमिति विश्वः । विलिप्यते विशेष्यते । अत्राङ्घ्रियुगस्य विशेषणमहिम्ना स्नातानुलिप्तपुरुषसाम्यप्रतीतेः समासोक्तिः ॥ ६२ ॥

समरायेति । किञ्चेति चार्थः निकामकर्कशमतिकठिनं दुर्द्धर्षमित्यर्थः समराय सम्प्रहाराय क्षणमाकृष्टमावर्जितं च यस्य धनुः आकुञ्चितभङ्गं मनसा तोलितस्वपराजयं अन्यथातिकर्षात् सम्भावितदलनं यस्य विद्विषां कुलं आशु धनुषा सममानतिं नम्रतामुपैति । अत्र धनुर्नमनकार्यस्य द्विषन्नमनस्य तत्सहभावोक्तेः कार्यकारणयोः पौर्वापर्यविपर्ययनिमित्तरूपातिशयोक्तिमूला सहोक्तिरलङ्कारः ॥ ६३ ॥

तुहिनेति । अमुमेवंविधं चैद्यं सुहृज्जनाः तुहिनांशुं कलयन्ति आह्लादकत्वात् अन्ये मन्यन्ते विरोधिनः उष्णकरं तपनं कलयन्ति । एकस्यानेकप्रतीतिमुपनिमन्त्रते । कृतिभिरिति । कृतिभिः कुशलैरैन्द्रजालिकादिभिः कृतदृष्टिविभ्रमाः जनितदृष्टिविपर्यासा एके

तुहिनांशुममुं सुहृज्जनाः
कलयन्त्युष्णकरं विरोधिनः ।
कृतिभिः कृतदृष्टिविभ्रमाः
स्रजमेके भुजगं यथापरे ॥ ६४ ॥

दधतोऽसुलभक्षयागमा
स्तनुमेकान्तरतामामानुषीम् ।
भुवि सम्प्रति न प्रतिष्ठिताः
सदृशायस्य सुरैररातयः ॥ ६५ ॥

परा: यथा स्रजं मालां कलयन्ति अपरे तु भुजगं कलयन्ति एकमेव रज्ज्वादिकमिति शेषः। उपमालङ्कारः सचैकस्य निमित्त वशाद्गृहीतेनेदन्तादृशानेकधोल्लेखनात्मकेनोल्लेखेन सङ्कीर्यते ॥ ६४ ॥

दधतइति । असुलभक्षयागमाः दुर्लभगृहप्राप्तयः अन्यत्रा मरत्वात् दुर्लभनाशयोगाः । निलयापचयौ क्षयाविव्यमरः । एकान्तरतां भयाद्विजनस्थाने निरतां अमानुषीं कार्श्यमालिन्या दिना पिशाचादिवत्प्रतीयमानां । अन्यत्रैकान्तरतां नियतसुरतां नित्य भोगाममानुषीं दिव्यां तनुं दधतोदधानाः भुवि सम्प्रति कदम न प्रतिष्ठिताः राज्यभ्रंशात् क्वापि स्थितिमप्राप्ताः अन्यत्र च भुवं न स्पृशन्तीत्यर्थः देवत्वात्। अस्यारातयः सुरैः सदृशाः अवाच्यमिति पूर्वेण सम्बन्धः श्लिष्टविशेषणेयमुपमा श्लेषएवेत्यन्ये ॥ ६५ ॥

चतीति । चतिविस्मयनीयकर्मणः अत्यन्तविस्मितपौरुषस्य। आश्चर्योरणीयर्प्रत्ययः । अस्य नृपतेश्चैद्यस्य विरोधि चेष्टितं देवि

अतिविस्मयनीयकर्म्मणो
नृपतेर्यस्य विरोधि किञ्चन।
यदमुक्तनयोनयत्यसा
वहितानाङ्कुलमक्षयङ्क्षयम् ॥ ६६ ॥
चलितोर्द्धकबन्धसम्पदो
मकरव्यूहनिरुद्धवर्त्मनः।
अतरत्स्वभुजौजसा मुहु
र्महतः सङ्गरसागरानसौ ॥ ६७ ॥

रूपं न किञ्चिदस्तीत्यर्थः यस्मादमुक्तनयोऽत्यक्तनीतिमार्गोऽसौ अक्षयमविनाशि पूर्व्वं केनापि क्षयं न नीतमित्यर्थः अहितानां कुलं शत्रुजातं क्षयं नाशं नयति। नीतिपौरुषाभ्यां द्विषन्निर्मूलयितु रस्य का विरोधिवार्त्तेति भावः अक्षयमपि क्षयं नयतीति विरोधस्य नेतृभेदेन परिहाराद्विरोधाभासोऽलङ्कारः ॥ ६६ ॥

चलितेति। असौ चैद्यश्चलिताः प्रवृत्ताऊर्द्धा उत्थिताः कबन्धसम्पदः शिरोहीनकलेवरसम्पद एव कबन्धसम्पदः उदकसमृद्धयो येषु तान्। श्लिष्टरूपकम्। कबन्धं सलिले प्रोक्तमपमूर्द्धकलेवर इति वैजयन्ती। मकरव्यूहाः मकराकारसैन्यविन्यासाः तएव मकरव्यूहाइति श्लिष्टरूपकम्। व्यूहौ समूहविन्यासाविति वैजयन्ती। निरुद्धवर्त्मनोनिरुद्धप्रवेशमार्गान्। अतएव महतोदुस्तरान् सङ्गरसागरान् समरसमुद्रान् स्वभुजौजसा निजभुजबलेनैव मुहु रसकृत् अतरत् भुजेनाब्धितरणमदृष्टचरमत्यद्भुतमिति भावः। च कबन्धाएव कबन्धाः मकरव्यूहाएव कच्छपादिव्यूहादि

न चिकीर्षति यः स्मयोद्धतो
नृपतिस्त्वच्चरणोपगं शिरः ।
चरणं कुरुते गतस्मयः
स्वमसाविव तदीयमूर्द्धनि ॥ ६८ ॥
स्वभुजद्वयकेवलायुध
श्चतुरङ्गामपहाय वाहिनीम् ।
वहुशः सह शक्रदन्तिना
स चतुर्द्दन्तमगच्छदाहवम् ॥ ६९ ॥

श्लिष्टरूपकस्य सङ्करेषु सागररूपणहेतुत्वात्केवलं श्लिष्टपरम्परित रूपकम् ॥ ६७ ॥

नेति । स्मयोद्धतोगर्व्वेण दुर्विनीतोनृपतिः शिरोनिजोत्तमाङ्गं तस्य शिशुपालस्य चरणमुपगच्छतीति तच्चरणोपगन्तत्पादगतं योन चिकीर्षति कर्त्तुमेच्छति तदीये तस्य नृपतेः सम्बन्धिनि मूर्द्धनि गतस्मयोविगर्व्वोऽसौ शिशुपालएव स्वं चरणं कुरुते निधत्त इत्यर्थः अनमान् सद्योनमयति नमानवतीति तात्पर्य्यम् ॥ ६८ ॥

स्वेति । स चैद्यश्चत्वार्य्यङ्गानि हस्त्यादीनि यस्यास्तां चतुरङ्गां वाहिनीं सेनामपहाय स्वभुजद्वयं केवलमेकमायुधं यस्य सः सन् शक्रदन्तिना ऐरावतेन सह । चत्वारोदन्ता यस्मिन् तं चतुर्द्दन्तं आहवं रणं वहुशोऽगच्छत् चतुर्द्दन्तेन शक्रदन्तिना देवेन योद्धुं चैद्यं विना कोऽन्यः शक्तइति भावः दन्तिनोराहवश्चतुर्द्दन्त इत्युक्तं न तु मनुष्यदन्तिनोरिति विरोधः स च शक्रदन्तिनेति परिहृतः तस्य चतुर्द्दन्तत्वादिति विरोधाभासः ॥ ६९ ॥

अविचालितचारुचक्रयो
रनुरागादुपगूढयोः श्रिया ।
युवयोरिदमेव भिद्यते
यदुपेन्द्रस्त्वमतीन्द्र एव सः ॥ ७० ॥

भृतभूतिरहीनभोगभा
ग्विजितानेकपुरोऽपि विद्विषाम् ।
रुचिमिन्दुदले करोत्यजः
परिपूर्णेन्दुरुचिर्महीपतिः ॥ ७१ ॥

अविचालितेति । अविचालितं परैरपर्य्यासितं अतएव चारु शोभनं चक्रं सुदर्शनं राष्ट्रं च ययोस्तयोः । चक्रं राष्ट्ररथाङ्गयो रिति विश्वः। श्रिया कमलया सम्पदा चानुरागादुपगूढयोराश्लिष्टया र्युवयोस्तव तस्य च । त्यदादीनि सर्व्वैर्नित्यमित्येकशेषः । इदमेव भिद्यते विशिष्यते । कर्म्मकर्त्तरि लट् । किं तदित्यत आह । त्वमिन्द्रमुप गत उपेन्द्र इन्द्रानुजः तदनचर इति यावत् । स तु इन्द्रमति क्रान्तः अतीन्द्रः इन्द्रविजयीति यावत् इदमेव भिद्यते इति सम्बन्धः । इन्द्रकिङ्करेन्द्रजयिनोः का साम्यकथेति भावः । अत्रोपमानात् कृष्णादुपमेयस्य चैद्यस्याधिक्याद्भेदप्राधान्यसाधर्म्योक्तेर्व्यतिरेका लङ्कारः ॥ ७० ॥

किञ्च त्वत्तोऽप्यधिको राजेत्यवाच्योयमर्थः यदीश्वरादप्य धिक इत्याह । भृतेति । भृता भूतिर्भस्म सम्पच्च येन स भृतभूतिः । भूतिर्भस्मनि सम्पदीत्यमरः । अहीनां भोगिनामिनोऽहीनः शेषः तस्य भोगं कायं भजतीत्यहीनभोगभाक् शेषभूषण इत्यर्थः ।

नयति द्रुतमुद्धतिश्रितः
प्रसभम्भङ्गमभङ्गुरोदयः ।
गमयत्यवनीतलस्फुर
द्भुजशाखम्भृशमन्यमुन्नतिम् ॥ ७२ ॥

अन्यत्र अहीनमन्यूनं भोगं सुखानुभवं भजतीति अहीन भोगभाक् । भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः । विद्विषां विजितानेकपुरः विजितानेकविद्विट्पुरइत्यर्थः एकत्र त्रिपुरविजयादन्यत्र शत्रुनगरविजयाच्चेति भावः । सापेक्षत्वेऽपि गमकत्वात्समासः । एवम्भूतोऽप्यजोहरः । अजाविष्णुहरच्छागा इत्यमरः । इन्दुदले चन्द्रखण्डे विषये रुचिमभिलाषं करोति इन्दुदले या रुचिः शोभा तां करोति दधातीति चार्थः सामान्यशब्देन विशेषलक्षणा । महीपतिस्तु परिपूर्णेन्दोरुचिरिव रुचिः शोभा यस्य सः तस्मिन् रुचिरभिलाषोयस्येति च परिपूर्णेन्दुरुचिः । रुचिर्मयूखे शोभायामभिषङ्गाभिलाषयोरिति विश्वः । अत्र हरः खण्डेन्दुरुचिः राजा पूर्णेन्दुरुचिरिति व्यतिरेकः स च रुचोर भेदाश्रयादिति शेषमूला भेदातिशयोक्त्या सङ्कीर्णः ॥ ७१ ॥

अथ कलापकमाह । नयतीत्यादि । यः तटद्रुमैः सरिता मुदकस्य पूरइव भूभृतां गणैः क्रीडतीति चतुर्थे वक्ष्यति तत् क्रीडाप्रकारं त्रिभिर्वर्णयति । अभङ्गुरोदयः स्थिरवृद्धिः यत्रद्धति श्रितम्भृत्यभाजः अस्मानिति यावत् । श्रयतेः क्विप् । द्रुपान् द्रुमांश्चेत्यर्थः । द्रुतं शीघ्रं प्रसभं प्रसह्य भङ्गं नयति । अवनीतले स्फुरन्तौ भुजौ शाखे इव भुजशाखे यस्य तं भुजौ प्रसार्य भुवि

अधिगम्य च रन्ध्रमन्तरा
जनयन्मण्डलभेदमन्यतः ।
खनति क्षतसंहति क्षणा-
दपि मूलानि महान्ति कस्यचित् ॥ ७३ ॥
घनपत्त्रभृतोऽनुगामिन-
स्तरसाकृष्य करोति कांश्चन ।
दृढमप्यपरः प्रतिष्ठित-
प्रतिकूलं नितरां निरस्यति ॥ ७४ ॥

प्रणिपतितमित्यर्थः अन्यं नृपं द्रुमं च केशादिकं गृहमनुनति गमयति ॥ ७२ ॥

अधिगम्येति । किञ्चेति चार्थः । अन्तरा मण्डलमध्ये आलवाल मध्ये च रन्ध्रमवकाशं शुषिरं चाधिगम्य । अन्यतः मण्डलस्यामात्यादिपक्षस्य भेदमुपजापं जनयन् अन्यत्र मण्डलस्याधारदेशस्य भेदं विदारणं कुर्वन्नित्यर्थः । क्षता संहतिरैकमत्यं मूलानामामूलानां च यस्मिन् कर्मणि तद्यथा तथा क्षणात्कस्यचिद्राज्ञः द्रुमस्य च महान्ति मूलानि मुख्यान् अमात्यानपि खनति नाशयति अन्यत्राङ्घ्रीनपि खनत्यव दारयति ॥ ७३ ॥

घनेति । घनानि सान्द्राणि पत्त्राणि वाहनानि पर्णानि च बिभर्तीति घनपत्त्रभृतः कांश्चन नृपान् द्रुमांश्च । तरसा बलेन वेगेन च । तरसी बलरंहसी इति विश्वः । आकृष्यानुगामिनोऽनुचरान् करोति । दृढं यथा तथा प्रतिष्ठितं प्रतिष्ठां गतमपि । प्रतिकूलं प्रातिकूल्यभाजं । अपरं नृपं द्रुमं च नितरां

इति पूरुदोदकस्य यः
सरितामावृषिजस्तटद्रुमैः ।
क्वचनापि महानखण्डित
प्रसरः क्रीडति भूभृताङ्गणैः ॥ ७५ ॥
॥ कलापकम् ॥

अनघूपलपङ्क्तिशालिनीः
परितो रुद्धनिरन्तराम्बराः ।
अधिरूढनितम्बभूमयो
न विमुञ्चन्ति चिराय मेखलाः ॥ ७६ ॥

निरस्यति उत्पाट्यान्यतः क्षिपति द्रुमपक्षे प्रतिकूलकूले क्षिपतीति चार्थः ॥ ७४ ॥

इतीति । इतीत्थं क्वचनाप्यखण्डितप्रसरः सर्व्वत्राखण्डितप्रवृत्तिरित्यर्थः । महान् यः शिशुपालः प्रावृषिजातः प्रावृषिजः । सप्तम्यां जनेर्डइति डप्रत्ययः । प्रावृट्शरत्कालदिवाऊइत्यलुक् । प्रावृषिकइति पाठे तत्र जातइत्यर्थे प्रावृषः ठगिति ठक् प्रत्ययः ठस्येकः । सरितामुदकानां पूरस्तटद्रुमैरिव भूभृतां राज्ञां गणैः साधनैः क्रीडति । महतः कुकुरेत्यागामिश्लोके स महीपतिरित्यनेनास्य सम्बन्धः ॥ ७५ ॥

अथ विशेषकमाह । अनघेत्यादि । यस्यारिस्त्रियः सम्पदमनुभूतमापदमनुभवन्तीति वक्ष्यति तत्प्रकारमेवाह । अधिरूढनितम्बभूमयः उन्नतश्रोणिभागाः अनघुभिः उपलानां मणीनां पाषाणानां च पङ्क्तिभिः शालन्तइति तच्छालिनीः । उपलौ मणिपाषाणाविति विश्वः । परितो रुद्धमावृतं निरन्तरं साध्वं

कटकानि भजन्ति चारुभि
र्नवमुक्ताफलभूषणैर्भुजैः ।
नियतन्दधते च चित्रकै
रवियोगम्पृथुगण्डशैलतः ॥ ७७ ॥
इति यस्य ससम्पदः पुरा
यदवापुर्भवनेष्वरिस्त्रियः ।
स्फुटमेव समस्तमापदा
तदिदानीमवनीध्रमूर्द्धसु ॥ ७८ ॥
॥ विशेषकम् ॥

सन्निहितं च अम्बरं वस्त्रमाकाशं च याभिस्ताः अधिरूढनितम्ब भूमीराक्रान्तश्रोणिभागाः प्राप्तकटकाश्चेति । विभक्तिविपरिणामः । मेखलारशनाः पर्व्वतमध्यभूमीश्च चिराय न विमुञ्चन्ति । अत्र सम्पदादिविषयत्वेनोभयेषामपि मेखलादीनां वर्णनीयत्वेन प्रकृतत्वात् केवलप्रकृतगोचरः श्लेषः ॥ ७६ ॥

कटकानीति । किञ्च नवमुक्ताफलानि नूतनमौक्तिकानि भूषणानि येषां तैश्चारुभिः भुजैः कटकानि वलयानि भजन्ति अन्यत्र नवमुक्तान्यचिरत्यक्तानि अतः अफलानि वैधव्यान्निष्फलानि आभरणानि यैस्तैर्भुजैरुपलक्षिताः कटकानि तटानि भजन्ति । किञ्चेति चार्थः पृथुगण्डशैलतः पृथुगण्डस्थलेषु चित्रकैः पत्त्र रचनाभिर्नियतमवियोगं सम्पर्कं दधते अन्यत्र च्युतस्थूलोपलेषु चित्रकैर्मृगविशेषैस्सहवासं दधते । अत्रापि प्रकृतगोचरः श्लेषः॥७७॥

इतीति । यस्यारिस्त्रियः पुरा पूर्व्वं ससम्पदः सश्रीकाः भवनेषु सदनेषु यदवापुर्मेखलादिकमनुबभूवुः । समस्तमशेषं तदिदानी

महतः कुकुरान्धकद्रुमा
नतिमात्रन्दववद्दहन्नपि ।
अतिचित्रमिदम्महीपति
र्यदकृष्णाम्पृथिवीङ्करिष्यति ॥ ७९ ॥
परितः प्रमिताक्षरापि सर्व्वं
विषयम्प्राप्तवती गता प्रतिष्ठाम् ।
न खलु प्रतिहन्यते कुतश्चि
त्परिभाषेव गरीयसी यदाज्ञा ॥ ८० ॥

मापद। अश्मनीभमूर्द्धसु शैलशृङ्गेषु इतीत्थं स्फुटमेवावापुः न त्वस्य वैरिणां जीवितानीति भावः । अत्रापि यदर्थस्योत्तरश्लोके नान्वयः ॥ ७८ ॥

महतइति । यत्तदोर्नित्यसम्बन्धात् । स महीपतिर्महतोऽधिकान् कुकुरांश्चान्धकांश्च यादवभेदांस्तानेव द्रुमानतिमात्रं दववत् दवाग्निवत् । दवदावौ वनारण्यवह्नी इत्यमरः । दहन्नपि अश्मनीमकृष्णामश्यामां करिष्यति इति यत् इदमतिचित्रं विरुद्धमित्यर्थः कृष्णरहितामित्यविरोधः अतएव विरोधाभासोऽलङ्कारः कुकुरान्धकैः सह कृष्णं हनिष्यतीति शेषार्थः ॥ ७९ ॥

अथ युग्मेनाह । परितइति । प्रकर्षेण मिताक्षरापि एकत्र मितभाषितत्वादन्यत्र तु सूत्रलाघवात्स्वल्पाक्षरापि सर्व्वं विषयं राष्ट्रं कार्य्यं देशञ्च परितो व्याप्तवती सर्व्वत्र प्रवृत्तेत्यर्थः । प्रतिष्ठां प्रामाण्यं स्थितिं गता गरीयसी भूयिष्ठार्था यदाज्ञा यस्य राज्ञः शासनं परिभाषा अनियमनिवारकोन्यायविशेषः सेव कुतश्चित

यामूढवानूढवराहमूर्त्ति
र्मुहूर्त्तमादौ पुरुषः पुराणः ।
तेनोह्यते साम्प्रतमक्षतैव
क्षतारिणा सम्यगसौ पुनर्भूः ॥ ८१ ॥

कुत्रापि न प्रतिहन्यते खलु न बाध्यते हि । परिभाषा च तर्ब्बैकदेशे स्थिता सर्व्वशास्त्रमभिज्वलयतीति भाष्यकारः । इकोगुणवृद्धी इत्यादिका परिभाषा इकोवृद्धिरित्यादिविषयः । उपमालङ्कारः । औपच्छन्दसिकं वृत्तम् ॥ ८० ॥

यामिति । यां भुवमादौ पूर्व्वं पुराणपुरुषो विष्णुः ऊढवराहमूर्त्तिः धृतवराहशरीरः स च नतु स्वरूपेणेति भावः । मुहूर्त्तं क्षणमात्रं ऊढवान् धृतवान् । क्षतारिणा संहृतसकलविक्षेपेण अतएवैनां पुनस्तेन राज्ञा अविक्षतेनेति भावः । अक्षतैव विपक्षैरनुपद्रुतैव असौ भूः साम्प्रतमद्यापि न तु मुहूर्त्तमिति भावः । सम्यक् यथाशास्त्रमुह्यते धार्य्यते । वहेः कर्म्मणि लट् वचिस्वपीत्यादिना सम्प्रसारणम् । अत्र राज्ञोविष्णोराधिक्यकथनाद्व्यतिरेकः । अत्र ध्वनिः कश्चिद्वृद्धः स चाऊढवराहमूर्त्तिर्यामविक्षतामादौ प्रथमं मुहूर्त्तमूढवान् परिणीतवानिति अतएव अक्षतापूर्व्वेण अक्षतयोनिका । अतएवासौ भूर्म्मोढुः । क्षतारिणा शौर्य्यादिगुणाढ्येनत्यर्थः तेन केनचिद्यूना साम्प्रतं पुनरुह्यते पुनः पुनः परिणीयते । सा चेदक्षतयोनिः स्यात्पुनः संस्कारमर्हतीति स्मरणादिति भावः । सा पुनर्भूरुच्यते इति बोध्यम् । पुनर्भू

भूयांसः क्वचिदपि काममस्खलन्त
स्तुङ्गत्वन्दधति च यद्यपि द्वयेऽपि ।
कल्लोलाः सलिलनिधेरवाप्यपारं
शीर्य्यन्ते न गुणमहोर्म्मयस्तदीयाः ॥८२॥

दिधिषूरूढा द्विस्तस्यादिधिषुः पतिरित्यमरः । अत्राभिधायाः प्रकृतार्थएव नियन्त्रणादप्रकृतार्थप्रतीतिर्ध्वनिरेव ॥ ८१ ॥

भूयांसइति । द्वयेऽपि समुद्रोर्म्मयोगुणोर्म्मयश्चेति द्वितया अप्यूर्मयइति । द्वेस्तयप् तस्य द्वित्रिभ्यामित्यनेन अयजादेशः प्रथमचरमेत्यादिना जसि विभाषया सर्व्वनामसंज्ञा । भूयांसोवडू नराः क्वचिदप्यस्खलन्तोऽप्रतिहतप्रसराइत्यर्थः । कामं तुङ्गत्वं दधति यद्यपि दधत्येव । यद्यपीत्यवधारणे इति केशवः । तथापीति शेषः । सलिलनिधेः समुद्रस्य कल्लोलामहोर्म्मयः । अथोर्म्मिषु महत्सूल्लोलकल्लोलावित्यमरः । पारं तीरमवाप्य शीर्य्यन्ते विलीयन्ते । शीर्य्यतेर्दैवादिकात्कर्त्तरि लट् । तदीयागुणमहोर्म्मयस्तु पार मवाप्य न शीर्य्यन्ते अत्र गुणमहोर्म्मीणां भूयस्त्वादिति साधर्म्येण गुरुत्वेन समुद्रस्याधिक्याद्व्यतिरेकः अनेन राज्ञोऽपि समुद्राधिक्यं व्यज्यते । प्रहर्षिणी वृत्तम् ॥ ८२ ॥

अथ युग्मेनाह । लोकालोकेत्यादि । लोक्यते आलोक्यते च पार्श्वान्तरेणेति लोकालोकः । लोकालोकश्चक्रवालइत्यमरः । विशेषणसमासः । तेन व्यावृतं निरुद्धप्रसारं लोकस्यालोकेन चक्षुः प्रकाशेन व्यावृतमित्यपि स्फुरति । अतएव शालीनमधृष्टतया लज्जया मग्नं धार्ष्ट्यमित्यर्थः । शालीनकोपिने अधृष्टाकार्य्ययो

लोकालोकव्याहतङ्घर्म्मरश्मेः
शालीनं वा धाम नालम्प्रसर्त्तुम् ।
लोकस्याग्रे पश्यतो धृष्टमाशु
क्रामत्युच्चैर्भूभृतो यस्य तेजः ॥ ८३ ॥

विच्छित्तिर्नवचन्दनेन वपुषो भिन्नोऽधरोऽलक्तकै
रच्छाच्छे पतिताञ्जने च नयने श्रोण्योऽलसन्मेखलाः ।
प्राप्तिर्मौक्तिकहारमुन्नतकुचाभोगस्तदीयद्विषा
मित्थन्नित्यविभूषणा युवतयः सम्पत्सु चापत्स्वपि ॥ ८४ ॥

रिति निपातः । इवार्थे वाशब्दः तद्दुत्प्रेक्षा । घर्मरश्मेर्धाम तेजः पश्यतो लोकस्याग्रे उच्चैर्भूभृतः पर्वतान् राज्ञश्च प्रसर्त्तुं व्याप्तुं नालं न समर्थं । लोकालोकव्याहतस्य लोकाग्रे सञ्चरत्वादित्यर्थः । यस्य राज्ञस्तु तेजः पश्यतो लोकस्याग्रत एव धृष्टं केनाप्यव्याहतत्वा त्प्रगल्भं सत् उच्चैर्भूभृतो राज्ञः पर्व्वतांश्च क्रामति व्याप्नोति । अत्रा प्रतिहतप्रतापत्वेन राज्ञः सूर्य्यादाधिक्याद्व्यतिरेकः स च इवा लोकालोकयोर्द्वयानां भूभृतां अभेदाध्यवसायात् श्लेषमूलाति शयोक्त्युत्थापितया शालीनत्वोत्प्रेक्षया सङ्कीर्य्यते । शालिनी छन्दः तत् ॥ ८३ ॥

विच्छित्तिरिति । वपुषो नवचन्दनेन विच्छित्तिर्वियोगश्चापरि अन्यत्र चन्दनालेपनमिति यावत् । अधरोष्ठः अलक्तकैः लाक्षारागै र्भिन्नो वियुक्तः अन्यत्र युक्तः । नयने च पतिताञ्जने गलितकज्जले अत एव अच्छाच्छे अच्छप्रकारे । प्रकारे गुणवचनस्येति द्विर्भावः कर्म्म धारयवद्भावेति सुपोलुक् । अन्यत्र अच्छाच्छे नयने पतिताञ्जने प्राप्ता

विनिहत्य भवन्तमूर्जितश्री
र्युधि सद्यः शिशुपालतां यथार्थाम्।
रुदतामवदङ्गनागणानां
करुणान्तःकरणः करिष्यतेऽसौ ॥ ८५ ॥
इति श्रीमाघकृते शिशुपालवधे
महाकाव्ये षोडशः सर्गः ॥ १६ ॥

ष्काने। श्रोणीनितम्बाः लसन्मेखलान भवन्तीत्यलसन्मेखलानिम्नखल। इत्यर्थः। अन्यत्र लसन्मेखला इति पदच्छेदः। उन्नतः कुचाभोगः कुच विस्तारो मौक्तिकानां हारं हरणं प्राप्तः। अन्यत्र मुक्तादाम प्राप्तः। इत्यमुकरीत्या नदीयद्विषां युवतयः सम्प्रत्तु चापत्स्वपि नित्य विभूषणाः। अत्रापत्सम्पदोः प्रकृताप्रकृतयोः युवतिविशेषणद्वारा वर्णनात् श्लेषः। शार्दूलविक्रीडितं वृत्तं लक्षणमुक्तम् ॥ ८४ ॥

सत्यमीदृशस्ते राजा ततः किमित्याशङ्क्य तर्हि तत्त्वमाकर्णये त्याह। विनिहत्येति। ऊर्जितश्रीरधिकैश्वर्योऽसौ राजा युधि भवन्तं सद्योविनिहत्य हत्वा रुदतां क्रन्दतां भवदङ्गनागणानां करुणान्तःकरणः कृपाविष्टचित्तः सन् शिशुपालतां यथार्थां करिष्यते अङ्गनागणान् प्रति तच्छिशुपालनेन निजां शिशुपाल संज्ञां सम्बर्द्धां करिष्यतीत्यर्थः। अत्र रोदनकरुणापदार्थयोर्विशेषण गत्या क्रमात् करुणाशिशुपालनहेतुकत्वात्काव्यलिङ्गयोः सङ्करः। औपच्छन्दसिकं वृत्तम् ॥ ८५ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ काव्यव्याख्याने सर्वङ्कषाख्ये षोडशः सर्गः ॥ १६ ॥

इतीरिते वचसि वचस्विनाऽमुना
युगान्तयक्षुभितमरुद्गरीयसि ।
प्रचुक्षुभे सपदि तदम्बुराशिना
समम्महाप्रलयसमुद्यतं सदः ॥ १ ॥

सरागया स्रुतघनघर्म्मतोयया
कराहतिध्वनितपृथूरुपीठया ।
मुहुर्मुहुर्दशनविखण्डितोष्ठया
रुषा नृपाः प्रियतमयेव भेजिरे ॥ २ ॥

इतीति । इतीत्थं अमुना वचस्विना वाग्मिना । मनस्विनेति पाठे मनस्विना धीरेण दूतेन युगान्ते कल्पान्ते क्षुभित उद्धूतोमरुत्तद्वद्गरीयसि वचसि ईरिते सति । तदम्बुराशिना युगान्तवर्द्धिना समं तुल्यं यथा तथा सदो हरेरास्थानं महाप्रलये सर्व्वसंहारे समुद्यतमुद्युक्तं मत सपदि प्रचुक्षुभे प्रचुकोप । कल्पो द्धूतमहामारुतेन महार्णवइव तद्वचनेन तत्सदः क्षुभितमासी दित्यर्थः। उपमा। रुचिरा वृत्तम्। चतुर्ग्रहैरिह रुचिरा जभ स्जगाइति लक्षणात् ॥ १ ॥

अथाष्टादशभिः सभाक्षोभं वर्णयति। सरागयेत्यादि। नृपाः राजानः सह रागेण पाटलिम्ना अनुरागेण च सरागया। तेन सहेति तुल्ययोगे बहुव्रीहिः । स्रुतं घनं सान्द्रं घर्मतोयं स्वेदो दकं यस्यां सा तया कराहत्या पाणितलास्फालनेन ध्वनितं पृथु महदूरुः पीठमिव ऊरुपीठं यस्यां तया मुहुर्मुहुर्दशनविखण्डितो ष्ठया दन्तदष्टाधरया। रुषा प्रियतमयेव भेजिरे। आश्लिष्टाऽना

अलक्ष्यत क्षणदलिताङ्गदे गदे
करोदरप्रहितनिजांसधामनि ।
समुल्लसच्छकलितपाटलोपल
स्फुलिङ्गवान् स्फुटमिव कोपपावकः ॥३॥
अवज्ञया यदहसदुच्चकैर्बल
स्समुल्लसद्दशनमयूखमण्डलः ।
रुषारुणीकृतमपि तेन तत्क्षणा
न्निजं वपुः पुनरनयन्निजां रुचिम् ॥ ४ ॥

विष्टस्य रौद्रस्थायी क्रोधः प्रादुर्भूत इत्यर्थः । उपमालङ्कारः ॥ २ ॥

अथ सप्तदशभिः राज्ञां क्रोधानुभावानाह । अलक्ष्यतेत्यादि । करोदरप्रहितं पाणितलास्फालितं निजमंसधाम स्वांसप्रदेशो येन तस्मिन् । अतएव क्षणात् दलिताङ्गदे भग्नकेयूरे । गदे गदाख्ये कृष्णानुजे समुल्लसद्भिरुत्पतद्भिः शकलितैः शकलीकृतैर्दलद्भिर्गलितैः पाटलोपलैः पद्मरागैः कोपपावकः स्फुलिङ्गवानिव स्फुटं व्यक्तमलक्ष्यतेत्युत्प्रेक्षा । त्रिषु स्फुलिङ्गोऽग्निकण इत्यमरः ॥ ३ ॥

अवज्ञयेति । बलो बलभद्रः समुल्लसत् समन्ततः प्रसरद्दशनमयूखमण्डलं दन्तरश्मिपटलं यस्य स सन् अवज्ञया अनादरेण उच्चैः अहसदिति यत् तेन हासेन रुषारुणीकृतमपि निजं वपुः तत्क्षणं तस्मिन् क्षणे । अत्यन्तसंयोगे द्वितीया । पुनर्निजां रुचिं धावल्यमेवानयत् । अत्र वपुषः स्वधावल्यत्यागेन दन्तधावल्य

यदुत्पतत्पृथुतरहारमण्डलं
व्यवर्त्तत द्रुतमभिदूतमुल्मुकः ।
बृहच्छिलातलकठिनांसघट्टित
मततोऽभवद्भ्रमितमिवाखिलं सदः ॥ ५ ॥
प्रकुप्यतः श्वसनसमीरणाहति
स्फुटोष्मभिस्तनुवसनान्तमारुतैः ।
युधाजितः कृतपरितूर्णवीजन
मनस्तरां वदनसरोजमस्विदत् ॥ ६ ॥

स्वीकारात् तद्गुणालङ्कारः । तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाश्रयादिति लक्षणात् ॥ ४ ॥

यदिति । उल्मुको नाम राजा उत्पतदुल्लुठत् पृथुतरं हारमण्डलं मुक्ताकलापो यस्मिन् कर्मणि तद्यथा तथा अभिदूतं द्रुताभिमुखं व्यवर्त्तत विद्रुतवानिति द्रुतं यत् ततो विवर्त्तनादखिलं सदः बृहच्छिलातलकठिनांसेन स्कन्धेन घट्टितं भ्रमितमिवाभवत् । विवर्त्तवेगवैशात्यादंसघट्टनाद्भ्रमितमिवाभूदित्युत्प्रेक्षा ॥ ५ ॥

प्रकुप्यत इति । प्रकुप्यतोऽतिकुप्यतो युधाजितो नाम राज्ञो वदनसरोजं श्वसनसमीरणस्य निश्वासमारुतस्याहतिभिः स्फुटः प्रकटः ऊष्मा उष्णत्वं येषां तैः तनुवसनान्तमारुतैः सूक्ष्मवस्त्राञ्चलवातैः कृतं परितूर्णवीजनं शीघ्रविधूननं यस्य तत् अतिशीघ्रं वीज्यमानमपीत्यर्थः पुनस्तरां पुनरत्यन्तं । अव्ययादामुप्रत्ययः । अस्विदत् स्विद्यति स्म । स्विदेर्लुङि पुषादित्वादङ्प्रत्ययः । अत्रोपविशेषण

प्रजापतिक्रतुनिधनार्थमुत्थितं
व्यतर्कयज्ज्वरमिव रौद्रमुद्धतम्।
समुद्यतं सपदि बधाय विद्विषा
मतिक्रुधन्निषधमनौषधञ्जनः ॥ ७ ॥
परस्परम्परिकुपितस्य पिंषतः
क्षतोर्म्मिकाकनकपरागपङ्किलम्।
करद्वयं सपदि सुधन्वनोनिजै
रनारतस्रुतिभिरधाव्यताम्बुभिः ॥ ८ ॥

गत्या खेदहेतुत्वात्काव्यलिङ्गं वीजनेऽपि खेदइति विरोधः। वीजिरयं चुरादिषु अन्वेषणीयः ॥ ६ ॥

प्रजेति। जनः सपदि विद्विषां बधाय समुद्यतमुद्युक्तं उद्धतं तीव्रं अतएवातिक्रुधमधिकक्रोधमनौषधमप्रतीकारमित्यर्थः निषधं निषधाख्यं नृपं प्रजापतिक्रतुनिधनार्थं दक्षाध्वरध्वंसनार्थमुत्थितं रुद्रस्येमं रौद्रं रुद्रसम्बन्धिनं ज्वरमिव वीरभद्ररूपिणमित्यर्थः व्यतर्कयत्। अत्र राज्ञोऽपि प्रजापतित्वात् पुनः प्रजापतिक्रतुनिधनार्थमुत्थितः साक्षाद्दक्षाध्वरविध्वंसी वीरभद्रएवायमिति उत्प्रेक्षितवानित्यर्थः। उपमा ॥ ७ ॥

परस्परमिति। परिकुपितस्यातिक्रुद्धस्य अतएव परस्परं पिंषतः पीडयतः करद्वयमित्यर्थः सपदि सुधन्वनोराज्ञः क्षतानां पिष्टानामूर्म्मिकाणामङ्गुलीयकानां कनकपरागेण सुवर्णचूर्णेन पङ्किलं पङ्कवत्। पिच्छादित्वान्मत्वर्थीयइलचप्रत्ययः। अङ्गुलीयकमूर्म्मिकेत्यमरः। करद्वयं पाणियुग्मं निजैः करद्वयजन्यैरेवा

निरायतामनलशिखोज्ज्वलां ज्वल
न्नखप्रभाकृतपरिवेषसम्पदम्।
अबिभ्रमद्भ्रमदनलोल्मुकाकृति
प्रदेशिनीं जगदिव दग्धुमाहुकिः ॥९॥
दुरीहतामभजत मन्मथस्तथा
यथा पुरा परिचितदाहधार्ष्ट्यया।
ध्रुवम्पुनः सस्मरमपुष्पतीयया
हरोऽपि न व्यसहत वीक्षितुन्दृशा ॥१०॥

नारतस्तुतिभिरविरतस्रावैरम्भि: स्वेदोदकैरधाव्यताधाव्यत। धावु गतिशुद्ध्योरिति धातोः कर्मणि लङ्। अङ्गुलीनामिकाणां करद्वयस्य च परागतपङ्क्तिलतासमन्वेऽपि समन्वोऽकैरतिशयोक्तो तयो. सङ्करः ॥ ८ ॥

निरिति। आहुकिर्नाम राजा निरायतां प्रसारितां अनलशिखा शिखाशा तद्वत् उज्ज्वलां ज्वलन्तीभिर्नखप्रभाभिः कृता परिवेष सम्पत् परिधिशोभा यस्यास्तां अतएव भ्रमतोऽनलोल्मुकस्याला तस्येवाकृतिः संस्थानं यस्यास्तां। अलातोऽस्मातमुल्मुकमित्यमरः। प्रदेशिनीं जगद्दग्धुमिवेत्युत्प्रेक्षा। अबिभ्रमत् भ्रमयति स्म। भ्रमेर्णौ चङ्। दूतमन्तर्भावाय भ्राम्यमाणनखप्रभापटला तर्जनी जगद्दाहाय भ्राम्यमाणालातचक्रवद्लक्ष्यतेत्यर्थः ॥ ९ ॥

दुरीह्यतामिति। मन्मथः प्रद्युम्नावतारः कामस्तथा दुरीहतां दुर्दर्शनत्वं। ईहतेः खलन्तात्तल्प्रत्ययः। अभजत यथा हरोऽपि पुरा पूर्वजन्मनि परिचितमभ्यस्तं दाहधार्ष्ट्यं दहनधाष्ट्यं यस्या

विचिन्तयन्नुपनतमाहवं रसा-
दुरः स्फुरत्तनुरुहमग्रपाणिना ।
परामृशत्कठिनकठोरकामिनी-
कुचस्थलप्रमुषितचन्दनं पृथुः ॥ ११ ॥

त्वया तृतीयया दृशा । समरसमं सम्मथं भुवं पुनर्वीक्षितुं न व्यवहृत न शक्तः । परिनिविभ्यः सेवसितसयसिवुसहस्तुटस्तुस्वञ्जां सिवादीनां वाड्व्यवायेऽपि इति विकल्पात्त षत्वं । अजय्यो त्रिनेत्रायां रुद्रस्यापि भीषणः किमुतान्येषामिति वस्तु व्यज्यते ॥ १० ॥

विचिन्तयन्निति । पृथुर्नाम राजा उपनतं प्राप्तं आहवं युद्धं रसादनुरागात् विचिन्तयन् कदेति ध्यायन् कठिनेन कर्कशेन कठोरेण प्रवृद्धेन कामिन्याः कुचस्थलेन प्रमुषितमपहृतं चन्दनं यस्य तत् । एतेनास्य सुरतसमरयोः समरसत्व व्यज्यते । अतएव स्फुरत्तनुरुहमुद्गतपुलकमुरः अग्रश्चासौ पाणिश्चेति । समानाधिकरणसमासः । अतएव हस्ताद्याद्यहस्ताद्ययोर्गुणगुणिनोर्भेदाभेदयोरिति वामनः । तेनाग्रपाणिना पाणितलेन परामृशत् परामृशत् । रणकण्डूलपाणित्वादिति भावः । अतएव त्यदन्येषां रोषजनकं दूतवाक्यं तदागामिरणकारणतयास्य हर्षे हेतुरिति भावार्थः ॥ ११ ॥

विलङ्घितेति । गुरुं स्वभावतोऽधीरमपि सन्तं रूक्षया परुषया रिपोर्गिरा दूतवाचा विलङ्घितस्थितिमुल्लङ्घितमर्यादं क्रोधादुन्मर्यादं विकुर्वाणमित्यर्थः गान्दिनीसुतमक्रूरमभिवीक्ष्य जनैस्तदा अक्रूरविक्रियालोकनसमये युगपरिवर्तवायुभिः कल्पान्तवाते

विलङ्घितस्थितिमभिवीक्ष्य रुक्षया
रिपोर्गिरा गुरुमपि गान्दिनीसुतम् ।
जनैस्तदा युगपरिवर्त्तवायुभि
र्विवर्त्तिता गिरिपतयः प्रतीयिरे ॥ १२ ॥

विवर्त्तयन्मदकलुषीकृते दृशौ
कराहतक्षितिकृतभैरवारवः ।
क्रुधा दधत्तनुमतिलोहिनीमभू
त्प्रसेनजिद्गज इव गैरिकारुणः ॥ १३ ॥

विवर्त्तिताः स्थानाद्‌चालिताः गिरिपतयोऽद्रयः प्रतीयिरे विश्वस्य मिरे । अक्रूरविक्रियादर्शनाद्गिरिचलनमपि युगान्ते संभावित मेवेति जनैर्विश्वस्तमित्यर्थः । प्रत्ययोऽधीनशपथज्ञानविश्वास हेतुष्वित्यमरः । प्रतिपूर्वादिणः कर्मणि लिट् । अत्र कल्पान्ते गिरिचलनविक्रियाकल्पनमकरविक्रियेति वाक्यभेदेन सादृश्याक्षेपा न्निदर्शनालङ्कारः । तेनाक्रूरस्य लोकोत्तरं धैर्यं नैसर्गिकमिति वस्तु व्यज्यत ॥ १२ ॥

विवर्त्तयन्निति । मदो मद्यविकारो दानं च । मदो मद्यभदा नयोरिति विश्वः । तेन कलुषीकृते आकुलीकृते दृशौ विवर्त्तयन् घूर्णयन् करेण पाणिना शुण्डादण्डेन चाहतायां क्षितौ भूमौ कृतो भैरवारवो भयङ्करध्वनिर्येन सः क्रोधात्तस्थानं करेण क्षिति माघ्नन्नित्यर्थः । क्रुधा क्रोधेन अतिलोहिनीमतिलोहिताम् । वर्णा दनुदात्तात्तोपधात्तो न इति विकल्पात् ङीष् तकारस्य च नकारः ।

सकुङ्कुमैरविरलमम्बुबिन्दुभि
र्गवेषणः परिणतदाडिमारुणैः ।
स मत्सरस्फुटितवपुर्विनिःसृतै
र्बभौ चिरन्निचितइवासृजां लवैः ॥ १४ ॥
ससम्भ्रमस्वरणतलाभिताडन
स्फुटन्मही विवरवितीर्णवर्त्मभिः ।
रवेः करैरनुचितनापितोरग
म्प्रकाशतां शिनिरनयद्रसातलम् ॥ १५ ॥

मनुं वपुर्दधत् प्रसेनजिन्नाम राजा गैरिकारुणोधातुरक्तोगजइवा भूत् तद्वदलक्ष्यतेत्यर्थः ॥ १३ ॥

सकुङ्कुमैरिति । स प्रसिद्धोगवेषणोनाम राजा सकुङ्कुमैः सम्वाकुङ्कुमकश्मीरजलैपैरित्यर्थः । अतएव परिणतदाडिमारुणैः परिपक्वदाडिमबीजरक्तैरम्बुबिन्दुभिः क्रोधसात्विकैः स्वेदबिन्दु भिरित्यर्थः । मत्सरेणान्तःसंदृप्तेनात्युत्कटवैरेण स्फुटिताम्नि भिन्नात् वपुषोविनिःसृतैरसृजां लवैरसृग्बिन्दुभिरविरलमिर न्तरं निचितोव्याप्तइव चिरं बभौ । उत्प्रेक्षा ॥ १४ ॥

ससम्भ्रममिति । शिनिः सात्यकेः पितामहः ससम्भ्रमं सत्वरं चरणतलाभिताडनेन पादतलाभिघातेन स्फुटन्त्यादलन्त्यामह्या विवरैः छिद्रैः वितीर्णवर्त्मभिर्दत्तमार्गैः सात्वरणैरित्यर्थः । रवेः करैः अनुचितं पूर्वमपरिचितमिदं यथा तथा तापिताः सन्तापं गमिता उरगायस्मिन् तत् रसातलं प्रकाशतां प्रकटत्व मनयत् । अत्र महीरविकरोरगरसातलानां क्रमेण स्फुटनान्त

प्रतिक्षणं विधुवति शारणे शिरः
शिखिद्युतः कनककिरीटरश्मयः ।
अशङ्कितं युधमधुना विशन्त्वमी
क्षमापतीनिति निरराजयन्निव ॥ १६ ॥
दधौ चलत्पृथुरसनं विवक्षया
विदारितं विततबृहद्भुजालतः ।
विदूरथः प्रतिभयमास्यकन्दरं
ज्वलत्फणाधरमिव कोटरं तरुः ॥ १७ ॥

प्रवेशतापप्रकाशैरसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः पादाघातै रमानुषीं तीव्रतां व्रजति क्रोधेति ध्वनिः ॥ १५ ॥

प्रतीति । शारणे नाम राज्ञि प्रतिक्षणं शिरो विधुवति क्रोधात्कम्पयति सति । धूञ्स्वौदादिकात् लटः शत्रादेशः अचि श्नुधात्वित्यादिना उवङादेशः । शिखिवत् द्योतन्त इति शिखिद्युतोऽग्निप्रभाः । क्विप् । कनककिरीटरश्मयो नीराजनकर्त्तारः अमी भूपाः अधुना अशङ्कितं निःशङ्कं युधमाजिं । युधमित्याजिषमिद्युध इत्यमरः । विशन्त्विति क्षमापतीन्निरराजयन्निव नीराजन्ति स्मेवेत्युत्प्रेक्षा । नीराजना स्याद्विजय इत्यागमः ॥ १६ ॥

दधाविति । वितते विस्तृते बृहत्यौ भुजे लते इव यस्य स विदूरथो नाम राजा । विवक्षया किमपि वक्तुमिच्छया विदारितं व्यात्तं अतएव चलन्ती पृथुर्महती रसना जिह्वा यस्मिन् तं । रसज्ञा रसना जिह्वेत्यमरः । प्रतिभयं भयङ्करमास्यं कन्दरमिवास्यकन्दरं । दरी तु कन्दरो वा स्त्रीत्यमरः ।

समाकुले सदसि तथापि विक्रिया
मनोऽगमन्न मुरभिदः परोदितैः ।
घनाम्बुभिर्बहुलितनिम्नगाजलै-
र्जलं न हि व्रजति विकारमम्बुधेः ॥ १८ ॥
पराननी यदपवदन्त आत्मनः
स्तुवन्ति च स्थितिरसतामसाविति ।
निनाय नो विकृतिमविस्मितः स्मित-
स्मुखं शरच्छशधरमुग्धमुद्धवः ॥ १९ ॥

चलन्फणाधरः फणी यस्मिन् तत् कोटरमिव । निष्कुहः कोटरं वा नेत्यमरः । द्वयौ । आर्ती पूर्णोपमा ॥ १७ ॥

समाकुल इति । परोदितैः अन्यवाक्यैः सदसि आस्थाने तथा समाकुले क्षुभितेऽपि मुरभिदो हरेर्मनो विक्रियां क्षोभं नागमत् । तथा हि बहुलितानि बहुलीकृतानि क्षोभितानि निम्नगाजलानि यैस्तैर्घनाम्बुभिः मेघोदकैरम्बुधेर्जलं विकारं न व्रजति । यथा वर्षोदकैर्नद्यः क्षुभ्यन्ति न समुद्रस्तद्वदिति भावः । दृष्टान्तालङ्कारः ॥ १८ ॥

परानिति । अमी खलाः परानन्यानपवदन्त निन्दन्ति । अपाद्वदरत्यात्मनेपदम् । आत्मनः स्वानि स्तुवन्ति चेति यत असावयमसतां खलानां स्थितिः प्रकृतिरिति इति मत्वेत्यर्थः । गम्यमानार्थत्वादप्रयोगः अन्यथा पौनरुक्त्यमित्यालङ्कारिकाः । विस्मितो न भवतीति अविस्मितो दूतप्रलापैर्विस्मयं न गतः उद्धवः स्मितं

निराकृते यदुभिरिति प्रकोपिभिः
स्पशे शनैर्गतवति तत्र विद्विषां ।
मुरद्विषः स्वनितभयानकानकं
बलं क्षणादथ समनह्यदाजये ॥ २० ॥
मुहुः प्रतिस्खलितपरायुधायुधि
स्थवीयसीरचलनितम्बनिर्भराः ।
अदंशयन्नरचितशौर्यदंशना
स्तनूरयन्नयइति वृष्णिभूभृतः ॥ २१ ॥

स्मेरं । उभयत्र कर्त्तरि क्तः । अतएव शरच्छशधरमुग्धं शरदिन्दु सुन्दरमित्युपमा । मुखं विकृतिं न निनाय न प्रापयामास । न हि महतां निन्दा स्तुतिर्वा विकारकारणमिति भावः ॥ १९ ॥

निराकृतइति । तत्र सदसि इतीत्थं प्रकोपिभिरतिक्रुद्धैर्यदुभिः विद्विषां स्पशे चरे । अपसर्पश्चरः स्पशश्चेत्यमरः । निराकृते धिक्कृते शनैर्गतवति गच्छति सति । सागसोऽपि दूतस्यावध्यत्वादिति भावः । अथ दूतगमनानन्तरं स्वनितेन ध्वनिना भयानकाः भयङ्कराः आनकाः पटहा यस्मिन् तत् मुरद्विषो बलं क्षणादाजये युद्धाय समनह्यत्, सन्नद्धम् ॥ २० ॥

मुहुरिति । वृष्णिभूभृतो यादवनरेन्द्राः मुहुरसकृद्युधि प्रतिस्खलितपरायुधाः भग्नप्रतिपक्षायुधाः स्थवीयसीः स्थूलतराः पराक्रमानुरूपप्रकर्षवतीरित्यर्थः । स्थूलदूरेत्यादिना पूर्वस्य गुणलोपौ । अचलनितम्बनिर्भराः अद्रिकटकनिबिडाः अतःसारवतीरित्यर्थः । अरचितमव्यक्तं शौर्यमेव दंशनं दर्शं यासां तास्तनूर्देहान्

दुरुद्वहाः क्षणमपरैस्तदन्तरे
रणाश्रवादुपचयमाशु बिभ्रति ।
महीभुजाम्महिमभृतान्न सम्ममु
र्मुदोऽन्तरा वपुषि बहिश्च कञ्चुकाः ॥२२॥

भयं नयइति वर्मधारणं नीतिरिति हेतोर्न तु भयादिति भावः । अदंशयन् अवर्मयन् । दंशेरनुदात्तेत्त्वात्परस्मैपदं चिन्त्यमित्याहुः अतएव भट्टमल्लः मंवर्म्मयति सन्नह्यत्यात्मने सज्जतीत्यमी । सन्दंशते दंशयते सन्नह्ये पदपञ्चकमिति । केचित्तु चुरादिषूभयपदिषु पठन्ति । अत्र साभिप्रायविशेषणत्वात् परिकरालङ्कारः ॥ २१ ॥

दुरुद्वहाइति । महिमभृतामैश्वर्य्यवतां महीभुजां राज्ञां सम्बन्धिनि रणाश्रवात् युद्धश्रवणात् आशु शीघ्रं उपचयं वृद्धिं बिभ्रति बिभ्राणे वपुषि अपरैरन्यैः क्षणं क्षणमपि दुरुद्वहा दुर्भरामुदः सन्तोषाः अन्तरा न संममुस्तदन्तरे वहिः कञ्चुकाश्च न संममुः न मान्ति स्म मावर्त्तन्तेत्यर्थः पूर्व्वत्र आधेयाधिक्या दुत्तरत्राधाराधिक्यादिति विवेकः अत्र । मुदां कञ्चुकानां च प्रकृतानामेव विशेषणसाम्यादौपम्यगम्यतायां केवलप्रकृतास्पदा तुल्ययोगिता ॥ २२ ॥

सकल्पनमिति । द्विरदगणं सह कल्पनया सकल्पनं यथोचित सन्नाहसहितं । कल्पना सज्जना समा इत्यमरः । वरूथोरथ गुप्तिरेषामस्तीति वरूथिनोरथान् । रथगुप्तिर्वरूथोनेत्यमरः । तुरङ्गिणोऽश्वयुक्तान् वाजिनोऽश्वान् अयनयुजः पल्ययनादि सन्नाहसंयुक्तान् । सम्पदादिभ्यः क्विप् । अयनः आस्तरणादि

सकम्पनं द्विरदगणं वरूथिन
स्तुरङ्गिणो जयनयुजश्च वाजिनः।
त्वरायुजः स्वयमपि कुर्व्वतो नृपाः
पुनःपुनस्तदधिकृतानतत्वरन् ॥ २३ ॥
युधे परैः सह दृढबद्धकक्षया
कलक्वणन्मधुपकुलोपगीतया।
अदीयत द्विपघटया सवारिभिः
करोदरैः स्वयमथ दानमक्षयम् ॥ २४ ॥

वन्याहे विजयेऽपि चेति विश्वः। स्वयं त्वरायुजः त्वरायुक्तान् स्वतः कुर्व्वतोऽपि स्वतएव त्वरया कुर्व्वाणानपीत्यर्थः तदधिकृतान् हस्त्यादिषु नियुक्तपुरुषान् नृपाः पुनःपुनरतत्वरन् त्वरयन्ति स्म तेषां तथा रणोत्सुक्यादिति भावः। त्वरेर्ण्यौ चङि अत् स्मृदृत्वर प्रथम्रद स्तृस्पशामित्यभ्यासस्याकारः ॥ २३ ॥

युधइति। अथ परैः सह युधे युद्धाय दृढबद्धा कक्षा मध्य बन्धनं यस्यास्तया। कक्षा दृष्टतिकायां स्यात् काञ्च्यां मध्येभबन्धने इति विश्वः। अन्यत्र दृढोद्योगयेत्यर्थः। कलं क्वणता मधुप कुलेनालिगणेनोपगीतया वन्दिमागधस्तुतया चेति गम्यते। द्विपघटया कर्व्या स्वयं सवारिभिः सोदकैः करोदरैः पुष्कराग्रैः पाणितलाग्रैश्चाक्षयमपरिमितं दानं मदः अदीयत दानं द्रव्यं चादीयत दत्तं। अत्र प्रस्तुतगजघटाविशेषणसाम्येनाप्रस्तुत दातृकर्तृप्रतीतेः समासोक्तिरलङ्कारः ॥ २४ ॥

सुमेखलाः सिततरदन्तचारवः
समुल्लसत्तनुपरिधानसम्पदः ।
रणैषिणाम्पुलकभृतोऽधिकन्धरं
ललम्बिरे सदसिलताः प्रिया इव ॥ २५ ॥
मनोहरैः प्रकृतिमनोरमाकृति
र्भयप्रदैः समितिषु भीमदर्शनः ।
सदैवतैः सततमथानपायिभि
र्निजाङ्गवन्मुरजिदसेव्यतायुधैः ॥ २६ ॥

सुमेखला इति । शोभना मेखला बन्धनसूत्राणि काञ्च्यश्च यासां ताः सुमेखलाः । मेखला खड्गबन्धे स्यात् काञ्चीशैलनितम्बयोरिति विश्वः । सिततरैर्दन्तैर्दन्तमयतनुभिर्दशनैश्च चारवः उल्लसन्त्यः तनवः कृशाः परिधानसम्पदः कोशसम्पदो वस्त्रसम्पदश्च यासां ताः पुलकभृतः छायाभृतः रोमाञ्चधारिण्यश्च सदसिलताः चारुखड्गावल्यः प्रिया इव रणैषिणां रणाकाङ्क्षिणां कन्धरास्वधिकन्धरमधिकण्ठं । विभक्त्यर्थेऽव्ययीभावः । ललम्बिरे लग्ना इत्यर्थः । श्लेषः श्लिष्टोपमा वा मतभेदात् ॥ २५ ॥

मनोहरैरिति । अथ प्रकृतिमनोरमाकृतिः स्वभावसुन्दरमूर्त्तिः समितिषु युद्धेषु भीमं दर्शनं यस्य स भीमदर्शनो मुरजिद्धरिर्मनोहरैः प्रकृतिमनोहरैः समितिषु भयप्रदैः सदैवतैः अधिदेवतायुक्तैः सततं अनपायिभिः आयुधैः शार्ङ्गादिभिर्निजाङ्गवत् पृथगवस्थितैः शरीरैरिवेत्युत्प्रेक्षा । असेव्यत सेवितः ॥ २६ ॥

अवारितङ्गतमुभयेषु भूरिशः
क्षमाभृतामथ कटकान्तरेष्वपि ।
महुर्युधि क्षतसुरशत्रुशोणित
प्रतप्रधिं रथमधिरोहति स्म सः ॥ २७ ॥
उपेत्य च स्वनगरुपक्षमारुत
न्दिवस्त्विषा कपिशितदूरदिङ्मुखः ।
प्रकम्पितस्थिरतरयष्टि तत्क्षण
म्पतत्पतिः पदमधिकेतनन्दधौ ॥ २८ ॥

अवारितमिति । अथायुधसन्निधानानन्तरं स हरिरुभयेषु द्वयेषु द्विविधेष्वित्यर्थः । क्षमाभृतां राज्ञां गिरीणां च कटकान्तरे ष्वपि शिबिराभ्यन्तरेषु नितम्बावकाशेषु च भूरिशः बहुशः अवारित मप्रतिहतं गतं प्रस्थितं मुहुरसकृत् युधि क्षतानां सुरशत्रूणाम सुराणां शोणितैः प्लुताः सिक्ताः प्रधयो नेमयो यस्य तं । चक्रधारा प्रधिर्नेमिरिति हलायुधः । रथमधिरोहति स्म आरुरोह ॥ २७ ॥

उपेत्येति । किञ्चेति चार्थः पतत्पतिः पक्षिराजः पक्षिणामीश्वरः । पतत्पत्ररथाण्डजाद्ध्यमरः । त्विषा कान्त्या कपिशितानि कपिशी कृतानि दूराणि दिङ्मुखानि येन सः । स्वनेन गुरुर्महान् पक्ष मारुतो यस्मिन् कर्मणि तत्तथा दिवः स्वर्गादुपेत्यागत्य तत्क्षणं तस्मिन् क्षणे प्रकम्पिता स्थिरतरा निश्चला यष्टिर्ध्वजदण्डो यस्मिन् तत्तथा अधिकेतनं केतने । विभक्त्यर्थेऽव्ययीभावः । पदं दधौ निहितवान् ॥ २८ ॥

गभीरताविजितमृदङ्गनादया
स्वनश्रिया हतरिपुहंसहर्षया।
प्रमोदयन्नथ मुखरान्कलापिनः
प्रतिष्ठते नवघनवद्रथः स्म सः॥ २९ ॥

निरन्तरस्थगितदिगन्तरन्ततः
समुच्चलद्बलमवलोकयञ्जनः।
विकौतुकः प्रकृतमहार्णवेऽभव
द्विघट्टनप्रचलितसिन्धुवारिणि॥ ३० ॥

गभीरतेति। अथ गजदानागमनानन्तरं स रथो नवघनवत् नवघनेन नवाब्देन तुल्यं। तेन तुल्यमिति वतिप्रत्ययः। गभीरतया गाम्भीर्येण विजितो मृदङ्गनादो यया तया हतो रिपुहंसानां हंसानामिव रिपूणां हर्षो यया तया स्वनश्रिया ध्वनिसम्पदा मुखरान् कूजतः कलापिनो मयूरान् प्रमोदयन् प्रतिष्ठते स्म प्रतस्थे। समवप्रविभ्यः स्थ इत्यात्मनेपदं लट् स्मेति भूते लट्। तद्धितगता श्रौती पूर्णोपमा॥ २९॥

निरन्तरेति। ततो रथप्रस्थानानन्तरं निरन्तरं नीरन्ध्रं स्थगितानि आच्छादितानि दिगन्तराणि येन तत्। समुच्चलत् प्रतिष्ठमानं तद्बलं सैन्यं अवलोकयन् जनो लोकः प्रकृतः प्रक्रान्तो महार्णवो महापूरो जगत्संहाररूपो येन तस्मिन् विघट्टनमतिघातं प्रचलितं क्षुभितं यत् सिन्धोरब्धेर्वारि तस्मिन् विकौतुको निवृत्तकौतूहलोऽभवत्। कल्पान्तक्षुभितवारिधेर्वारिवच्च तद्बलं सकलजगत्संहारसहतया अलक्ष्यतेत्यर्थः। अत्रान्यदर्शनादन्यदिदृक्षा

बबृंहिरे गजपतयो महानकाः
प्रदध्वनुर्जयतुरगा जिहेषिरे ।
असम्भवद्गिरिवरगह्वरैरभू-
त्तदा रवैर्दलित इव स्वमाश्रयः ॥ ३१ ॥

अनारतं रसति जयाय दुन्दुभौ
मधुद्विषः फलदलघुप्रतिस्वनैः ।
विनिष्पतन्मृगपतिभिर्गुहामुखै-
र्गताः परामुदमहसन्निवाद्रयः ॥ ३२ ॥

निवृत्तेर्दलवारिधिवारिणारेकत्वाक्षेपे बाधात् माहात्म्याक्षेपात् वाक्य-
भेदेन प्रतिबिम्बकरणात् निदर्शनालङ्कारः ॥ ३० ॥

बबृंहिरे इति । गजपतयः बबृंहिरे बृंहन्ति स्म बृंहणं चक्रु-
रित्यर्थः । बृहि वृद्धौ शब्दे चात्मनेपदं चिन्त्यम् । अतएव भट्ट-
मल्लः द्विधम बृंहते ऽश्वानां हस्तिनां बृंहतीति चेति । महानकाः
प्रदध्वनुः जयशीलास्तुरगा जययुक्तास्तुरगा जिहेषिरे हेषां चक्रुरित्यर्थः ।
हेषृ ह्रेषृ अव्यक्ते शब्दे । तदा तस्मिन् काले असम्भवन्त्यन्तर्भवितु-
मपर्याप्नुवन्ति गिरिवरगह्वराणि येषां तैः गिरिवरगह्वरेषु असमाद्भिः
अवर्त्तमानैरित्यर्थः । रवैर्बृंहणादिघोषैः । स्वमाश्रयः स्वसमवायि-
कारणमाकाशो दलित इव विदारित इवाभूदित्युत्प्रेक्षा तया तेषा-
मतितीव्रत्वं व्यज्यते ॥ ३१ ॥

अनारतमिति । मधुद्विषो हरेः दुन्दुभौ रणभेर्यां जयायाना-
रतमश्रान्तं रसति ध्वनति सति फलन्तः सङ्क्रमन्तो ऽलघवो
महान्तः प्रतिस्वनाः प्रतिध्वनयो येषु तैः । विनिष्पतन्तः बहिरा-

जडीकृतश्रवणपथे दिवौकसां
चमूरवे विशति सुराद्रिकन्दराः ।
अनर्थकैरजनि विदग्धकामिनी
रतान्तरक्वणितविलासकौशलैः ॥ २२

गच्छन्तः मृगपतयः सिंहाये भ्यस्तैर्गुहाभिरेव मुखैरद्रयः परां मुदं गताः सन्तः अहसन्निव । सिंहानां धावल्याद्धनियोगाच्च हास मेत्प्रेक्षा ॥ २१ ॥

जडीकृतइति । दिवमोकोयेषां तेषां दिवौकसां देवानां कन्दरान्तर्गतानामित्यर्थः । जडीकृतश्रवणपथे बधिरीकृत श्रोत्रमार्गे । सापेक्षत्वेऽपि गमकत्वात्समासः । चमूरवे सेना घोषे सुराद्रिकन्दराः मेरुगह्वराणि विशति सति । विदग्ध कामिनीनां प्रौढाङ्गनानां रतान्तरे सुरतमध्ये क्वणितविलासाः कूजितसम्पदस्तासु यानि कौशलानि तैरनर्थकैरजनि जातं प्रेयसां बाधिर्य्यादिति भावः । अत्र श्रोत्रजाड्यस्य विशेषणगत्या क्वणिता नर्थक्यहेतुत्वात् काव्यलिङ्गं तदुपजीवितेन क्वणितानामानर्थक्या सम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरित्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ २२ ॥

अरातिभिरिति । सह युध्यन्तइति तान् सहयुध्वनः । सहे चेति क्वनिप् । अतएवारातिभिर्युधि हतान् जिघृक्षवो गृहीतुमिच्छवः स्वयं वरणकामाः । ग्रहेः सनन्तादुप्रत्ययः । सुरगणिकाः अप्सरसः श्रुतरणतूर्य्यनिस्वनाः सत्यपि रोमाञ्चितं प्रायेण प्रवीर संवादाभावादिति भावः । प्रथमसमागमोचितं अतिमोहन

अरातिभिर्युधि सह युध्वनोद्धता
श्चिमृत्ववः अतरणतूर्य्यनिस्वनाः ।
अकुर्व्व तत्प्रथमसमागमोचित
श्चिरोज्झितं सुरगणिकाः प्रसाधनम् ॥२४॥
प्रचोदिताः परिचितयन्तकर्म्मभि
र्निषादिभिर्व्विदितयताङ्कुशक्रियैः ।
गजास्सकृत्करतललोलनालिका
हतामुहुः प्रणदितघण्टमाययुः ॥ २५ ॥

मित्यर्थः । प्राथम्यं च पुंसामिदं प्रथममस्मादिति भावः । प्रसाधनं अकुर्व्वत परिष्कृतवत्य इत्यर्थः । प्रतिकर्म्म प्रसाधनमित्यमरः । अत्र स्वयंवरणतूर्य्यश्रवणयोर्विशेषणगत्या प्रसाधनहेतुत्वात्काव्यलिङ्गम् ॥ २४ ॥

प्रचोदिताइति । परिचितं यन्तृकर्म्म सादिकृत्यं यैस्तैः स्वभ्यस्तगजशास्त्रैरित्यर्थः । अतएव विदिते यताङ्कुशक्रिये यतयाताख्ये पदाङ्कुशकर्म्मणी यैस्तैः । पादकर्म्म यतं प्रोक्तं यातमङ्कुशवारणमिति हलायुधः । निषादिभिर्यन्तृभिः प्रचोदिताः प्रेरिताः गजाः सकृदेकवारमेव करतललोलाभिः पाणितलचलिताभिर्नालिकाभिरस्त्रनाडिकाभिर्हतास्ताडितास्तथापि मुहुः प्रणदिता अव्यक्तम् ध्वनन्तो घण्टा यस्मिन् कर्म्मणि तत्तथा आययुः प्रत्यासुमागताः । स्वभावोक्तिः ॥ २५ ॥

सविभ्रमेति । सविभ्रमेण साङ्गविन्यासविशेषेण क्रमणेन गमनेन चलैः प्रकीर्णकचामरैः । चामरं तु प्रकीर्णकमित्यमरः । चितैः

सविक्रमक्रमणचलैरितस्ततः
प्रकीर्णकैः क्षिपत इव क्षितेरजः ।
व्यरंसिषुर्न खलु जनस्य दृष्टय
स्तुरङ्गमादभिनवभाण्डभारिणः ॥ २६ ॥

चलाङ्गुलीकिसलयमुद्गतैः करै
रनृत्यत स्फुटकृतकर्णतालया ।
मदोदकद्रवकटभित्तिसङ्गिभिः
कलस्वरम्मधुपगणैरगीयत ॥ २७ ॥

रजः खुरोद्धूतमितस्ततः क्षिपतो निरस्यत इव स्थितादित्युत्प्रेक्षा । अभिनवभाण्डभारिणः प्रत्यग्राभरणधारिणः । स्याद्भाण्डमश्वाभरण मित्यमरः । तुरङ्गमात्तुरङ्गमेभ्यः । जातावेकवचनम् । जुगुप्सा विरामप्रमादार्थानामुपसंख्यानमित्यपादानत्वम् । जनस्य दृष्टयो न व्यरंसिषुर्न विरताः खलु । रमेर्लुङि व्याङ्परिभ्यो रम इति परस्मैपदं यमरमनमातां सक्चेति सगिडागमौ इटि नेटीति वृद्धि प्रतिषेधः ॥ २६ ॥

अथ विशेषकेणाह । चलेत्यादि । स्फुटं कृतः कर्णतालः कर्णताडनं यया तया द्विपघटया कर्त्र्या चलाङ्गुल्य एव किसलया यस्मिन् कर्मणि तथा योद्गतैः करैर्हस्तैरनृत्यत नर्तितम् । भावे लङ् । तथा मदोदकेन द्रवास्वार्द्रासु कटभित्तिषु गण्डस्थलेषु सङ्गिभिरासक्तैः मधुपगणैर्भ्रमरगणैः कलस्वरं मधुरस्वरमगीयत गीतम् । भावे लङ् ॥ २७ ॥

असिच्यत प्रशमितपांशुभिर्मही
मदाम्बुभिर्धृतनवपूर्णकुम्भया ।
अवाद्यत श्रवणसुखं समुन्नम
त्पयोधरध्वनिगुरु तूर्यमाननैः ॥ ३८ ॥

उदासिरे पवनविधूतवाससस्
ततस्ततो गगनलिहश्च केतवः ।
यतः पुरः प्रतिरिपु शार्ङ्गिणः स्वयं
व्यधीयत द्विपघटयेति मङ्गलम् ॥ ३९ ॥

॥ विशेषकम् ॥

असिच्यतेति । धृतौ नवौ पूर्णकुम्भौ शिरःपिण्डकलशौ यया तया द्विपघटया कर्त्र्या । कुम्भौ घटेभमूर्धांशाविल्यमरः । प्रशमितपांशुभिर्मदाम्बुभिर्मही असिच्यत सिक्ता । आननैर्मुखैः करणैः श्रवणयोः सुखयतीति सुखं सुखकरं । सुखहेतौ सुखे सुखमिति शब्दार्णवे । समुन्नमत्पयोधरध्वनिगुरु उद्यन्मेघगर्जितगम्भीरं तूर्यं अवाद्यत वादितं । स्वमुखबृंहितैरेव तूर्यं वाद्यादित मित्यर्थः ॥ ३८ ॥

उदासिरे इति । पवनेन विधूतवाससः कम्पितपटाः गगनलिहोऽभ्रङ्कषाः केतवो ध्वजाश्च ततस्तत उदासिरे उत्क्षिप्ताइत्यर्थं द्विपघटया प्रतिरिपु रिपून् प्रति । आभिमुख्येऽव्ययीभावः । यतो गच्छतः । इतोऽपटः अयादेशः । शार्ङ्गिणः पुरोऽग्रे स्वयं मङ्गलं व्यधीयत विहितं । अत्र श्लोकत्रये प्रस्तुतद्विपघटाविशेषणसाम्याद प्रस्तुतमङ्गलाचारपरपुरन्ध्रीप्रतीतिः समासोक्तिरलङ्कारः ॥ ३९ ॥

न शून्यतामगमदसौ निवेशभूः
प्रभूततां दधति बले चलत्यपि ।
पयस्यभिद्रवति भुवं युगावधौ
सरित्पतिर्न हि समुपैति रिक्ततां ॥४०॥
यियासितामथ मधुभिद्विवस्वता
जनो जरन्महिषविषाणधूसराम् ।
पुरः पतत्परबलरेणुमालिनी
मलक्षयद्दिशमभिधूमितामिव ॥ ४१ ॥

नेति । प्रभूततां भूमानं दधति दधाने बले सैन्ये चलति प्रतिष्ठमानेऽपि असौ निवेशभूः सेनानिवेशभूमिः शून्यतां रिक्ततां नागमत् । तथा हि युगावधौ युगान्ते पयसि भुवमभिद्रवत्यभिप्लवमाने सति सरित्पतिः समुद्रो रिक्ततां न समुपैति हि । दृष्टान्तालङ्कारः ॥ ४० ॥

यियासितामिति । अथ मधुभिद्धरिरेव विवस्वान् तेन यियासितां यातुमिष्टां जिगमिषितां । यातेः सन्नन्तात्कर्मणि क्तः । पततोऽभिधावतः परबलस्य शत्रुसैन्यस्य रेणून्मालते धारयतीति तन्मालिनी । मलतेर्णिनिप्रत्ययः । अतएव जरतो वृद्धस्य महिषस्य विषाणवद्धूसरां धूम्रां पुरोऽग्रे दिशमभितो धूमोऽस्याः सञ्जातस्तामभिधूमितामिव जनो लोकोऽलक्षयत् । मधुभिद्विवस्वतेति रूपकोत्थापितापि दिशि धूमितत्वोत्प्रेक्षेति सङ्करः । अत्राहुः अङ्गारिणी दिग्रविविप्रयुक्ता यस्यां रविस्तिष्ठति सा प्रदीप्ता । प्रधूमिता यास्यति यां दिनेशः शेषाः प्रशस्ताः शुभदाय ताः स्युरिति ॥ ४१ ॥

मनस्विनामुदितगुरुप्रतिश्रुतिः
श्रुतस्तथा न निजमृदङ्गनिस्वनः ।
यथा पुरःसमरसमुद्यतद्विष
द्बलानकध्वनिरुदकर्षयन्मनः ॥ ४२ ॥

यथा यथा पटहरवः समीपता
मुपागमत्स हरिवराग्रतःसरः ।
तथा तथा हृषितवपुर्मुदाकुला
द्विषाञ्चमूरजनि जनीव चेतसा ॥ ४३ ॥

मनस्विनामिति । उदिता उत्पन्ना गुरुर्गम्भीरा प्रतिश्रुतिः प्रतिध्वनिर्यस्य सः निजमृदङ्गनिस्वनः स्वसैन्यतूर्य्यघोषः श्रुतः सन् तथा मनस्विनां मनो नोदकर्षयत् नोत्कर्ष । कर्षिरयं स्वार्थण्यन्तः । यथा पुरोऽग्रे समरसमुद्यते समरोद्युक्ते द्विषद्बले शत्रुसैन्ये ये आनकाः तेषां ध्वनिरुदकर्षयत । एतेनैषां वीरस्थायी महोत्साह उक्तः । अत्र भयङ्करस्यापि परसैन्यघोषस्योत्साहजनकत्वं महावीरेषु न विरुद्धमिति विरोधाभासोऽलङ्कारः भीहेतौ सत्यपि भयानुत्पत्तेर्विशेषोक्तिर्विरुद्धकार्य्योत्पत्तेर्विषमभेदश्चेति सङ्करः ॥ ४२ ॥

यथा यथेति । हरिर्वरो जामातेव हरिवरः । वरो जामातृनर्य्ययोरिति विश्वः । यत्स्याग्रतः सरतीत्यग्रतःसरोऽग्रेसरः । पुरोऽग्रतोऽग्रेषु सर्त्तेरिति टप्रत्ययः । स पूर्वोक्तः पटहरवो यथा यथा यावद्यावत्समीपतामासन्नतामुपागमत् । तथा तथा तावत्तावद् द्विषतां चमूर्जनीव वधूरिव । जनी सीमन्तिनी वधूरिति विश्वः । चेतसा मुदाकुला आनन्दाविला हृषितवपुः रोमाञ्चिताङ्गी । वधू

प्रसारिणी सपदि नभस्तले ततः
समीरणभ्रमितपरागरूषिता ।
व्यभाव्यत प्रलयजकालिकाकृति
र्विदूरतः प्रतिबलकेतनावलिः ॥ ४४ ॥

क्षणेन च प्रतिमुखतिग्मदीधिति
प्रतिप्रभास्फुरदसिदुःखदर्शना ।
भयङ्करा भृशमपि दर्शनीयतां
ययाववसावसुरचमूश्च भूभृताम् ॥ ४५ ॥

र्तोमसितीडागमः । अजनि जाता । जनेः कर्त्तरि लुङ् दीप जनेत्यादिना चिण्प्रत्ययः । वधूवरसमागमवत् प्रतिदन्द्विसमागमो महोत्सव इत्युपमार्थः । तेन सैन्ययोरन्योऽन्य मब्दश्रवणकारिणी प्रत्यासत्तिरासीदिति व्यज्यते ॥ ४३ ॥

प्रसारिणीति । ततः श्रवणानन्तरं सपद्यविलम्बेन नभस्तले प्रसारिणी व्यापा समीरणेन वायुना भ्रमितेन परागेण रूषिता रूक्षीकृता अतएव प्रलयजायाः कल्पान्तप्रादुर्भूतायाः कालिकाया महाकाल्या आकृतिरिवाकृतिर्यस्याः सा । प्रतिबले प्रतिपक्षसैन्ये केतनावलिर्ध्वजपङ्क्तिर्विदूरतो दूरादलक्ष्यत । एतावता प्रत्यासत्ति रासीदित्यर्थः । उपमालङ्कारः ॥ ४४ ॥

क्षणेनेति । प्रतिमुखस्याभिमुखस्य तिग्मरश्मेः उष्णांशोः प्रति प्रभाभिः प्रतिफलितरोचिभिः स्फुरद्भिर्दीप्यमानैरसिभिः खड्गै दुःखं दुष्करं दर्शनं यस्याः सा दुर्दर्शेत्यर्थः । असावसुरचमूश्चैद्यसेना क्षणेन च भूभृतां हरिसैनिकानां भृशं भयङ्करापीति भय

पयोमुचामभिपततां दिवि द्रुतं
विपर्ययः परित इवातपस्य सः।
समक्रमः समविषमेष्वथ क्षणा
त्क्षमातलं बलजलराशिरानशे ॥ ४६ ॥
ममौ पुरः क्षणमिव पश्यतो मह
त्तनूदरस्थितभुवनत्रयस्य सत्।
विशालतां दधति नितान्तमायते
बलं द्विषां मधुमथनस्य चक्षुषि ॥ ४७ ॥

दूरेऽपि। मेघर्त्तिभयेषु कृञ इति खच्प्रत्ययः। दर्शनीयतां मनोहरतामिति विरोधः। दृष्टिविषयतां यथावित्यविरोधः अत एव विरोधाभासोऽलङ्कारः ॥ ४५ ॥

पयोमुचामिति। अथासुरसेनादर्शनानन्तरं समविषमेषु निम्नोन्नतेषु समक्रमस्तुल्यसञ्चारः बलजलराशिः सैन्यसागरः दिवि व्योम्नि द्रुतमभिपततामभिधावतां पयोमुचां सम्बन्धी आतपस्य विपर्ययः छायेव परितः क्षणात् क्षमातलं भूतलं आनशे। अशू व्याप्तौ अत आदेरित्यभ्यासदीर्घः अश्नोतेश्चेति नुमागमः। उपमालङ्कारः ॥ ४६ ॥

ममाविति। पुरोऽग्रे क्षणमिव पश्यतः क्षणमात्रं विलोकयतः। इवशब्दो वाक्यालङ्कारे तनौ शरीरोदरे कुक्षौ स्थितं भुवनत्रयं यस्य तस्य मधुमथनस्य हरेः सम्बन्धिनि विशालतां वैपुल्यं दधति दधाने नितान्तमायते दीर्घे द्राघीयसि चक्षुषि महत् द्विषां बलं ममौ वर्त्तते। क्षणमीक्षणादेव परबले इयत्तां परि

श्रमच्छिदः पुलकविकाशिमूर्त्तयो
रसाधिके मनसि निविष्टसाहसाः ।
मुखे युधः सपदि रतेरिवाभवन्
ससम्भ्रमाः क्षितिपचमूवधूगणाः ॥ ४८ ॥

ध्वजांशुकैर्ध्रुवमनुकूलमारुत
प्रसारितैः प्रसभकृतोपहूतयः ।
यदूनभि द्रुततरमुद्यतायुधाः
क्रुधा परं रयमरयः प्रपेदिरे ॥ ४९ ॥

परिच्छेदेऽर्थः । क्षोदीयस्यपि कुक्षौ भुवनत्रयं परिच्छिन्दतः हरेरति महत्त्वेऽपि अल्पत्वपरिच्छेदः कियानिति भावः । अत्र भुवनत्रयाधेयस्याधारस्य कुक्षेरल्पत्वाच्चतुरपेक्षयाधेयस्य बलस्याल्पत्वाद्धिकालङ्कारौ सङ्कीर्य्येते ॥ ४७ ॥

श्रमेति । क्षितिपचमूर्वध्व इत्युपमितसमासः रतेरिवेति लिङ्गात् । तासां गणाः युधामुखे युद्धारम्भे रतेर्मुखे रत्यारम्भ इव सपदि श्रमं छिन्दन्तीति श्रमच्छिदः । क्विप् । पुलकविकाशिमूर्त्तयो रोमाञ्चोदञ्चितगात्राः रसः वीरः शृङ्गारश्च तेनाधिके निर्भरे मनसि निविष्टसाहसाः प्रविष्टधार्ष्ट्याः ससम्भ्रमाः सत्वराश्चाभवन् । यादृशो वधूनां सुरतसङ्कर्मण्युत्कण्ठा तादृशो चमूनां समरकर्मण्युपमार्थः तेनैतासां समरसुरतयोः समरसत्वं व्यज्यते ॥ ४८ ॥

ध्वजांशुकैरिति । अरयः चैद्यपक्षाः अनुकूलमारुतेन प्रसारितैः ध्वजांशुकैर्ध्रुवं प्रसभेन बलात्कारेण कृतोपहूतयः कृता

हरेरपि प्रति परकीयवाहिनी-
रधिस्यदम्प्रववृतिरे चमूचराः ।
विलम्बितुन्न खलु सहा मनस्विनो
विधित्सतः कलहमवेक्ष्य विद्विषः ॥ ५० ॥
उपाहितैर्वपुषि निवातवर्म्मभिः
स्फुरन्मणिप्रसृतमरीचिसूचिभिः ।
निरन्तरन्नरपतयो रणाजिरे
रराजिरे शरनिकराचिता इव ॥ ५१ ॥

ज्ञानादिवेत्यर्थः । यदून् अभि यादवान् प्रति द्रुततरमुद्यतायुधाः उत्क्षिप्तायुधाः सन्तः क्रुधा क्रोधेन परं अधिकं रयं त्वरां प्रपेदिरे। ध्वजांशुकदर्शनोत्थक्रोधहेतुकस्य शीघ्राभिपातस्य ध्वजाज्ञानहेतुकत्वमुत्प्रेक्ष्यते भ्रमिति ॥ ४९ ॥

हरेरिति । हरेरपि चमूं चरन्तीति चमूचराः सैनिकाः। चरेष्टः। परेषामिमाः परकीयाः वाहिनीः सेनाः प्रति अधिस्यदं अधिकरयं यथा तथा। रंहस्तरसी तु रयः स्यद इत्यमरः। प्रववृतिरे प्रवृत्ताः तथा हि मनस्विनो धीराः कलहं युद्धं विधित्सतः विधातुमिच्छतः। दधातेः सन्नन्ताल्लटः शतरि रूपम्। तान् विद्विषः शत्रून् अवेक्ष्य विलम्बितुं। शकधृषेत्यादिना तुमुन्प्रत्ययः। सहन्ते इति सहाः क्षमाः। पचाद्यच्। न खलु। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५० ॥

उपाहितैरिति । रणाजिरे रणाङ्गने नरपतयो राजानो वपुषि उपाहितैरामुक्तैः स्फुरन्मणिप्रसृतारश्मिनिर्म्मितामरीचय

अथोच्चकैर्जरठकपोतकन्धरा
तनूरुहप्रकरविपाण्डुरद्युति।
बलैश्चलच्चरणविधूतमुच्चर
द्घनावलीरुदचरत क्षमारजः ॥ ५२ ॥

एव सूचयो येषां तैः निवातवर्मभिः अच्छिद्रकञ्चुकैः । निवातो दृढसन्नाहे निर्व्वाते वाश्रयेऽपि चेति विश्वः । तनुत्रं वर्म कञ्चुकमित्यमरः । निरन्तरं नीरन्ध्रं शरनिकरैराचिताः प्रोताइव रराजिरे । फणानां च मणीनामिति विकल्पादेलाभावलोपाभावः । मणिरोचिषः शाहृश्याच्छरनिकरत्वोत्प्रेक्षा ॥ ५१ ॥

अथेति । अथानन्तरं उच्चकैरुन्नतं जरठकपोतकन्धरातनूरुहप्रकरविपाण्डुरद्युति जीर्णपारावतकन्धरारोमनिकरधूसरच्छायमित्युपमा । पारावतः कलरवः कपोतइत्यमरः । बलैः सैन्यैश्चलद्भिश्चरणैर्विधूतमुद्धूतं प्रेरितं सदुच्चरदुत्पतत् क्षमारजो भूरेणुर्घनावलीर्घनपङ्क्तीरुदचरत प्रचक्रामेत्यर्थः । उदश्चरः सकर्म्मकादित्यात्मनेपदम् । अस्य प्रत्युदाहरणमुच्चरदिति । अत्र भूरेणोर्मेघमण्डलाक्रमणासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिरुपमासङ्कीर्णा ॥ ५२ ॥

विषक्तिभिरिति । चलाचलैश्चटुलैः खुरैरनुपदं प्रतिपदं आहताः उद्धृताः श्वभ्रामिमरैनरं परस्परं निरन्तरमिति पाठे अभितो निरन्तरं नीरन्ध्रं विषक्तिभिर्मिथः श्लिष्टैस्तुरङ्गमैरुपरिनिरुद्धो निर्गमो यासां ताः धूलयः क्वचित् चिरमध एव विबभ्रमुर्नोत्पेतुरिति भावः । अधोद्धृतानां अधोभ्रमणविरोधस्योपरि

विषङ्गिभिर्भृशमितरेतरं क्वचि
त्तुरङ्गमैरुपरि निरुद्धनिर्गमाः ।
चलाचलैरनुपदमाहताः खुरै
र्विबभ्रमुश्चिरमधएव धूलयः ॥ ५३ ॥

गरीयसः प्रचुरमुखस्य रागिणो
रजोभवद्व्यवहितसत्त्वमुत्कटम् ।
सिसृक्षतः सरसिजजन्मनोजगद्
बलस्य तु क्षयमपनेतुमिच्छतः ॥ ५४ ॥

निर्गमरोधेन विशेषणगत्या परिहारात्काव्यलिङ्गसङ्कीर्णो विरोधाभासोऽलङ्कारः ॥ ५३ ॥

गरीयसइति । गरीयसः सर्व्वलोकपितामहत्वात्पूज्यतरस्य अन्यत्र महत्तरस्य प्रचुरमुखस्य चतुर्मुखस्येत्यर्थः अन्यत्र बहुप्रवाहस्य रागिणोरक्तवर्णस्य अन्यत्र रणे रागिणोऽनुरागवतः एतद्भूतस्य सरसिजजन्मनोब्रह्मणोजगत्सिसृक्षतः जगत् स्रष्टुमिच्छतः सतः । सृजेः सन्नन्ताल्लटः शत्रादेशः । व्यवहितसत्त्वं तिरस्कृतसत्त्वगुणकं अन्यत्र तिरोहितजन्तुकं रजोरजोगुणोरेणुश्चोत्कटमुद्रिक्तम भवत् । बलस्य सैन्यस्य तु जगत् क्षयमपनेतुमिच्छतः सतोऽभवत् । अत्र ब्रह्मबलयोर्गरीयस्त्वादिसाधर्म्येऽपि रजःप्रभवेन एकस्य सिसृक्षोरन्यस्य संजिहीर्षोरिति व्यतिरेकः श्लेषात्थापितइति सङ्करः ॥ ५४ ॥

पुरेति । संयुगे युद्धे सति शरक्षतिजनितानि क्षतजानि असृञ्जि रुधिराणि सोऽस्माकं प्रसभं प्रसह्य पङ्कतां पुरा नयन्ति

पुरा शरक्षतिजनितानि संयुगे
नयन्ति नः प्रसभमसृञ्जि पङ्कताम्।
इति ध्रुवं व्यलघिषुरात्तभीतयः
खमुच्चकैरनलसखस्य केतवः ॥ ५५ ॥

क्वचिल्लसद्घननिकुरम्बकर्बुरः
क्वचिद्धिरण्मयकणपुञ्जपिञ्जरः।
क्वचिच्छरच्छशधरखण्डपाण्डुरः
खुरक्षतक्षितितलरेणुरुद्ययौ ॥ ५६ ॥

महीयसां महति दिगन्तदन्तिना-
मनीकजे रजसि मुखानुषङ्गिणि।
विसारितामजिहत कोकिलावली-
मलीमसा जलदमदाम्बुराजयः ॥ ५७ ॥

नयन्तीति। यावत्पुरानिपातयोर्लडिति भविष्यदर्थे लट्। इतीत्थमालोच्य ध्रुवमात्तभीतयः प्राप्तभयाः सन्तोऽनलसखस्याग्निमित्रस्य वायोः केतवो ध्वजाः तल्लिङ्गत्वात्तस्येति भावः। उच्चकैरुन्नतं खमाकाशं व्यलघिषुः वियदारूढा इत्यर्थः। ध्रुवमित्युत्प्रेक्षायाम् ॥ ५५ ॥

क्वचिदिति। क्वचिल्लसन् घननिकुरम्बवन्नवाभ्रपटलवत्कर्बुरः शबलः। क्वचिद्धिरण्मयकणपुञ्जपिञ्जरः कनकचूर्णराशिकपिशः। क्वचिच्छरच्छशधरखण्डपाण्डुरः खुरैः क्षतस्य क्षितितलस्य रेणुरुद्ययौ। उज्जगाम। अत्रोपमात्रयस्य संसृष्टिः ॥ ५६ ॥

महीयसामिति। महति अनीकजे सेनासमुत्थे रजसि महीयसां दिगन्ता एव दन्तिनः तेषां मुखानि पुरोभागा एव मुखान्याननानि

शिरोरुहैरलिकुलकोमलैरमी
मुधा मृधे मृषत युवानएव मा।
बलोद्धतस्यवलितमूर्द्धजानिति
ध्रुवञ्जनाञ्जरतइवाकरोद्रजः ॥५८॥

इति श्लिष्टरूपकम्। तेष्वनुषङ्गिणि लग्ने सति। कोकिलावली
वन्मलीमसामलिना जलदादिङ्मुखमङ्गिनएव ये मेघास्तएव
मदाम्बुराजयोमदरेखाः विसारितां इभरत्वमजिहत अगच्छन्
प्राप्तारत्यर्थः। पांशुपातस्य दन्तिनां मदहेतुत्वादिति भावः
तदुक्तं महाभारते। स्त्रियोजारेण तुष्यन्ति गावः स्वच्छन्द
चारतः। कुञ्जराः पांशुवर्षेण ब्राह्मणाः परनिन्दयेति।
दिगन्तलम्बिनोमेघाः सेनारजोमेलनादकलीबभूवुरित्यर्थः। अत्र
दिगन्तेषु तन्मेघेषु च दन्तित्वतन्मदत्वरूपणात् समस्तवस्तुवर्त्ति
सावयवरूपकं मुखमेव मुखमिति श्लिष्टपरम्परितमिति सङ्करः।
अजिहतेति ओहाङ्गतौलङि अभ्यस्तयोरातइत्याकारलोपः अदभ्यस्ता
दित्यदादेशः ॥ ५७ ॥

शिरोरुहैरिति। अमी युवानः अलिकुलकोमलैः शिरोरुहैः
मुधा मृधे। मृधइति युद्धपर्यायेष्वमरः। मा मृषत न म्रियन्तां।
म्रियतेर्माङि लुङि न माङ्योगे इत्यड्भावः उश्चेति सिचः कित्त्वान्न
गुणः। इतीत्थमालोच्येत्यर्थः बलोद्धतं रजः कर्त्तृ धवलितमूर्द्धजान्
धवलीकृतकेशान् जनान् जरतइवाकरोत् वृद्धानिवाकरोदित्यर्थः।
ध्रुवमित्युत्प्रेक्षायां अत्रेवशब्दस्यावधारणार्थत्वान्नतेन पौनरुक्त्यं।
इवौपम्येऽवधारणे इति विश्वः। प्रवयाः स्थविरोवृद्धोजीनोजीर्णो
जरन्नपीत्यमरः। जीर्य्यतेरतृन्निति अतृन् प्रत्ययः ॥ ५८ ॥

सुसंहतैर्दधदपि धाम नीयते
तिरस्कृतिं बहुभिरसंशयम्परैः
यतः क्षितेरवयवसम्पदोऽणव
स्त्विषान्निधेरपि वपुरावरीषत ॥ ५९ ॥

द्रुतद्रवद्रथचरणक्षतक्षमा
तलोल्लसद्बहलरजोऽवगुण्ठितम् ।
युगक्षयक्षणनिरवग्रहे जग
त्पयोनिधेर्जलइव मग्नमाबभौ ॥ ६० ॥

सुसंहतैरिति । धाम तेजो दधदपि दधानोऽपि तेजस्व्यपीत्यर्थः । परैरन्यैः सुसंहतैः सुसङ्गतैः परैरैक्यङ्गतैश्च बहुभिः तिरस्कृतिं नीयते । असंशयं निश्चितं । अर्थाभावेऽव्ययीभावः । कुतः यतः अणवः सूक्ष्माः क्षितेरवयवसम्पदो रेणुसमूहाः त्विषां निधेः सूर्य्यस्यापि वपुरावरीषत आच्छादितवन्तः । वृङो लुङि इटो वेति इटो दीर्घः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५९ ॥

द्रुतेति । द्रुतं शीघ्रं द्रवतां धावतां रथानां चरणैश्चक्रैः क्षतात् क्षुण्णात् क्ष्मातलादुल्लसता पतता बहुलेन सान्द्रेण रजसाव गुण्ठितमाच्छादितं जगद्युगक्षयक्षणे कल्पान्तकाले निरवग्रहे निष्प्रतिबन्धे पयोनिधेर्जले मग्नमिवाबभावित्युत्प्रेक्षा ॥ ६० ॥

समुल्लसदिति । समुल्लसन्ती दिनकरस्येव बालस्य कान्तिर्यासां ताः रजोरेणुरेव रज आर्त्तवमासामस्तीति रजस्वलाः । रजः कृष्यासुतिपरिषदो वलजित्यादिना मत्वर्थीयो वलच्प्रत्ययः । धूलि

समुल्लसद्दिनकरवक्त्रकान्तयो
रजस्वलाः परिमलिताम्बरश्रियः ।
दिगङ्गनाः क्षणमविलोकनक्षमाः
शरीरिणाम्परिहरणीयतां ययुः ॥ ६१ ॥
निरीक्षितुं वियति समेत्य कौतुका
त्पराक्रमं समरमुखे महीभृताम् ।
रजस्ततावनिमिषलोचनोत्पल
व्यथाकृति त्रिदशगणैः पलाय्यत ॥ ६२ ॥

धूसराः उदक्याश्च । परिमलिताः परितः संजातमला अम्बरस्याकाशस्यैवाम्बरस्य वस्त्रस्य च श्रीर्यासां ताः । अत एवाविलोकनक्षमा विलोकनानर्हाः दिश एवाङ्गनाः दिगङ्गनाः शरीरिणां प्राणिनां क्षणमीषत्कालं परिहरणीयतामगम्यतां ययुः । तस्मात् मलवद्वाससं न संविशेदेवेत्यादिनिषेधादिति भावः । श्लिष्टपरम्परित रूपकम् ॥ ६१ ॥

निरीक्षितुमिति । त्रिदशगणैर्देवगणैः समरमुखे रणारम्भे महीभृतां राज्ञां पराक्रमं निरीक्षितुं वियति कौतुकात्समेत्य रजस्ततौ रजःस्तोमे न निमिषन्त्यनिमिषाणि पक्ष्मपातरहितानि । मिषेः पचाद्यच् कुटादित्वान्न गुणः । तेषां लोचनोत्पलानां व्यथाकृति दुःखकारिण्यां सत्यां । कृञः क्विप् । पलाय्यत अधाव्यत । भावे परापूर्वादयतेर्लङि तङ् उपसर्गस्यायताविति रेफस्य लत्वम् । अत्र लोचनोत्पलानां व्यथाऽसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिभेदः ॥ ६२ ॥

विषङ्गिणि प्रतिपदमापिबत्यपो
हताचिरद्युतिनि समीरलक्ष्मणि ।
शनैःशनैरुपचितपङ्कभारिकाः
पयोमुचः प्रययुरपेतवृष्टयः ॥ ६३ ॥
नभोनदीव्यतिकरधौतमूर्त्तिभि
र्वियद्गतैरनधिगतानि लेभिरे ।
चलच्चमूतुरगखुराहतोत्पत
न्महीरजःस्नपनसुखानि दिग्गजैः ॥६४॥

विषङ्गिणीति । विषङ्गिणि विषक्ते अतएव हताचिरद्युतिनि विरमिताचिरद्युतिनि समीरलक्ष्मणि वातकेतौ रजसि प्रतिपदं प्रतिक्षणं अपोऽम्भांसि आपिबत्याकर्षति सति अतएव अपेतवृष्टयो निवृत्तवर्षाः पयोमुचः । उपचिताः प्रवर्द्धिताः पङ्कभारिकाः पङ्कभरणानि येषां ते उपचितपङ्कभारिकाः सन्तः । पर्य्यायार्हणोत्पत्तिषु ण्वुलिति अर्हणार्थे ण्वुल्प्रत्ययः अर्हणञ्च करणसामर्थ्यं । अतएव भाराक्रान्तैः शनैः प्रययुः प्राप्ताः । अत्र पयोमुचां पङ्कभरणासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ६३ ॥

नभोनदीति । नभोनद्या व्यतिकरेणाकाशगङ्गाया अवगाहेन धौतमूर्त्तिभिः क्षालिताङ्गैः वियद्गतैः खेचरैः अतएव दिग्गजै रनधिगतानि अननुभूतचराणि चलच्चमूतुरगखुरैराहत अतएवोत्पतदुद्गच्छत् महीरजस्तेन स्नपनमभिषेचनं तेन यानि सुखानि तानि लेभिरे । कुञ्जराः पांसुवर्षणेत्युदाहृतम् । अत्रापि दिग्गजानां रजःस्नपनासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥६४॥

गजव्रजाक्रमणभरावनम्रया
रसातलं यदखिलमानशे भुवा ।
नभस्तलं बहुलतरेण रेणुना
ततोऽगमत्त्रिजगदिवैकतां स्फुटम् ॥६५॥

समस्थलीकृतविवरेण पूरिता
महीभृतामचलरजसा महागुहाः ।
रहस्त्रपाविधुरवधूरतार्थिनां
नभःसदामुपकरणीयतां ययुः ॥ ६६ ॥

गजेति । यद्यस्माद्गजव्रजानां आक्रमणभरेण पादक्षेपगौरवेणा वनम्रया भुवाखिलं रसातलं पातालमानशे व्याप्तम् । यद्यस्माच्च नभस्तलं बहुलतरेण रेणुनानशे ततः कारणात् त्रिजगत् जगत्त्रयम् । तद्धितार्थेत्यादिना समाहारे द्विगुरेकवचनम् । एकतां भूलोकता मिवागमत् । स्फुटमित्युत्प्रेक्षायाम् ॥ ६५ ॥

समेति । समस्थलीकृतानि विवराणि निम्नस्थानानि येन तेन चलरजसा पूरिताः महीभृतां भूधराणां महागुहाः । रहो रहसि । अत्यन्तसंयोगे द्वितीया । त्रपया विधुराणां विलक्षाणां वधूनां रतं सुरतमर्थयन्त इति तदर्थिनां नभःसदां सुराणां उपकरणीयता मुपकारकत्वं ययुः तासां रजःपूरणात्प्रकाशमन्धकरणादिति भावः । कृत्यल्युटोबहुलमित्यनीयरः कर्त्रर्थता । अत्र रजःपूरणस्य विशेषणगत्योपकारकहेतुत्वात काव्यलिङ्गभेदस्यापकारकत्वासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिरिति सङ्करः ॥ ६६ ॥

गते मुखच्छदपटसादृशीन्दृशः
पथस्तिरोदधति घने रजस्यपि।
मदानिलैरधिमधुचूतगन्धिभि
र्द्विपाद्विपानभिययुरेव रंहसा ॥ ६७ ॥
मदाम्भसा परिगलितेन सप्तधा
गजाञ्जनः शमितरजश्चयानधः।
उपर्य्यवस्थितघनपांशुमण्डला
नलोकयत्ततपटमण्डपानिव ॥ ६८ ॥

गतइति। छाद्यतेऽनेनेति छदः मुखस्य छदो मुखच्छदः। पुंसि संज्ञायां घः प्रायेणेति घप्रत्ययः छादेर्घेऽद्व्युपसर्गस्येति ह्रस्वः। स चासौ पटश्च तत्सादृशीं तत्सादृश्यं। ब्राह्मणादित्वात् ष्यञ्प्रत्यये षिद्गौरादिभ्यश्चेति ङीप् स च ष्यञ् षित्करणादीकारो बहुलमिति वामनवचनाद्वैकल्पिकः। गते प्राप्ते। गजानां युद्धपूर्व्वकाले मुखावरणकारणात् तत्सादृश्ये घने सान्द्रे रजसि दृशो दृष्टेः पथो मार्गान् तिरोदधति छादयति सत्यपि। अधिमधोः अधिकमकरन्दस्य चूतस्येव गन्धो येषां तैः। उपमानाच्चेति गन्धस्येत्वे तदेकान्तग्रहणं तु व्यभिचारि। मदानिलैरभिज्ञानैर्द्विपा गजा द्विपान् गजान् प्रति रंहसा वेगेनाभिययुरेव। अत्र तिरोहितदृष्टेरभियान विरोधस्य मदानिलैः परिहाराद्विरोधाभासोऽलङ्कारः ॥ ६७ ॥

मदाम्भसेति। सप्तधा। कराक्कटाभ्यां मेढ्राच्च नेत्राभ्यां च मदस्रुतिरिति पालकाप्ये। सप्तभिः स्रोतोभिः परिगलितेन स्रुतेन मदाम्भसा अधः शमितो रजश्चयो यस्मात् उपर्य्यवस्थितानि तथैव

अन्यूनोन्नतयोऽतिमात्रपृथवः पृथ्वीधरश्रीभृत
स्तन्वन्तः कनकावलीभिरुपमां सौदामिनीदामभिः।
वर्षन्तः शममानयन्नुपलसत् शृङ्गारलेखायुधाः
काले कालियकायकालवपुषः पांशून् गजाम्भोमुचः
॥ ६९ ॥

स्थितानि घनानि सान्द्राणि पांशुमण्डलानि पूर्वोक्तरजःपुञ्जा येषां तान् गजान् अतोलोकस्तताउपरि विततः पटमण्डपाः येषां तानिवेत्युत्प्रेक्षा। अलोकयत् ॥ ६८ ॥

अन्यूनेति। अन्यूनोन्नतयो महोच्छ्रायाः अतिमात्रपृथवोऽत्यन्त विपुलाः अतएव पृथ्वीधरश्रीभृतः शैलशोभाधारिण इति निदर्शनालङ्कारः। कनकावलीभिरावरणहेतुहेमराजिभिः करणैः। सुदाम्ना पर्व्वतेनैकदिक्षः सौदामिन्यो विद्युतः। तेनैकदिगित्यण् प्रत्यये ङीप्। ताभिर्दामभिरिव सौदामिनीदामभिर्विद्युल्लताभिः उपमां सादृश्यं तन्वन्तः। तडित्सौदामिनी विद्युदित्यमरः। अतुल्योपमाभ्यामिति सदृशवचनस्यैव निषेधादिह सादृश्यवाचित्वात् तृतीया। उपलसन्तः शृङ्गाराः सिन्दूरादिमण्डनान्येव लेखायुधानि सुरधनूंषि येषां ते तथोक्ताः। शृङ्गारः सुरते नाट्ये रसे च गजमण्डने। लेखो लेख्ये सुर इति च विश्वः। कालियस्य कालियनागस्य कायवत्कालवपुषः कृष्णदेहाः। गजा एव अम्भोमुचो मेघाः काले योग्यकाले वर्षन्तो मदाम्बु मुञ्चन्तः पांशून् शमं शान्तिं आनयन् प्रापयन्। रूपकालङ्कारः। शार्दूलविक्रीडितं वृत्तमुक्तम् ॥ ६९ ॥

इति श्रीमाघकृते शिशुपालवधे महाकाव्ये
यदुवंशक्षोभणोनाम सप्तदशः सर्गः ॥ १७ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ काव्यव्याख्याने सर्वङ्कषाख्ये सप्तदशः सर्गः ॥ १७ ॥

सञ्जग्माते तावपायानपेक्षौ
सेनाम्भोधी धीरनादौ रयेण ।
पक्षच्छेदात्पूर्वमेकत्र देशे
वाञ्छन्तौ वा विन्ध्यसह्यौ निलेतुम् ॥ १ ॥

अथास्मिन्सर्गे तुमुलयुद्धवर्णनाय सेनयोर्मेलनं तावदाह । संजग्माते इति । अपायोऽपगमो युद्धादपसरणं तस्मादनपेक्षौ तस्य निरपेक्षौ युद्धान्निवर्त्तिनावित्यर्थः । ईक्षतेः पचाद्यचि नञ्समासः । धीरनादौ गम्भीरघोषौ तौ सेनाम्भोधी सेनासागरौ । पक्षच्छेदात्पूर्वं पश्चादसम्भवादिति भावः । एकत्र देशे एकस्थाने निलेतुं वस्तुं । लिङ् गताविति धातोस्तुमुन्प्रत्यये गुणः । वाञ्छन्तौ इच्छन्तौ सह्यविन्ध्यौ वा सह्यविन्ध्याख्यौ पर्वताविव । वा स्याद्विकल्पोपमयोरिति विश्वः । सञ्जग्माते मिलितवन्तौ । संपूर्वाद्गच्छतेरकर्मकाल्लिटि समोगम्यृच्छित्यादिना आत्मनेपदम् । अत्र सह्यविन्ध्ययोरप्येकत्र मिलनस्याप्रसिद्धस्य सम्भावनामात्रेणोक्तत्वादुपमानाप्रसिद्धेर्नोपमा किं तूत्प्रेक्षेति सङ्क्षेपः । अस्मिन्सर्गे शालिनी वृत्तं । शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैरिति लक्षणात् ॥ १ ॥

सेनाम्भोधी संजग्माते इत्युक्तं तत्सङ्गतिप्रकारं तावद्दर्शयति । पत्तिरिति । पत्तिः पदातिः पत्तिं पदातिं । पदातिपत्तिपदगपदातिकपदातयइत्यमरः । एयाय प्राप । आङ्पूर्वादिणो लिट् । वाज्यश्वो वाहमश्वमेयाय । वाजिवाहार्वगन्धर्वा इत्यमरः । नागो गजो नागं एयाय । स्यन्दनस्थो रथस्थमेयाय न तु व्युत्क्रमेण धर्म्ययुद्धत्वादिति भावः । इतीत्थमुक्तरीत्या सेना रागादनुरागात्

वर्द्धावद्धा धारितेन प्रयाता
मश्वीयानामुच्चकैरुच्चलन्तः ।
रौक्मारेजुः स्थासका मूर्त्तिभाजो
दर्पस्येव व्याप्तदेहस्य शेषाः ॥ ५ ॥
सान्द्रत्वक्कास्तल्पलाश्लिष्टकक्षा
श्चाङ्गीं शोभामाभुवन्नश्चतुर्थीम् ।
कल्पस्यान्ते मारुतेनोपनुन्ना
स्त्वेनुस्यपङ्क्तिपाण्डुशैलाद्रदेभाः ॥ ६ ॥

श्वाभ्यां यञ्छावन्यतरस्यामिति कप्रत्ययः । उच्चकैरुच्चलन्तोगति
वशादूर्द्धमुत्पतन्तः । वर्द्धते इति वर्द्धाणि प्रयाणवल्गनवरत्राः ।
वर्द्ध चपवरत्रयोरिति विश्वः । इधुवधिवपिभ्योरन्निति रन्प्रत्ययः लघू
पधगुणोरपरः । तैर्व्वावद्धाः स्थापिता रौक्माः सौवर्णाः स्थासकाः
बुद्बुदाकारमण्डलानि व्याप्तदेहस्य सर्व्वाङ्गीणस्य मूर्त्तिभाजोमूर्त्ति
मतः दर्पस्यान्तरस्य तेजसः शेषाः अन्तरमानाद्दहिर्निर्गताः अति
रेकाइव रेजुरित्युत्प्रेक्षा ॥ ५ ॥

सान्द्रेति । सान्द्रत्वक्काः सान्द्रवर्म्माणः । शेषिकः कप्प्रत्ययः ।
तल्पलाः पृष्ठवंशाः तेषु श्लिष्टाः कक्षाः मध्यबन्धुवरत्रा येषां ते ।
दूष्या कक्षा वरत्रा स्यादित्यमरः । गजानां विभ्रत्युत्तरमताथुषां
द्वारश्च दशा भवन्ति तत्र चतुर्द्दशारूढाप्रौढशोभा । तदेवाह श्च
चतुर्थीमाङ्गीं शारीरीं शोभामाभुवन्नः चत्वारिंशद्वर्षदेश्या इत्यर्थः ।
इभाः गजाः कल्पस्यान्ते मारुतेनोपनुन्नाः प्रलयमारुतप्रेरिताः

सङ्क्रीडन्ती तेजिताश्वस्य रागा-
दुद्यम्यारामग्रकायोत्थितस्य ।
रंहोभाजामक्षधूः स्यन्दनानां
हाहाकारम्प्राजितुः प्रत्यनन्दत् ॥ ७ ॥

गजश्रेणाः कूलोपकारेव चलं नीत्वा चेलुः प्रतस्थिरे इत्युपमा ॥ ६ ॥

संक्रीडन्तीति । संक्रीडन्ती संघर्षात् कूजन्ती । समोऽकूजने च वक्तव्यमिति वचनात् कूजने क्रीडोऽनुसंपरिभ्यश्चेति नात्मनेपदम् । रंहोभाजां वेगभाजां स्यन्दनानां रथानामक्षस्य चक्राधारकाष्ठस्य धूरग्रमक्षधूः । अक्षं रथाङ्गमाधार इति वैजयन्ती । अनक्ष इति निषेधात् ऋक्पूरित्यादिना न समासान्तः । रागात् आर्त्या प्रतोदमुद्यम्य तेजिता उत्साहिता अश्वा येन तस्य अग्रं चासौ कायश्च उत्थितोऽयस्य तस्योत्थितपूर्वकायस्येत्यर्थः । आहिताग्न्यादित्वात्साधुः । प्राजितुः सारथेः । नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिरित्यमरः । हाहाकारमनुकारवदनुकरणार्थं हाहाशब्दं । एवकार इत्यस्यैवग्रहणस्योपलक्षणत्वात् अन्यथापि यथादर्शनं शब्दनिर्देशात्कारप्रत्ययः । अथवा हाहाकारं हाहाकरणं । भावे घञ्प्रत्ययः । प्रत्यनन्दत् साधुसाध्वित्यन्वमोदत । किमित्युत्प्रेक्षा ॥ ७ ॥

कुर्व्वाणानामिति । उच्चैरुन्नताः केतनानां ध्वजस्तम्भानां पताकावैजयन्त्यः साम्परायान्तरायं युद्धविघ्नं कुर्व्वाणानां । अनीकं साम्परायिकमित्यमरः । भूरेणूनां मार्ज्जनाय प्रमार्ज्जनार्थं मरुता चञ्चलकेनाहूयमानाः प्रकम्प्यमानाः संमार्ज्जन्यः शोधिन्य

कुर्व्वाणानां साम्परायान्तराय
भूरेणूनामत्युना मार्ज्जनाय ।
सम्मार्ज्जन्यो न्यूनमुद्धूयमाना
भान्ति स्मोच्चैः केतनानां पताकाः ॥ ८ ॥

उद्यन्नादन्धन्विभिर्निष्ठुराणि
स्थूलान्युच्चैर्म्मण्डलत्वन्दधन्ति ।
आस्फाल्यन्ते कार्म्मुकाणि स्म कामं
हस्त्यारोहैः कुञ्जराणां शिरांसि ॥ ९ ॥

इव भान्ति स्म । सम्मार्ज्जनी शोधनी स्यादित्यमरः । न्यूनमित्युत्प्रेक्षा ॥ ८ ॥

उद्यन्नादमिति । धन्विभिर्धनुष्मद्भिः । व्रीह्यादित्वादिनि प्रत्ययः । निष्ठुराणि कर्क्कशानि स्थूलानि पीवराणि उच्चैरुन्नतानि मण्डलत्वं दधन्ति वर्त्तुलत्वं दधानानि । एकत्राकर्षणादन्यत्र स्वभावाच्चेति भावः । कर्म्मणि प्रभवन्तीति कार्म्मुकाणि धनूंषि । उक्तञ्च । उद्यन्नादमुज्जृम्भमाणघोषं यथा तथा काममास्फाल्यन्ते स्म पाटवपरीक्षार्थं पाणिभिरास्फालितानि । हस्तिनं रोहन्ति इति हस्त्यारोहैर्निषादिभिः । कर्म्मण्यण् । कुञ्जराणां शिरांसि चास्फाल्यन्ते स्म उत्साहार्थमिति भावः । अत्र कार्म्मुकाणां कुञ्जरशिरसाञ्च प्रकृतानामेव निष्ठुरत्वादिविशेषणसाम्येनौपम्यावगमात् केवलप्रकृतास्पदा तुल्ययोगिता ॥ ९ ॥

घण्टानाद इति । घण्टानादः किङ्किण्यादिघोषः शिञ्जितानां वाद्यविशेषाणां निस्वनः । ग्रीवासु भवानां ग्रैवेयाणां कण्ठसूत्राणां

घण्टानादैर्निस्वनैर्डिण्डिमानां
ग्रैवेयाणामारवैर्बृंहितानि ।
आमेत्येवम्प्रत्यवोचन् गजाना
मुत्साहार्थं वाचमाधोरणस्य ॥ १० ॥

यातैश्चातुर्विध्यमस्त्रादिभेदा
दभ्यस्यद्भिः सौष्ठवाल्लाघवाच्च ।
शिक्षाशक्तिं प्राहरन्दर्शयन्तो
मुक्तामुक्तैरायुधैरायुधीयाः ॥ ११ ॥

ग्रीवाभ्यश्चेति ढक् प्रत्ययः । आरवैः । बृंहितानि बृंहणानि गजानां उत्साहार्थमाधोरणस्य हस्तिपकस्य । आधोरणा हस्तिपका इत्यमरः । वाचं बृंहणादिशब्दं आमेति प्रत्यवोचन्निवैवमेवेत्यनुकूलमूचिरे इवेत्युत्प्रेक्षा । आमानुगुण्ये स्मरणे इत्यमरः ॥ १० ॥

यातैरिति । आयुधेन जीवन्तीत्यायुधीयाः आयुधजीविनः शस्त्राजीवे काण्डपृष्ठायुधीयायुधिकाः समा इत्यमरः । आयुधाच्छेति छप्रत्ययः । शिक्षाशक्तिमभ्यासपाटवं दर्शयन्तः अस्त्रादिभेदादस्त्रमस्त्रादिकभेदाच्चातुर्विध्यं यातैः प्राप्तैः । सुष्ठुभावः सौष्ठवं नैपुण्यादिगुणवत्त्वं तस्मात् । उद्गात्रादित्वादञ् प्रत्ययः । लाघवाद्वेगवत्त्वाच्च । इगन्ताच्च लघुपूर्वादित्यण् प्रत्ययः । अभ्यस्यद्भिरप्रतिषिद्धैः मुच्यन्त इति मुक्तानि शरादीनि न मुच्यन्त इत्यमुक्तानि खड्गादीनि च तैस्तैर्मुक्तामुक्तैरिति द्वन्द्वः । आयुधैः प्राहरन् । स्वभावानुमानयोः संसृष्टिः ॥ ११ ॥

रोषावेशादाभिमुख्येन कौचि
त्पाणिग्राहं रंहसैवोपयातौ ।
हित्वा हेतीर्मल्लवन्मुष्टिघातं
घ्नन्तौ बाहूबाहवि व्यासृजेताम् ॥ १२ ॥

रोषावेशादिति । कौचिद्योधौ रोषावेशाद्रोषपारवश्यादाभिमुख्येन रंहसा वेगेनैवोपयातौ मिथःप्रत्यासन्नौ अतएव पाणिग्राहमन्योन्यं पाणिं गृहीत्वा । द्वितीयायां चेति णमुल्प्रत्ययः । हेतीः शस्त्राणि हित्वा त्यक्त्वा वैकल्यादिति भावः । हेतिस्तु शस्त्रे द्वयोरिति केशवः । मल्लवन्मल्लाभ्यां तुल्यं । तेन तुल्यमिति वतिप्रत्ययः । मुष्टिघातं मुष्टिभिर्हत्वा । करणे हनइति णमुल्प्रत्ययः । घ्नन्तौ प्रहरन्तौ । हन्तेर्लटः शत्रादेशः कषादित्वादनुप्रयोगः । मुष्टिभिर्घ्नन्तावित्यर्थः । बाहुभ्यां बाहुभ्यां प्रहृत्य प्रवृत्तमिदं युद्धं बाहूबाहवि बाहुयुद्धं । तत्र तेनेदमिति सरूपे इति बहुव्रीहाविच् कर्मव्यतीहारइतीच्प्रत्ययः समासान्तः अन्येषामपि दृश्यतइति दीर्घः तिष्ठद्गुप्रभृतिषु पाठादव्ययीभावत्वादव्ययत्वम् । तत्र व्यासृजेतां व्यासक्तवन्तौ । कर्त्तरि कर्मव्यतीहारइत्यात्मनेपदम् । मल्लवदिति तद्धितगता श्रौती पूर्णोपमा ॥ १२ ॥

शङ्का इति । शङ्का निर्विषाः न फणिभिर्नापि दग्धैर्नाग्निज्वलिततेजोभिरिति निषेधादिति भावः । अन्यत्र आत्येत्यर्थः । कश्चित्कुत्रापि सङ्गं प्रतिबन्धं न प्राप्नवन्तः न प्राप्ताः दुर्वारा इत्यर्थः । दूराच्छुताद्दूरत एव विसृष्टाः । स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेनेति समासः पञ्चम्याः स्तोकादिभ्यइत्यलुक् । श्रोतॄणां श्रवणं

शुद्धाः सङ्गं क्वचित्प्राप्तवन्तो
दूरान्मुक्ताः शीघ्रतान्दर्शयन्तः ।
अन्तःसैनं विद्विषामाविशन्तो
युक्तञ्चक्रुः सायकावाजितायाः ॥ १३ ॥
आक्रम्याजेरग्रिमस्कन्धमुच्चै
रास्थायायो वीतशङ्कं शिरश्च ।
हेलालोलावर्त्म गत्वातिमर्त्यं
द्यामारोहन्मानभाजः सुखेन ॥ १४ ॥

दर्शयन्तः । विद्विषां सेनास्वन्तः अन्तःसैनम् । विभक्त्यर्थेऽव्ययी भावः । आविशन्तः सेनामध्यं प्रविशन्त इत्यर्थः । सायकाः बाणाः । वाजितायाः पक्षवत्तायाः अश्वत्वस्य च । वाजिता स्वनपक्षयो रिति विश्वः । युक्तमनुरूपं कर्म चक्रुः । एवंविधसेनाप्रवेशस्य वाजिनामेव संभवादिति, भावः । अश्वाभिधायाः प्रकृतपक्षता माचोपक्षीणत्वाद्वाजिताशब्देन प्रकृतस्यैव प्रतीतेः ध्वनिरेवेति न श्लेषावकाशः किन्तु शुद्धादिपदार्थपुञ्जविशेषणगत्या सायकानां युक्तकारिताहेतुत्वात् पदार्थहेतुककाव्यलिङ्गम् ॥ १३ ॥

आक्रम्येति । मानभाजोऽभिमानवन्तः । उच्चैरुन्नतं आजेर्युद्धस्याग्रिमस्कन्धमग्रभागरूपप्रदेशं आक्रम्यारश्च वीतशङ्कं शिरःकम्पं उत्तमकायं चास्थायारश्च हेलासु युद्धक्रीडासु लीलासु च लोला उत्सुकाः सन्तः अतिमर्त्यं गत्वा अमानुष्यं युद्धं कृत्वेत्यर्थः । अन्यथा मानुषगम्यमारोहणमार्गं गत्वा सुखेनानायासेन द्यां स्वर्गमभ्यरुहन् गिरिशिखरादि क्रीडास्थानं । द्यौः स्वर्गसुरवर्त्मनोरिति विश्वः ।

रोदोरन्ध्रं व्यश्नुवानानि लोके
रक्तस्यान्तर्मापितैः स्थावराणि ।
केचिद्गुर्वीमेत्य संयन्निषद्यां
क्रीणन्ति स्म प्राणमूल्यैर्यशांसि ॥ १५ ॥

आरोहणमारूढाः । युद्ध्यमानाः परं शस्त्राः स्वर्गं यान्त्यपराङ्मुखाः इति मनुस्मरणादिति भावः । यथा कश्चित्कश्चित् स्कन्धमूर्द्धारोहण क्रमेण किञ्चिदुच्चारोहमद्रितटादिकमारोहति तद्वदिति प्रकृत विशेषणमहिम्नागता समासोक्तिः ॥ १४ ॥

रोदोरन्ध्रमिति । केचिद्वीराः गुर्वीं महतीं संयतो युध एव निषीदन्त्यस्यामिति निषद्यां आपणम् । आपणस्तु निषद्याया मित्यमरः । संज्ञायां समजनिषदेत्यादिना क्यप् । एत्य प्राप्य । आङ्पूर्वादिणः क्त्वो ल्यप् । देहस्यान्तरभ्यन्तरे मापितैः परि च्छिन्नैः । मातेर्माङो वा ण्यन्तात्कर्मणि क्तः । अर्त्तिह्रीत्यादिना पुगा गमः । लोलैरस्थिरैः प्राणैरेव मूल्यैः प्राणमूल्यैः रोदसोर्द्यावा पृथिव्योरन्ध्रमन्तरालं व्यश्नुवानानि व्याप्नुवन्ति । अश्नोतेर्लटः शानजादेशः । स्थावराणि स्थिराणि यशांसि क्रीणन्ति स्म स्वीचक्रु रित्यर्थः । अत्र न्यूनैः प्राणैः ततोऽधिकयशःपरिवर्त्तनात् न्यून परिवृत्तिरलङ्कारः । समन्यूनाधिकानां च यदा विनिमयो भवेत् । वाकं समाधिकन्यूनैः परिवृत्तिरसौ मतेति लक्षणात् ॥ १५ ॥

वीर्य्योत्साहेति । संग्रामाये रणाग्रे वीर्य्योत्साहाभ्यां श्लाघ्यते इति श्लाघि विक्रमाच्चकारशोभि । अवदानं महत्कर्म कृत्वा । अवदानं कर्मवृत्तमित्यमरः । लज्जितानां मानित्वात्

वीर्य्योत्साहश्लाघि कृत्वावदानं
सङ्ग्रामाग्रे मानिनां लज्जितानाम्।
अज्ञातानां शत्रुभिर्युक्तमुच्चैः
श्रीमन्नाम श्रावयन्ति स्म नग्नाः ॥१६॥

आधावन्तस्सम्मुखं धारितानां
मन्यैरन्ये तीक्ष्णकौक्षेयकाणाम्।
वक्षःपीठैराशु रोरात्मनैव
क्रोधेनान्धाः प्राविशन्पुष्कराणि ॥१७॥

स्वनामाख्याने सङ्कोचवतामित्यर्थः । शत्रुभिरज्ञातानां अज्ञात नामकानां मानिनां मानशालिनां शूराणां सम्बन्धि श्रीमत् शौर्य्य श्रीयुक्तं नाम नग्नाः वन्दिनः। वन्दिनि नपणे नग्नइति विश्वः । उच्चैः श्रावयन्ति स्म अयमसाविति कथयामासुरित्यर्थः । युक्तं सर्व्वमेतदुचितमित्यर्थः । अत्र लज्जमानाज्ञातयोर्विशेषणगत्या वन्दिश्रावणहेतुत्वात्काव्यलिङ्गभेदः ॥ १६ ॥

आधावन्तइति। क्रोधेनान्धाः अपश्यन्तोऽन्ये भटाः आधावन्तो ऽभिमुखमापतन्तः सन्तः अन्यैः सैन्यैः प्रतिद्वन्द्वाभिसम्मुखं धारितानां धृतानां तीक्ष्णकौक्षेयकाणां निशितासीनां । कुक्षकुक्षिग्रीवाभ्यः श्वाख्यालङ्कारेष्विति ढकञ्प्रत्ययः। पुष्कराणि फलानि खड्गमुखानी त्यर्थः । पुष्करं तूर्य्यवक्त्रे च काण्डे खड्गफलेऽपि चेति विश्वः। वक्षांसि पीठानीव वक्षःपीठैः वक्षःस्थलैः आत्सरोरामुष्टेः। त्सरुः खड्गादिमुष्टौ स्यादित्यमरः । आङ् मर्य्यादाभिविध्योरिति विकल्पादव्ययीभावः । आत्मना स्वयमेव परप्रेरणं विनेत्यर्थः ।

मिश्रीभूते तत्र सैन्यद्वयेऽपि
प्रायेणायं व्यक्तमासीद्विशेषः ।
आत्मीयास्ते ये पराञ्चः पुरस्ता
दभ्यावर्ती सम्मुखोयः परोऽसौ ॥ १८ ॥
खड्गत्वादङ्गसंसङ्गिनीत्वं
नीत्वा कामं गौरवेणावबद्धा ।
नीता स्वत्वं वञ्चयित्वा परेण
द्रोहश्चक्रे कस्यचित्स्वा कृपाणी ॥ १९ ॥

प्राविशन् प्रविष्टाः । अत्र क्रोधान्धविशेषणगत्या पुष्करप्रवेशहेतुत्वात् काव्यलिङ्गभेदः ॥ १७ ॥

मिश्रीभूत इति । तत्र युद्धे सैन्यद्वयेऽपि मिश्रीभूते मिलिते सति प्रायेणायं विशेषोऽसाधारणधर्मो व्यक्तमासीत् । क इत्याह । पुरस्तादपि ये पराञ्चः पराङ्मुखाः परेऽपीति भावः । ते आत्मीया अवध्या इत्यर्थः । न भीतं न पराङ्मुखमिति वधनिषेधस्मरणात् । यः पुरस्तादभ्यावर्ती परावर्ती सम्मुखोऽभिमुखः स्वकीयोऽपीति भावः । असौ परः शत्रुर्वध्य इत्यर्थः । प्राणलुब्धस्य स्वामिद्रोहित्वादित्यर्थः ॥ १८ ॥

खड्गेति । खड्गत्वात्कुड्याकरत्वात्कुलीनत्वाच्चाङ्गसंसङ्गिनीत्वमङ्गसम्बन्धित्वं नीत्वा । अगुणत्वविवक्षायां त्वतलोर्गुणवचनस्येति न पुंवद्भावः । कामं गौरवेणादरेणावबद्धा संयता च कस्यचित्स्वा स्वकीया कृपाणी असिलता । परेणान्येन वञ्चयित्वा प्रतार्य स्वत्वं नीता स्वायत्तीकृता सती द्रोहं हिंसां व्यभिचारं च चक्रे कृतवती ।

नीते भेदं धौतधाराभिघाता-
दम्भोदाभे शात्रवेणापरस्य ।
सान्द्रराजिस्तीक्ष्णमार्गस्य मार्गो
विद्युद्दीप्तः कङ्कटे लक्ष्यते स्म ॥ २० ॥
आमूलान्तात्सायकेनायतेन
स्यूते बाहौ मण्डुकश्लिष्टमुष्टेः ।
प्राप्यासह्यां वेदनामस्तधैर्य्या-
दप्यभ्रश्यच्चर्म नान्यस्य पाणेः ॥ २१ ॥

अत्र प्रकृतकृपाणीविशेषणसाम्यादप्रकृतस्वैरिणीप्रतीतेः समासोक्तिः ॥ १८ ॥

नीतइति । शात्रवेण शत्रुणा । प्रज्ञादित्वात् स्वार्थेऽण्प्रत्ययः । धौताया उत्तेजितायाः धारायाः खड्गधारायाः अभिघातात् भेदं नीते विदारिते अम्भोदाभे मेघश्यामे अपरस्य भटस्य कङ्कटे कवचे । उरश्छदः कङ्कटकोऽजगरः कवचोऽस्त्रियामित्यमरः । सहाख्याच्छा सान्द्रराजिः सरन्ध्ररेखः तीक्ष्णमार्गस्य खड्गस्य मार्गः प्रहारो विद्युद्दीप्तस्तडिदुज्ज्वलो लक्ष्यते स्म । उपमालङ्कारः ॥ २० ॥

आमूलान्तादिति । अन्यस्य भटस्य बाहौ आयतेन दीर्घेण सायकेन आमूलान्तात् मूलप्रदेशपर्य्यन्तं आकण्ठमित्यर्थः । विकल्पादसमासः । स्यूते प्रोते सति असह्यां वेदनां व्यथां प्राप्य अतएवास्तधैर्य्यात्त्यक्तधैर्य्यादपि धारयितुमक्षमादपि मण्डुके लग्ने श्लिष्टा संश्लिष्टा मुष्टिर्यस्य तस्मात्पाणेश्चर्म फलकं । फलकोऽस्त्री

भित्त्वा घोणामायसेनाधिवक्त्रं
सूरीपृष्ठो गार्ध्रपक्षेण विद्धः ।
शिक्षाहेतोर्गाढरज्ज्वेव बद्धो
वर्त्तुं वक्त्रं नाशकद्दुर्मुखोऽपि ॥ २२ ॥

फलं चर्म्म त्सरुर्मुष्टिरस्य त्सरुरित्यमरः । नाभ्रश्यन्नापतत् । अत्र सायकप्रोतमुष्टिस्फरयोर्विशेषणगत्या धैर्य्यत्यागचर्म्मभ्रंशौ प्रति हेतुत्वात्काव्यलिङ्गभेदः ॥ २१ ॥

भित्त्वेति । आयसेनायोमयेन गार्ध्रो गृध्रसम्बन्धी पक्षः पत्रं यस्य तेन गार्ध्रपक्षेण बाणविशेषेण घोणां नासां भित्त्वा । घोणा नासा च नासिकेत्यमरः । अधिवक्त्रं वक्त्रे इति । विभक्त्यर्थेऽव्ययीभावः । विद्धः प्रहृतः । व्यधेः कर्म्मणि क्तः ग्रहिज्येत्यादिना सम्प्रसारणम् । सूरीपृष्ठोऽनवारूढोऽश्वः शिक्षैव हेतुः तस्य शिक्षाहेतोः शिक्षया निमित्तेन शिक्षार्थमिति यावत् । षष्ठी हेतुप्रयोगे इति षष्ठी । गाढरज्ज्वा गाढपाशेन बद्ध इवेत्युत्प्रेक्षा । दुर्मुखोऽप्यशिक्षितमुखोऽपि वक्त्रं वर्त्तुमपाक्रष्टुं नाशकत् न शक्तः । शकेर्लुङि पुषादित्वात् च्लेरङादेशः । शिक्षितो हि शिक्षावशाद्बद्धोऽपि बद्धवदास्ते अशिक्षितस्तु निबद्धोऽपि झटिति तुरगमपहरतीति भावः । अपिर्विरोधे । अतएव विरोधाभासोऽलङ्कारः ॥ २२ ॥

कुन्तेनेति । आजानेयः कुलीनाश्वः । आजानेयाः कुलीनाः स्युरित्यमरः । शुभ्रादिभ्यश्चेति ढक्प्रत्ययः । सादिना अश्वारोहेण कर्त्रा । उच्चैरुन्नतेन कुन्तेन प्रासेन करणेन हन्तुं प्रहर्त्तुमिष्टादभिप्रेतात् हस्तिनोऽन चलति स्म न चचाल । वा भावेत्यादिना सम्

कुन्तेनोच्चैः सादिना हन्तुमिष्टा
नाजानेयो दन्तिनस्त्रस्यति स्म ।
कर्म्मोदारङ्कीर्त्तये कर्त्तुकामान्
किं वा जात्याः स्वामिनो ह्रेपयन्ति ॥ २३ ॥
जेतुं जैत्राः शेकिरे नारिसैन्यैः
पश्यन्तोऽधो लोकमस्तेषुजालाः ।
नागारूढाः पार्व्वतानि श्रयन्तो
दुर्गाणीव व्यासहीनास्त्रसानि ॥ २४ ॥

प्रत्ययः । तथा हि जात्याः कुलीनाः । भवार्थे यत्प्रत्ययः । कीर्त्तये उदारं कर्म्म महापौरुषं कर्त्तुं कामो येषां तान् कर्त्तुकामान् । तुं काममनसोरपीति मकारलोपः । स्वमेषामस्तीति स्वामिनो भर्तॄन् । स्वामिन्नैश्वर्य्ये इति निपातः । ह्रेपयन्ति लज्जयन्ति किं न ह्रेपयन्तीत्यर्थः । अर्त्तिह्रीत्यादिना पुगागमः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ २३ ॥

जेतुमिति । जेतार एव जैत्राः जयशीलाः । जेतृप्रकृतेः प्रज्ञादित्वात्स्वार्थेऽण्प्रत्ययः । लोकं जनमधः पश्यन्तः स्वयमुपर्य्येव स्थानात् लोकमधोदेशे पश्यन्तः अधःकृतं मन्यमानाश्च । अस्तेषु जालाः क्षिप्तशरनिकराः व्यासहीनाद्दुर्गस्थत्वान्निर्भीकाः । नागारूढाः गजारोहाः त्रसन्ति गच्छन्तीति त्रसानि जङ्गमानि । चरिष्णु जङ्गमचरत्रसमिङ्गं चराचरमित्यमरः । पार्व्वतानि पर्व्वतसम्बन्धीनि दुर्गाणि गिरिदुर्गाणीत्यर्थः । श्रयन्तोऽधितिष्ठन्त इव इत्युत्प्रेक्षा । तेऽप्येवंभूता एवेति भावः । अरिसैन्यैः कर्त्तृभिः

विष्वद्रीचीर्विक्षिपन्सैन्यवीचीराजावन्तः क्वापि दूरं प्रयातम्।
बभ्रामैको बन्धुमिष्टं दिदृक्षुः
सिन्धौ वाद्योमण्डलक्षोवराहः ॥ २५ ॥

जेतुं न शेकिरे समर्था नाभूवुरित्यर्थः । शकेः कर्मणि लिट् । अत्र मनुः । धनुर्दुर्गं महीदुर्गमब्दुर्गं वनमेव च । न्दुर्गं गिरिदुर्गं च समाश्रित्य वसेन्नृपः । सर्व्वेणैव प्रकारेण गिरिदुर्गं समाश्रयेत्। तेषां हि बहुगुण्येन गिरिदुर्गं विशिष्यते इति ॥ २४ ॥

विष्वगिति । एकः कोऽपि वीरः । विष्वगञ्चतीति विष्वद्रीचीः सर्व्वव्यापिनीः । विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये इति टेर द्र्यादेशः धातोरप्यञ्चतेरुपसङ्ख्यानादुगितश्चेति ङीप् अच इत्यकार लोपे चाविति दीर्घः । सैन्यानि वीचिरिव सैन्यवीचीरित्युपमित समासः । सिन्धौ चेति लिङ्गात् विक्षिपन्नपाकुर्व्वन् । अन्तः आजि मध्ये क्वापि दूरं प्रयातं इष्टं बन्धुं दिदृक्षुर्द्रष्टुमिच्छुः सन् । दृशेः सन्नन्तादुप्रत्ययः । क्वापि प्रयातं मग्नं भौमं गोर्मण्डलं भूगोलं दिदृक्षुरादिवराहः सिन्धौ वा समुद्रे इव । उपमायां विकल्पे वेत्यमरः । आजौ बभ्राम एकवीरस्य कुतोभयमित्यर्थः ॥ २५ ॥

यावदिति । व्युत्थानं गजोत्थापनं जानातीति व्युत्थानज्ञः हस्तिनि चरतीति हस्तिचारी यन्ता । मदस्य बोधनायोत्थाप नायाञ्जनमुद्दीपनं कर्म यावत् चक्रे तावत् प्रागेव । असमाप्ते विधा वित्यर्थः । वेनाज्ञानात्तेनाकलकलश्रवणादित्यर्थः । द्विनिना मात्मना स्वयमेव व्यूत्थानमत्योदानलुब्धामदचरितः प्रावर्त्त्

यावच्चकेनाञ्जनबोधनाय
व्युत्थानमोऽस्तिचारी मदस्य ।
सेनाखानाहन्तिनामात्मनैव
स्थूलास्तावत्प्रावहन्दानकुल्याः ॥ २६ ॥

क्रुध्यन् गन्धादन्यनागाय दूरा
दारोढारन्धूतमूर्द्धावमत्य ।
घोराराविध्वानिताशेषदिक्के
विष्के नागः पर्यणंसीत्स्वएव ॥ २७ ॥

इति दन्तिनामुत्साहातिरेकोक्तिः अञ्जनात् प्रवृत्तमदमत्वोक्ते रतिशयोक्तिः ॥ २६ ॥

क्रुध्यन्निति । दूरात् दूरतएव गन्धात् मदगन्धाघ्राणात् अन्यनागाय प्रतिगजाय क्रुध्यन् तं जिघांसुरित्यर्थः । क्रुधद्रुहे त्यादिना सम्प्रदानत्वम् । नागोधूतमूर्द्धा विधूतमस्तकः सन् । आरोढारं यन्तारं अवमत्य अवधूय । घोरारावैर्दारुणकन्दनैः ध्वानिताशेषदिशो येन तस्मिन् तथा उच्चैराक्रोशतीत्यर्थः । शेषिकः कप्प्रत्ययः । स्वे स्वकीयएव स्वपुत्रएवेत्यर्थः । पूर्व्वादिभ्यो नवभ्योवेति विकल्पात् स्मिन्नादेशः । अतएव स्वे स्वपुत्रे विष्के इति श्लिष्टगत्या व्याख्याय पुत्रस्यापि ज्ञातित्वात् सर्वनामसंज्ञेति वल्लभोक्तिः प्रामादिकी । विष्के विंशतिवर्षके द्विपे । विष्कोविंशतिवर्षक इति वैजयन्ती । पर्य्यणंसीत् तिर्य्यक् प्रजहारेत्यर्थः । तिर्य्यग्दन्त प्रहारस्तु गजः परिणतोमतइति हलायुधः । यमरमनमातां सक्चेति नमेर्लुङि सगिडागमौ नेटीति वृद्धिप्रतिषेधः ॥ २७ ॥

प्रत्यासन्ने दन्तिनि प्रातिपक्षे
यन्त्रा नागः प्रास्तवक्त्रच्छदोऽपि ।
क्रोधाक्रान्तः क्रूरनिर्दारिताक्षः
प्रेक्षाञ्चक्रे नैव किञ्चिन्मदान्धः ॥ २८ ॥

तूर्णं यावन्नापनिन्ये निषादी
वासश्चक्षुर्वारणं वारणस्य ।
तावत्पूगैरन्यनागाधिरूढः
काद्म्बानामेकपातैरसीव्यत् ॥ २९ ॥

प्रत्यासन्न इति । प्रातिपक्षे प्रतिपक्षसम्बन्धिनि । तस्येद मित्यण् । दन्तिनि गजे प्रत्यासन्ने सति यन्त्रा सादिना प्रास्तवक्त्र च्छदोऽपि निरस्तमुखपटोऽपि क्रोधाक्रान्तः अतएव क्रूरं घोरं निर्दारिताक्षः तथापि मदान्धो नागो गजो न किञ्चिदेव प्रेक्षां चक्रे । किमपि पुरोगतं प्रातिपक्षमन्यद्वा न ददर्शेत्यर्थः । आवरणान्तराभावेऽपि मदावरणस्यानपायादिति भावः । इजा देश्च गुरुमतोऽनृच्छ इत्याम्प्रत्ययः । अत्रावरणान्तोन्मीलिताक्ष स्याप्यदर्शनविरोधस्य मदान्धेनाविरोधाद्विरोधाभासोऽलङ्कारः ॥ २८ ॥

तूर्णमिति । निषादी यन्त्रा वारणस्य गजस्य चक्षुर्वारणं नेत्रा वरणं वासो मुखपटं यावत्तूर्णं नापनिन्ये नापचकार तावदन्य नागाधिरूढः प्रतिगजाधिरोहः एकः एककालीनः पातो येषां तैरेकपातैर्युगपत्पातिभिरिति क्षीरस्वामी । काद्म्बानां शराणां । कादम्बमार्गणशराइत्यमरः । पूगैर्व्रातैरसीव्यत् ।

आस्यद्दृष्टेराच्छदञ्च प्रमत्तो
यन्ता यातुः प्रत्यरीभं द्विपस्य ।
मग्नस्योच्चैर्बर्हभारेण शङ्को
रावव्राते वीक्षणे च क्षणेन ॥ ३० ॥

यत्नाद्रक्षन्सुस्थितत्वादनाशं
निश्चित्यान्यश्चेतसा भावितेन ।
अन्त्यावस्थाकालयोग्योपयोग
न्दध्रेऽभीष्टं नागमापद्धनं वा ॥ ३१ ॥

चक्षुषा सह तद्वासः स्यूतवानित्यर्थः । सीव्यतेर्लङ् । अत्र चक्षुःसीवनासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ २८ ॥

आस्यदिति । यन्ता प्रमत्तः सन् प्रत्यरीभमरिगजम्प्रति । आभिमुख्येऽव्ययीभावः । यातुर्गन्तुः । यातेस्तृच् । द्विपस्य दृष्टेराच्छदमावरणं । पुंसि संज्ञायां घः । आस्यत् निरस्तवान् । अस्यतिवक्तिख्यातिभ्योऽङिति च्लेरङादेशः अस्यतेस्थुगिति थुगागमः । मग्नस्य मुखनिमग्नस्य शङ्कोः शल्यायुधस्य । वा पुंसि शल्यं शङ्कुर्नेत्यमरः । उच्चैर्बर्हभारेण पिच्छपटलेन वीक्षणे चक्षुषी क्षणेनावव्राते आवृते । वृणोतेः कर्मणि लिट् । अन्योन्यसमुच्चयचकाराभ्यामावरणनिरासे पुनरावरणयोरेककाले सम्बन्धोक्तेरतिशयोक्तिः ॥ ३० ॥

यत्नादिति । अन्यः गजारोहः भावितेनालोचितेन चेतसा सुस्थितत्वादनपायित्वादनाशमनपायं निश्चित्य यत्नाद्रक्षन् वधकेभ्यस्त्रायन् सन् । अन्त्यावस्थाकाले साधनान्तराभावे नाशकाले योग्योपयोगं अत एवाभीष्टं नागं गजमापद्धनं वापद्धनमिव दध्रे

अन्योन्येषाम्पुष्करैरामृशन्तो
दानोद्भेदानुच्चकैर्भुग्नवालाः ।
उन्मूर्द्धानः सन्निपत्यापरान्तैः
प्रायुध्यन्त स्पष्टदन्तध्वनीभाः ॥ ३२ ॥
द्राघीयांसः संहताः स्थेमभाज
श्चारूदग्रास्तीक्ष्णतामत्यजन्तः ।
दन्तादन्तैराहतास्सामजाना
म्भङ्गञ्जग्मुर्न स्वयं सामजाताः ॥ ३३ ॥

अन्यतोपसार्य्य धारयामास । धरतेः स्वरितेत्वात्कर्त्तरि लिट् तङ् ॥ ३१ ॥

अन्योन्येषामिति । इभा गजाः अन्योन्येषां परस्परेषां । कर्म्मव्यतीहारे सर्व्वनाम्नो द्वे भवत इति वक्तव्यात् द्वित्वं । समासवच्च बहुलमिति विकल्पादसमासत्वपक्षे पूर्व्वपदस्य प्रथमैकवचनं वक्तव्यम् । उद्भिद्यन्ते एष्विति उद्भेदाः । अकर्त्तरि च कारके संज्ञायामित्यधिकरणार्थे घञ्प्रत्ययः । दानोद्भेदान् कटादिमदस्थानानि पुष्करैर्हस्ताग्रैः । पुष्करं करिहस्ताग्रमित्यमरः । आमृशन्तोऽभिघ्नन्त उच्चकैरुन्नताभुग्नवालाः प्रक्षोभितपुच्छाः । वालः केशे शिशौ मूर्खे वालोवालेभपुच्छयोः । उन्मूर्द्धानः उन्नतमस्तकाः सन्तः स्पष्टदन्तध्वनि यथा तथा सन्निपत्यापरान्तैः सह प्रायुध्यन्त । दिवादियुध्यतेः कर्त्तरि लङ् । स्वभावोक्तिः ॥ ३२ ॥

द्राघीयांस इति । द्राघीयांसो दीर्घतराः । प्रियस्थिरेत्यादिना दीर्घस्य ईयसुनि द्राघादेशः । संहताः सुघटिताः अतएव

मातङ्गानान्दन्तसङ्घट्टजन्मा
हेमच्छेदच्छायचञ्चच्छिखाग्रः ।
लग्नोऽप्यग्निश्चामरेषु प्रकाम
म्माञ्जिष्ठेषु व्यज्यते न स्म सैन्यैः ॥३४॥

स्थेमभाजः स्थैर्यभाजः । प्रियस्थिरेत्यादिना स्थिरशब्दस्य स्थेमन् स्थ्यादेशः । चारवोरम्याउदयाउन्नताः ते चारूदयाः । विशेषण समासः । तीव्रतां नैशित्यं अत्यन्तः सामजानां गजानां दन्ता दन्तैः प्रतिगजविषाणैराहताः सन्तोभङ्गं भेदं जग्मुः बभञ्जुः । सामजाताः दन्तिनस्तु स्वयं भङ्गं पराजयं न जग्मुः दन्तभङ्गेऽपि स्वयं न परावर्त्तन्तइत्यर्थः । अत्रापरावर्त्तित्वेन वर्णनतया प्रकृतत्वा दुपमेयानां दन्तिनामुपमानदन्तापेक्षया आधिक्येनाधिक्योक्ते र्व्यतिरेकस्तुल्ययोगितायाबाधकइति गमयितव्यम् ॥ ३३ ॥

मातङ्गानामिति । मातङ्गानां दन्तिनां दन्तसङ्घट्टजन्मा दन्त सङ्घर्षोत्थः हेमच्छेदच्छायानि कनकपरागवर्णानि चञ्चन्ति चलन्ति च शिखाग्राणि ज्वालाग्राणि यस्य सोऽग्निः मञ्जिष्ठया ओषधि विशेषेण रक्तेषु माञ्जिष्ठेषु । तेन रक्तं रागादित्यण्प्रत्ययः । मञ्जिष्ठा विकसा जिङ्गीत्यमरः । चामरेषु लग्नोऽपि सैन्यैः प्रकामं न व्यज्यते न विविच्यते स्म सावर्ण्यादिति भावः । अतः सामान्यालङ्कारः । सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् । स च विशे षणोत्थश्चाव्यलिङ्गसङ्कीर्णः ॥ ३४ ॥

ओघा माघे इति । मरुतोवैरमेवोत्पातवातः आकस्मिकवायुस्तेना क्षिप्यतां संयुज्यमानानां दन्तानामेव आद्यो दृषाणां घर्षणेनोत्था

ओषामासे मत्सरोत्पातवाता-
श्लिष्यद्दन्तक्ष्मारुहाङ्घर्षणोत्थैः ।
यौगान्तैर्वा वह्निभिर्वारणानां
मुक्तैर्मूर्द्धव्योम्नि नक्षत्रमाला ॥ ३५ ॥
सान्द्राम्भोदश्यामले सामजानां
वृन्दे नीताः शोणितैः शोणिमानम् ।
दन्ताः शोभामापुरम्भोनिधीनां
कन्दोद्भेदा वैद्रुमा वारिणीव ॥ ३६ ॥

अत्र येषां तैर्वह्निभिर्यौगान्तैर्वा युगान्तभवैर्वह्निभिरिव वारणानां मुक्तैरुत्सृष्टैः मूर्द्धा व्योमेव तस्मिन्मूर्द्धव्योम्नि नक्षत्रमाला हारविशेषः । सैव नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिकैरित्यमरः । ज्योतिर्मण्डलञ्च ओषामासे उवोष दग्धेत्यर्थः । उष दाहे इति धातोः कर्मणि लिट् । उषविदजागृभ्योऽन्यतरस्यामित्याम्प्रत्ययः लघूपधगुणः कृञ्चानुप्रयुज्यते लिटीत्यस्तेरनुप्रयोगः । अत्र नक्षत्रमालयोरभेदाध्यवसायेन निर्देशात् रूपकश्लेषसङ्कीर्णेयमुपमा ॥ ३५ ॥

सान्द्राम्भोदेति । सान्द्रं च तदम्भोदश्यामलं च तस्मिन् सामजानां गजानां वृन्दे शोणितैः शोणिमानमारुण्यं नीताः दन्ताः अम्भोनिधीनां वारिनिधीनां वारिणीव विद्रुमाणां प्रवालानां इमे वैद्रुमाः । विद्रुमः पुंसि प्रवालं पुंनपुंसकमित्यमरः । कन्दो मूलपिण्डः तस्योद्भेदाः प्ररोहा इव शोभामापुरित्युपमा ॥ ३६ ॥

आक्रम्यैवेति । आक्रमाणि दन्तोत्खननसंघेभाद्भुतं कम्राण्यपाणि येषां तैः केतुभिर्ध्वजैः सन्निपातं सङ्घर्षं भजन्त इति

आक्रम्याग्रैः केतुभिः संनिपात
स्तारोदीर्णग्रैवनादं प्रजन्तः।
मग्नानङ्गे गाढमन्यद्विपाना
न्दन्तान्दुःखादुत्खनन्ति स्म नागाः ॥३७॥
उत्क्षिप्योच्चैः प्रस्फुरन्तं रदाभ्या
मीषादन्तः कुञ्जरं ग्रावणीयम्।
शृङ्गप्रोतप्रावृषेण्याम्बुदस्य
स्पष्टम्प्रापत्साम्यमुर्वीधरस्य ॥ ३८ ॥

दुःखहेतूक्तिः। नागा: गजास्तारमुच्चैरुदीर्णः उत्पन्नः ग्रैवाणां ग्रीवासक्तानां शृङ्खलभूषणादीनां नादो यस्मिन् कर्मणि तत्तथा अन्यद्विपानां प्रतिगजानां अङ्गे गाढं मग्नान् अन्तःप्रविष्टान् दन्तान् दुःखादुत्खनन्ति स्म तेषां गाढमग्नत्वात्स्वयं केतुभाराक्रान्तत्वाच्च कृच्छ्रादुज्जह्रुरित्यर्थः। अत्रोक्तभारमज्जनयोर्विशेषणगत्या दुःखोत्खननहेतुत्वात्काव्यलिङ्गम् ॥ ३७ ॥

उत्क्षिप्येति। ईषे लाङ्गलदण्डाविव दन्तौ यस्य स ईषादन्तो महादन्तो दन्ती। ईषा लाङ्गलदण्डः स्यादित्यमरः। प्रस्फुरन्तं प्राणोत्क्रमणदुःखादुल्लसन्तं ग्रावणस्येदं ग्रावणीयं कुञ्जरं रदाभ्यां दन्ताभ्यां उच्चैरुत्क्षिप्योर्ध्वमुद्यम्य शृङ्गे शिखरे प्रोतः स्यूतः प्रावृषेण्यः प्रावृषि भवोऽम्बुदो यस्य तस्य। प्रावृष एण्यइत्येण्यप्रत्ययः। उर्वीधरस्य गिरेः साम्यं सादृश्यं स्पष्टं प्रापत्। आप्नोतेर्लुङि पुषादित्वात् च्लेरङादेशः। उपमा ॥ ३८ ॥

भग्नेऽपीभे स्वे परावर्त्य देहं
योद्धा सार्द्धं क्रीडया मुञ्चतेषून् ।
साकं यन्तुः सम्मदेनानुबन्धी
द्रूनोऽभीक्ष्णं वारणः प्रत्यरोधि ॥ ३८ ॥

भग्नेऽपीति । स्वे स्वकीये इभे गजे भग्नेऽपि देहं स्वाङ्गं परावर्त्य प्रतिपक्षाभिमुखमावर्त्य । वृतेर्ण्यन्ताल्ल्यप् । अण्यन्तस्त्वप पाठः अकर्मकस्य कर्मागमन्वयात् । क्रीडया सार्द्धमिषून् मुञ्चता इषुमोचणेन स्वगजभङ्गक्रीडां निरस्यतेत्यर्थः । योद्धा भग्नभस्थेन भटेन कर्त्रा अभीक्ष्णं द्रूनः इषुभिस्तप्तः । ल्वादिभ्य इति निष्ठा नत्वम् । अनुबध्नातीत्यनुबन्धी वारणो यन्तुः प्रतिगजारोहस्य सम्मदेन साकं स्वेभजयजन्येन हर्षेण सह । प्रमदसम्मदौ हर्ष इति निपातः । प्रत्यरोधि प्रतिरुद्धः तत्प्रतिरोधेन तत्सम्मदस्यापि प्रतिरोधव्याप्तेरिति भावः । साकं सार्द्धं समं सहेत्यमरः । अत्र क्रीडितेषुमोचयोः सम्मदयन्तृप्रतिरोधयोश्च कार्य्यकारणयोस्तत्पौर्व्वापर्य्य विपर्य्ययरूपातिशयोक्त्या सहभावोक्तेः सहोक्तिः सङ्कीर्य्यते ॥ ३८ ॥

व्याप्तमिति । वारणः कश्चिद्दन्ती संरम्भित्वात् क्रोधित्वात् । संरम्भः सम्भ्रमे कोपे इति विश्वः । धीरो निर्भीकः सन् एत्यागत्य महीयो विपुलं लोकैः जनैः अन्यैश्च भुवनैश्च व्याप्तम् । लोकस्तु भुवने जने इत्यमरः । अतो दुःखलभ्योऽपसारोऽपसरणं यत्र तत्तेनासह्यं प्राक् पुरा आदिदेवस्य उदरान्तरुदराभ्यन्तरं मह्या सहैव गाहते स्म प्रविवेश । पुरा किल यथा वाह्यं सिसृक्षुः ब्रह्मा । पूर्व्वसृष्टिदिदृक्षया विष्णोः कुक्षिं प्राविशदिति पौराणिकाः ।

व्याप्तं लोकैर्दुःखलभ्यापसारं
संरभ्यत्वादेत्य धीरोमशीयः ।
सेनामध्यङ्गाहते वारणः स्म
ब्रह्मेव प्रागादिदेवोदराक्तः ॥ ४० ॥
भृङ्गश्रेणीश्यामभासां समूहै
र्नाराचानां विद्धनीरन्ध्रदेहः ।
निर्भीकत्वादाहवेनाहतेच्छो
हृष्यन्हस्ती हृष्टरोमेव रेजे ॥ ४१ ॥

कथा । केचित् ब्रह्मा ब्राह्मणो मार्कण्डेय इति व्याचक्षते सोऽपि भगवन्महिमावलोकनकौतुकात्तदनुज्ञया महाप्रलये तदुदरं प्रविश्य बभ्रामेत्यागमः । ब्रह्मा विप्रः प्रजापतिरित्यमरः । उपमालङ्कारः ॥ ४० ॥

भृङ्गेति । भृङ्गश्रेणीव श्यामभासां कृष्णवर्णानां नाराचानामयोमयेषु विशेषाणां समूहैः विद्धो नीरन्ध्रो निविवरो देहो यस्य सः तथापि निर्भीकत्वादाहवेनाहतेच्छः अव्याहतोत्साहः अतएव हृष्यन् मोदमानो हस्ती हृष्टरोमेव हर्षात्पुलकितइवेत्युत्प्रेक्षा । हृषेर्लोमसु इति विकल्पादिडभावः । रेजे शुशुभे । फणाञ्च सप्तानां विकल्पादेत्वाभ्यासलोपौ ॥ ४१ ॥

आतामेति । रोषभाजः क्रुद्धस्य नागराजस्य महेभस्य कटान्तात् गण्डस्थलान्निश्च्योतन्ती प्रागेव स्रवन्ती दानस्य मदस्य धारा आताम्राभा क्रोधादरुणवर्णा जज्ञे जाता आद्यो धूर्गतेन पुरोगतेन यन्त्रा सारथिना शरे आकृष्टे लोहितस्य चातङ्गस्येव

आताम्राभा रोषभाजः कटान्ता-
दाशूत्खाते मार्गणे धूर्गतेन।
निश्च्योतन्ती नागराजस्य जज्ञे
दानस्याहो लोहितस्येव धारा॥ ४२॥
क्रामन्दन्तौ दन्तिनः साहसिक्या-
दीषादण्डौ मृत्युशय्यातलस्य।
सैन्यैरन्यस्तत्क्षणादाशशङ्के
स्वर्गस्योच्चैरर्द्धमार्गाधिरूढः॥ ४३॥

धारा जज्ञे। जनेः कर्त्तरि लिट्। किमियं क्रोधारुणा मदधारा शरोद्धरणजन्मा रक्तधारा वेत्युभयकारणसम्भवात् सादृश्याच्च संशयः स च विकल्पितसादृश्यमूल इत्यलङ्कारः॥ ४२॥

क्रामन्निति। मृत्युशय्यातलस्यान्तकपर्य्यङ्करूपस्य। अधःस्वरूपयोरस्त्री तलमित्यमरः। ईषादण्डौ दारुविशेषौ तत्सदृशावायतावित्यर्थः दन्तिनोदन्तौ सहसा वर्त्ततइति साहसिकः। ओजःसहोम्भसावर्त्ततइति ठक्प्रत्ययः। तस्य भावात्साहसिक्यात् क्रामन् साहसवानित्यर्थः। अन्यस्तत्क्षणादुच्चैरूर्द्धस्य स्वर्गस्य अर्द्धमार्गो मार्गस्येति तदर्द्धमार्गाधिरूढइति सैन्यैराशशङ्के उत्प्रेक्षितइत्युत्प्रेक्षा॥ ४३॥

कुर्व्वन्निति। ज्योत्स्नाविप्रुषां तुल्यरूपः चन्द्रिकाबिन्दुस्वरूपः तारः शुद्धः। तारोमुक्तादिसंशुद्धाविति विश्वः। खड्गाघातैर्दारिताद्दन्तिकुम्भात् प्रोच्छलन्नुत्पतन् मौक्तिकौघो मुक्तापुञ्जो व्योमाकाशं ताराजालशबलां नक्षत्रशबलितां तारकितां कुर्व्वन्निव

कुर्वन् ज्योत्स्नाविप्रुषान्तुल्यरूप
स्तारस्ताराजालसारामिव द्याम् ।
खड्गाघातैर्दारिताद्दन्तिकुम्भा
दाभाति स्म प्रोच्छलन्मौक्तिकौघः ॥४४॥
दूरोत्क्षिप्तक्षिप्रचक्रेण कृत्त
म्मत्तो हस्तं हस्तिराजः स्वमेव ।
भीमम्भूमौ लोलमानं सरोषः
पादेनासृक्पङ्कपेषम्पिपेष ॥ ४५ ॥

त्प्रेक्षा । तारः प्रबलपोतयोरिति विश्वः । आभाति स्म बभौ ॥ ४४ ॥

दूरोत्क्षिप्तेति । मत्तो हस्तिराजः करीन्द्रः दूरादुत्क्षिप्तेन प्रासेन अतएव क्षिप्रेण सत्वरेण चक्रेण कृत्तं अतएव भूमौ लोलमानं लुठमानं । लोलतेरनात्मनेपदित्वात्ताच्छील्यवयोवचनशक्तिषु चानशिति ताच्छील्ये चानश्प्रत्ययः अतएव लोलमानादयश्चानशीति वामनः । भीमं भयङ्करं स्वं स्वकीयमेव हस्तं सरोषः सन् पादेनाङ्घ्रिणा असृक्पङ्केन पङ्कीभूतेनासृजा पिनष्टीति असृक्पङ्कपेषं । खेदने पिषइति णमुल् । पिपेष । कषादित्वादनुप्रयोगः । रक्तपङ्केन खेदद्रव्येण ममर्द्देत्यर्थः । क्रुद्धमत्तयोः कुतो विवेक इति भावः । अत्र पेषणासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ४५ ॥

आपस्कारादिति । गात्रमूलमापस्कारं आपस्कारादा मूलात् । आङो विकल्पादसमासः । लूनगात्रस्य छिन्नगात्रस्य । द्वौ पूर्वपश्चाज्जङ्घादिदेशौ गात्रावरे क्रमादित्यमरः । अतएवा

आपस्काराल्लूनगात्रस्य भूमि
निःसाधारं गच्छतोऽवाङ्मुखस्य ।
लम्बायामन्दन्तयोर्युग्ममेव
स्वं नागस्य प्रापदुत्तम्भनत्वम् ॥ ४६ ॥

लब्धस्पर्शम्भूव्यधादव्यधेन
स्थित्वा किञ्चिद्दन्तयोरन्तराले ।
ऊर्द्धार्द्धासिच्छिन्नदन्तप्रवेष्टं
जित्वोत्तस्थे नागमन्येन सद्यः ॥ ४७ ॥

वाङ्मुखस्य अतः साधारं सावलम्बनं न भवतीति निःसाधारं यथा तथा भूमिं गच्छतः पततइत्यर्थः । नागस्य लम्बायामं प्राप्तदैर्घ्यं आयतमित्यर्थः । स्वं स्वकीयं दन्तयोर्युग्ममेवोत्तम्भनत्वमवलम्बनत्वं प्रापत । अङ्गच्छेदेऽपि दन्तावष्टम्भादायतनेत्यत्यर्थः । अत्र स्वभावातिशयोक्त्योः संसृष्टिः ॥ ४६ ॥

लब्धस्पर्शमिति । भूव्यधाद्दन्ताभ्यां भुवो विद्धत्वादित्यर्थः व्यधजपोरनुपसर्गइत्यप्प्रत्ययः । अव्यधेन स्वयमविद्धत्वादव्यथेन गताऽन्येन केनचिद्भटेन दन्तयोरन्तराले किञ्चित् लब्धः स्पर्शो यस्मिन् कर्मणि तद्दन्ताभ्यां भटस्पर्शं यथा तथा स्थित्वा ऊर्द्ध प्रसारितेनार्द्धासिना खड्गैकदेशेन च्छिन्नः चूर्णितो दन्तप्रवेष्टो दन्तवेष्टनं यस्य तं नागं जित्वा सद्यएव उत्तस्थे उत्थितम् । भावे लिट् । अत्रापि तथेत्यनागसम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ४७ ॥

हस्तेनाग्रे वीतभीतिर्गृहीत्वा
कञ्चिद्व्यालः क्षिप्तवानूर्द्धमुच्चैः ।
आसीनानां व्योम्नि तस्यैव हेतो-
र्दिव्यस्त्रीणामर्पयामास नूनम् ॥ ४८ ॥

कश्चिद्दूरादायतेन द्रढीयः
प्रासप्रोतस्रोतसान्तःक्षतेन ।
हस्ताग्रेण प्राप्तमेवाग्रतोऽभू-
दानैश्वर्य्यं वारणस्य ग्रहीतुम् ॥ ४९ ॥

हस्तेनेति । व्यालो दुष्टदन्ती । व्यालो दुष्टगजे सर्पे इति विश्वः । अग्रे वीतभीतिं निर्भीकं भीरोः स्वर्गाभावादिति भावः । कञ्चिद्वीरं हस्तेन गृहीत्वा ऊर्द्धमुपर्य्युच्चैः क्षिप्तवान् । उत्प्रेक्ष्यते तस्यैव हेतोस्तेनैव हेतुना तत्कारणार्थमेवेत्यर्थः । सर्व्वनाम्नस्तृतीया चेति चकारात् षष्ठी । व्योम्नि आसीनानामवस्थितानाम् । ईदासः इति आनचईकारः । स्वर्गस्त्रीणाममरनारीणामर्पयामास नूनम् ॥ ४८ ॥

कश्चिदिति । दूरादायतेनान्तःक्षतेन विक्षतेन अतएव द्रढीयसा प्रासेन प्रोतं स्रोतोयस्य तेन हस्ताग्रेण करेण अग्रतः प्राप्तमपि कञ्चिद्भटं ग्रहीतुं आदातुं वारणस्य अनीश्वरस्य भावः आनैश्वर्य्यं असामर्थ्यमभूत् । नञः शुचीश्वरेत्यादिना नञ्पूर्व्वपदो भयपदवृद्धिः । अत्रापि आनैश्वर्य्यसम्बन्धोक्तेरतिशयोक्तिः ॥ ४९ ॥

तन्वाः पुंसो नन्दगोपात्मजायाः
कंसेनेव स्फोटितायागजेन ।
दिव्या मूर्त्तिर्व्योमगैरुत्पतन्ती
वीचामासे विस्मितैश्चण्डिकेव ॥ ५० ॥

आक्रम्यैकामग्रपादेन जङ्घा
मन्यामुच्चैराददानः करेण ।
सास्थिस्वानं दारुवद्दारुणात्मा
कश्चिन्मध्यात्पाटयामास दन्ती ॥ ५१ ॥

तन्वा इति । गजेन स्फोटितायाः विदारितायाः पुंसः कस्यचि द्वीरस्य तन्वाः शरीरात् कंसेन स्फोटितायाः नन्दगोपात्मजाया नन्दकन्याया इवोत्पतन्ती दिव्या मूर्त्तिः चण्डिकेव नन्दकन्या शरीरादाविर्भवन्ती कालिकेव विस्मितैर्व्योमगैः खेचरैः वीचामासे वीचिता । ईचतेः कर्म्मणि लिट् इजादेश्च गुरुमतोऽनृच्छ इत्या म्प्रत्ययः । मनुष्यभावमुत्सृज्य देवभावङ्गतेत्यर्थः । उपमा व्यक्ता। पुरा किल दुरात्मनः कंसस्य प्रतारणाय भगवद्दासया तन्माया शक्तिर्नन्दगोपाज्जाता कंसेन हिंसितेति पौराणिकाः ॥ ५० ॥

आक्रम्येति । दारुणात्मा क्रुद्धचित्तो दन्ती एकां जङ्घामग्र पादेनाक्रम्यान्यां जङ्घामुच्चैरुन्नतेन करेणाददानः आकर्षयन्। सास्थिस्वानं भज्यमानास्थिपटकारशब्दयुक्तं यथा तथा कञ्चि द्वीरं दारुवत्काष्ठवत् मध्यात्पाटयामास मध्यं विभज्य पाटया मासेत्यर्थः । ल्यब्लोपे पञ्चमी । उपमा ॥ ५१ ॥

शोचित्वाग्रे भृत्ययोर्मृत्युभाजो
र्य्यैः प्रेम्णा नो तथा वल्लभस्य ।
पूर्व्वं कृत्वा नेतरस्य प्रसाद
मप्याश्चापादापि दाहं यथान्तः ॥ ५१ ॥
उतप्लुत्यारादर्द्धचन्द्रेण लूने
वक्त्रेऽन्यस्य क्रोधदष्टोष्ठदन्ते ।
सैन्यैः कण्ठच्छेदलीने कबन्धा
द्भूयोबिभ्ये वल्गतः सासिपाणेः ॥ ५२ ॥

शोचित्वेति । स्वच्छन्तीत्यर्य्यः । अर्य्यः स्वामिवैश्ययोरिति यत्प्रत्य यान्तो निपातः । अग्रे समक्षमेव मृत्युभाजोर्मरणं गतयोर्भृत्ययोः शोचित्वा वल्लभस्यैतयोर्मध्ये प्रियस्य भृत्यस्य सम्बन्धिना प्रेम्णा तद्गत प्रेम्णेत्यर्थः । तथा तेन प्रकारेणान्तर्दाहं सन्तापं नो आप । यथा येन प्रकारेण इतरस्यावल्लभस्य पूर्व्वं जीवनकाले प्रसादं प्रीति दानाद्यनुग्रहं न कृत्वा पश्चात्तापाद्धेतोऽयमस्माभिरप्रोषितएव प्राणान् प्रादादित्यनुशयात् दाहमाप । प्रियभृत्यमरणादप्य सम्मानितमरणमेव स्वामिनोदुःसहदुःखहेतुराभीदित्यर्थः । स्वभावोक्तिः ॥ ५१ ॥

उतप्लुत्येति । अर्द्धचन्द्रेण बाणेन लूने छिन्ने तथापि क्रोधेन दष्टौ ओष्ठौ यैस्ते दन्ता यस्य तस्मिन् अन्यस्य योधस्य वक्त्रे आरा दनतिदूरमुतप्लुत्य । आराद्दूरसमीपयोरित्यमरः । भूयः पुनरपि कण्ठस्य छेदः छिन्नदेशः तत्र लीने स्थिते सति वल्गतो न्यत्यतः असिः पाणिर्यस्य तस्मात्कबन्धादपमूर्द्धकलेवरात् ।

तूर्यारावैराहितोत्तालतालै
र्गायन्तीभिः काहलं काहलाभिः ।
नृत्ते चक्षुःशून्यहस्तप्रयोगं
काये कूजन्कम्बुवदुच्चैर्जहास ॥ ५४ ॥

भीत्रार्थानां भयहेतुरिति पञ्चमी । ञिभी भये भीतं । भावे लिट् । लूनस्यापि वक्त्रस्य पुनः स्वस्थानपातित्वाद्दन्तानामिधारणाभ्यां कबन्धादप्यकबन्धभ्रान्त्या सर्व्वे बिभ्युरित्यर्थः । अतएव भ्रान्तिमदलङ्कारः ॥ ५३ ॥

तूर्यारावैरिति । आहिताः सम्पादिताः उत्तालाः प्रस्फुटाः तालाः करपुटादिक्रियामानानि येषु तैः । तालः कालक्रियामानमित्यमरः । तूर्यारावैर्डुक्कादिवाद्यघोषैस्तथा काहलं भृशं गायन्तीभिः ध्वनन्तीभिः काहलाभिः शुष्कवाद्यविशेषैश्च करणैः । काहलं भृशशुष्कयोः । वाद्यभाण्डविशेषे तु काहला काहलः खलइति विश्वः । काये अपमूर्द्धि कलेवरे । अतएव चक्षुःशून्यो दृष्टिरहितः हस्तप्रयोगो यस्मिन् कर्म्मणि तत्तथा नृत्ते नृत्यति सति । कर्त्तरि क्तः । कूजन् ध्वनन् कम्बुः शङ्खस्तद्वदित्यर्थः । उच्चैस्तरां जहास । दृष्टिशून्याभिनयस्य नाट्यशास्त्रविरोधात् अट्टहासमकरोदित्यर्थः । व्यञ्जकाप्रयोगात् गम्योत्प्रेक्षा । अङ्गैरालापयेद्गीतं हस्तेनार्थं प्रदर्शयेत् । दृष्टिभ्यां भावयेद्भावं पादाभ्यां तालनिर्णयइति नाट्यविदः ॥ ५४ ॥

प्रत्यावृत्तमिति । स्वसैन्ये भङ्गभाजि सति प्रत्यावृत्तमभ्यमित्रं कञ्चिद्वीरं तुङ्गमेककाकं मुक्तैः स्वर्णपुङ्खैः शरविशेषैः एकौघेन

प्रत्यावृत्तम्भङ्गभाजि स्वसैन्ये
तुल्यम्मुक्तैराकिरन्ति स्म कश्चित् ।
एकौघेन स्वर्णपुङ्खैर्द्विषन्तः
सिद्धामाल्यैः साधुवादैर्द्वयेऽपि ॥ ५५ ॥

बाणाक्षिप्तारोहशून्यासनाना
मश्रान्तानामन्यसैन्यैर्ग्रहीतुम् ।
संरब्धानाम्भ्राम्यतामाजिभूमौ
वारी वारैः सस्मरे वारणानाम् ॥ ५६ ॥

एकप्रकारेण द्विषन्तः आकिरन्ति स्म । सिद्धाः खेचराः माल्यैर्दिव्य मालाभिः । चातुर्वर्ण्यादित्वात् ष्यञ् प्रत्ययः । आकिरन्ति स्म । द्वयेऽपि द्विषन्तः सिद्धाश्च साधुवादैः साधु साध्विति वाक्यैरा किरन्ति स्म । एतत्त्रितयमपि युगपत् प्रवृत्तमित्यर्थः । अत्र स्वर्णपुङ्खसुरमाल्यसाधुवादानां प्रकृतानामेव तुल्यकालैकौघप्रवृत्ति साम्यादौपम्यावगमात्केवलप्रकृतास्पदा तुल्ययोगिता ॥ ५५ ॥

बाणेति । बाणैराक्षिप्ताः पातिताश्च ये आरोहाः सादिनो येभ्यस्तानि अतएव शून्यानि रिक्तान्यासनानि आस्तरणानि येषां । अतएवान्यैः सैन्यैः परसैनिकैर्ग्रहीतुं अश्रान्तानामारब्धानां समन्तादवरुध्य मानानामित्यर्थः । अतएव संरब्धानां क्षुभितानां अतएव आजि भूमौ भ्राम्यतां अनवतिष्ठमानानां वारणानां वारैर्वृन्दैः वारी बन्धनस्थानं । वारः सूर्य्यादिदिवसे वारोवरणवृन्दयोः वारी कटीभवबन्धयोरिति विश्वः । सस्मरे स्मृता । तद्धर्मयोगादिति

पौनःपुन्याद्रक्तगन्धेन मत्तो
हृद्यत्कोपाक्षोकमायोधनोर्व्याम् ।
पादे लग्नामन्त्रमालामिभेन्द्रः
पाशीकल्पामायतामाचकर्ष ॥ ५७ ॥
कश्चिन्मूर्च्छामेत्य गाढप्रहारः
सिक्तः शीतैः शीकरैर्वारणस्य ।
उच्छ्वास प्रस्थिता तज्जिघृक्षु
र्व्यर्थाकूता नाकनारी मुमूर्च्छ ॥ ५८ ॥

भावः । कर्मणि लिट् । अत्र शून्यासनत्वादीनां विशेषणगत्या वारीमरणहेतुत्वात्काव्यलिङ्गम् ॥ ५६ ॥

पौनःपुन्यादिति । अत्र आयोधनोर्व्यां युद्धभूमौ पौनःपुन्यात्पुनः पुनरावृत्तेरित्यर्थः । ब्राह्मणादित्वात् ष्यञ्प्रत्ययः अव्ययानां भमात्रे टिलोपस्य प्रातिपदिकार्थउपसङ्ख्यानमिति टिलोपः । रक्तगन्धेन रक्तगन्धाघ्राणादित्यर्थः । मत्तइभेन्द्रोमहागजः कोपात्क्षोकं जनं हृद्यन् क्षुभ्यन् पादे लग्नां ईषदसमाप्तां पाशी कल्पां पाशबन्धनसदृशीं । पाशस्त्वस्त्रादिबन्धनमिति विश्वः । बह्वादिभ्यश्चेति विकल्पादीकारः अभाषितपुंस्कत्वात् घरूपेत्या दिना ह्रस्वो न भवति । आयतां दीर्घां मालामाचकर्ष । पाशी कल्पेत्यत्र तद्धितगता पूर्णोपमा ॥ ५७ ॥

कश्चिदिति । गाढः प्रहारोयस्य सः कश्चिद्वीरोमूर्च्छामेत्य वारणस्य शीतैः शीकरैः पुष्करतुषारैः सिक्तः सन् उच्छ्वास उज्जीवति स्म किन्तु तं मूर्च्छामागतं जिघृक्षुर्ग्रहीतुमिच्छुः । अतएव

लूनग्रीवात्सायकेनापरस्य
द्यामत्युच्चैराननादुत्पतिष्णोः ।
त्रेसे मुग्धैः सैंहिकेयानुकारा
द्रौद्राकारादप्सरोवक्त्रचन्द्रैः ॥ ५९ ॥

सन्नन्तादुप्रत्ययः । प्रस्थिता तं वरीतुमागतेत्यर्थः । नाकनारी व्यर्था कृता तदुज्जीवनादिफलमनोरथा सती मुमूर्च्छ । अत्राकृतार्थ्यस्य विशेषणगत्या नाकनारीमूर्च्छाहेतुत्वात्काव्यलिङ्गं मूर्च्छारूपस्यानि ष्टयोग्यत्या सङ्कीर्य्यते ॥ ५८ ॥

लूनग्रीवादिति । अपरस्य सायकेन लूनग्रीवाच्छिन्नकण्ठात् अतएव द्यामाकाशं प्रति आशु उच्चैरुत्पतिष्णोरुत्पतनशीलात् । अलङ्कृञित्यादिना इष्णुच् प्रत्ययः । अतएव सिंहिकाया अपत्यं पुमान् सैंहिकेयो राहुः । तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुद इत्यमरः । स्त्रीभ्यो ढक् । तमनुकरोतीति तदनुकारात्तत्सदृशा दित्यर्थः । कर्मण्यण्प्रत्ययः । रौद्राकारात् भीषणाकृतेरस्य वीरस्य आननात् मुग्धैः सुन्दरैः अप्सरसां वक्त्रैरेव चन्द्रैस्त्रेसे त्रस्तं । भावे लिट् । अत्र राहुहेतुकत्रासस्य चन्द्र एव सम्भवाद्वक्त्रचन्द्रै रिति रूपकं सिद्धं तस्य सैंहिकेयानुकारादिति लुप्तोपमापेक्षत्वात् सङ्करः ॥ ५९ ॥

वृत्तमिति । काचिदमरनारी युद्धे वृत्तं मृतं । मृतेऽतीते हृष्टे ख्याते वर्त्तुलेऽपि वृत्तं मृगरति विश्वः । शूरमालिङ्ग्य रन्तुं दूर्वं मेरोः कुञ्जकुहरमगाम । यावत्तद्वियोगासमर्था तद्विरहाकुला

दृष्ट्वा युद्धे शूरमाश्लिष्य काचि-
द्दन्तुन्नूर्णमेरुकुम्भाञ्जगाम।
त्यक्ता नाग्नौ देहमेति स्म याव-
त्पत्नी सद्यस्तद्वियोगासमर्था ॥ ६० ॥

त्यक्तप्राणं संयुगे हस्तिनीस्था
वीक्ष्य प्रेम्णा तत्क्षणादुद्गतासुः।
प्राप्याखण्डं देवभूयं सतीत्वा-
दाशिश्लेष स्वैव कञ्चित्पुरन्ध्री ॥ ६१ ॥

पत्नी यावदग्नौ देहं त्यक्ता नैति स्म नाजगाम। अत्र मेरुकुम्भा सम्बन्धेऽप्यसम्बन्धोक्तिरतिशयोक्तिः ॥ ६० ॥

त्यक्तेति। संयुगे युद्धे त्यक्तप्राणं कञ्चिद्वीरं हस्तिन्यां तिष्ठतीति हस्तिनीस्था करिणीमारूढा सती वीक्ष्य प्रेम्णा तत्क्षणादुद्गतासुर्गतप्राणा। स्वैव पुरन्ध्री स्वभार्यैव सतीत्वात्पतिव्रतात्वादखण्डमक्षयं देवभूयं देवत्वम्। भुवो भावे इति क्यप्। प्राप्याश्लिषत्। स्त्रीणां पातिव्रत्यमेव पतिसालोक्यनिदानं नाग्निप्रवेशादिकमिति भावः। अत्र सतीत्वस्य विशेषणगत्या देवभूयहेतुत्वात्काव्यलिङ्गमतिशयोक्त्यादिकं तु यथासम्भवमूह्यम् ॥ ६१ ॥

स्वर्मो इति। कश्चिद्वीरश्चिराय चिरकालं स्वर्मोवासं। अयशायत्रा विष्वकालादिति विकल्पादलुक्। कारयन्त्या अनुभाव अनया चहन्यहनि प्रत्यह। नपुंसकादन्यतरस्यामित्यव्ययीभावे समासान्तष्टच्प्रत्ययः अव्ययानां भमात्रे टिलोपः इत्युक्तम्। प्रत्ययत्वं नूतनत्वं धारयन्त्या परप्रेमास्पदत्वादिति भावः। कोऽपं

स्वर्गे वासङ्कारयन्त्या चिराय
प्रत्यग्रत्वं प्रत्यहं धारयन्त्या ।
कश्चिद्भेजे दिव्यनार्य्या परस्मिन्
लोके लोकम्प्रीणयन्त्येह कीर्त्या ॥ ६२ ॥
गत्वा नूनं वैबुधं सद्म रम्य
म्मूर्च्छाभाजामाजगामान्तरात्मा ।
भूयोदृष्टप्रत्ययाः प्राप्तसंज्ञाः
साधीयस्ते यद्रणायाद्रियन्ते ॥ ६३ ॥

प्रीणयन्त्या अद्भुतत्वं प्रापयन्त्या । प्रीञोण्यन्ताल्लटः शतरि ङीप् धूञ्प्रीञोर्नुग्वक्तव्य इति नुगागमः । दिव्यनार्य्या परस्मिँल्लोके इह लोके कीर्त्त्या च भेजे प्राप्तः । भजेः कर्म्मणि लिट् । रणमरणाल्लोकद्वयमपि जिगायेत्यर्थः । अत्र दिव्याङ्गनाकीर्त्त्योः प्रकृतयोरेव तुल्यधर्म्मसम्बन्धात् केवलप्रकृतास्पदा तुल्ययोगिता ॥ ६२ ॥

गत्वेति । मूर्च्छाभाजामन्तरात्मा जीवः रम्यं वैबुधं सद्म दिव्यभवनं गत्वा आजगाम । मूर्च्छासमये सुरलोकरामणीयकं दृष्ट्वा आजगाम । नूनमुत्प्रेक्षायां । कुतः यद्यस्मात्प्राप्तसंज्ञाः लब्धबोधाः सन्तः दृष्टप्रत्ययाः दृष्टविश्वासाः भूयः पुनरपि साधीयो गाढतरं । गाढादीयसुनि अन्तिकबाढयोर्नेदसाधाविति साधादेशः । रणाय रणं कर्त्तुमाद्रियन्ते उद्योगिरे इत्यर्थः । कर्त्तरि लट् यक् प्रत्ययः । कथञ्चिदुज्जीवितानां पुनर्म्मृत्युप्राप्तिः श्रेयोदर्शनहेतुकेति भावः ॥ ६३ ॥

कश्चिच्छस्त्रापातमूढोऽपबोढु
र्लब्ध्वा भूयश्चेतनामाहवाय ।
व्यावर्त्तिष्ट क्रोशतः सख्युरुच्चै
स्त्यक्तश्चात्मा का च लोकानुवृत्तिः ॥६४॥

भिन्नोरस्कौ शत्रुणाभ्यर्णदूरा
दासन्नत्वात्कौचिदेकेषुणैव ।
अन्योऽन्यावष्टम्भसामर्थ्ययोगा
दूर्द्ध्वाविव स्वर्गतावप्यभूताम् ॥ ६५ ॥

कश्चिदिति । शस्त्रापातमूढः प्रहारमूर्च्छितः कश्चिद्वीरश्चेतनां संज्ञां लब्ध्वा अपवोढुर्मूर्च्छासमये युद्धभूमेरपनेतुः सख्युर्मित्रस्योच्चैः क्रोशतः आगच्छागच्छेत्याक्रोशति । षष्ठी चानादरे इति षष्ठी । क्रोशन्तमनादृत्येत्यर्थः । भूयः पुनरपि आहवाय रणाय व्यावर्त्तिष्ट । आत्मा देहस्त्यक्तश्च तथा हि लोकानुवृत्तिश्च का नैवेत्यर्थः सुहृज्जनानुरोधस्तु हितार्थिनः परिच्छेत्तुं दृष्येत्यर्थः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६४ ॥

भिन्नोरस्काविति । शत्रुणा दूरादाकृष्यासन्नत्वात्तयोरित्यर्थः । सन्निकृष्टत्वादेकेषुणैव भिन्नोरस्कौ विदारितवक्षसौ कौचिद्वीरावन्योऽन्यावष्टम्भ एव सामर्थ्यं तस्य योगात्तत्प्रभावादूर्द्ध्वाविव ऊर्द्ध्वं तिष्ठन्ताविव स्वर्गतावपि मृतावभूतां अपिशब्दार्थः । तत्र मृतयोरूर्द्ध्वावस्थानासम्भवेऽपि सम्भाव्योक्तेरतिशयोक्तिः ॥ ६५ ॥

भिन्नानिति । अन्ये वीराः शस्त्रैर्भिन्नान् विदारितान् अत एव मोहभाजो मूर्च्छाभाजो मूर्च्छां गतानभिजातान् कुलीनान् । अभिजातः

भिन्नानस्त्रैर्मोहभाजोऽभिजातान्
हन्तुं लोलं वारयन्तः स्ववर्गम् ।
जीवग्राहं ग्राहयामासुरन्ये
योग्येनार्थः कस्य न स्याज्जनेन ॥ ६६ ॥

भग्नैर्दण्डैरातपत्राणि भूमौ
पर्य्यस्तानि प्रौढचन्द्रद्युतीनि ।
आहाराय प्रेतराजस्य रौप्य
स्थालीनीव स्थापितानि स्म भान्ति ॥ ६७ ॥

स्थितौ न्याये कुलीनप्राज्ञयोरपीति विश्वः । हन्तुं लोलम् उत्सुकं स्ववर्गं वारयन्तः जीवं गृहीत्वा जीवग्राहं ग्राहयामासुः जीवमेव ग्राहयामासुरित्यर्थः । समूलाकृतजीवेषु हन्कृञ्ग्रहः इति णमुल्प्रत्ययः कषादित्वादनुप्रयोगः । जीवग्रहणप्रयोजनमर्थान्तरन्यासेनाह तथा हि योग्येन जनेन हेतुना कस्य पुंसोऽर्थः कीर्त्यादिप्रयोजनं न स्यात् स्यादेव सर्व्वस्यापीत्यर्थः अतो वीराणां रणेष्वपि अतिपरिचितरक्षणमेव श्रेयः । नार्षं नातिपरिचितमिति हननिषेधादिति भावः ॥ ६६ ॥

भग्नैरिति । भग्नैर्दण्डैर्हेतुना भग्नदण्डत्वादिति भावः । भूमौ पर्यस्तानि उत्तानपतितानि प्रौढचन्द्रद्युतीनि पूर्णेन्दुप्रभाणि आतपत्राणि श्वेतच्छत्राणीत्यर्थः प्रेतराजस्यान्तकस्य आहाराय भोजनाय स्थापितानि विहितानि रौप्यस्थालीनि राजतभाजनानीव भान्ति स्मेत्युत्प्रेक्षा ॥ ६७ ॥

रेजुर्भ्रष्टा वक्षसः कुङ्कुमाङ्का
मुक्ताहाराः पार्थिवानां व्यसूनाम् ।
हासा लक्ष्म्याः पूर्णकामस्य मन्ये
मृत्योर्दन्ताः पीतरक्तासवस्य ॥ ६८ ॥

निम्नेष्वोघीभूतमस्तक्षतानाम्
मस्रं भूमौ यत्प्रकाशाञ्चकार ।
रागार्थं तत्किन्नु कौसुम्भमम्भः
संव्यानानामन्तकान्तःपुरस्य ॥ ६९ ॥

रेजुरिति । व्यसूनां मृतानां पार्थिवानां वक्षसो भ्रष्टाः पतिताः कुङ्कुमाङ्काः कुङ्कुमारुणिता इत्यर्थः । मुक्ताहाराः पूर्णकामस्य सकलराजकसंहारात्सफलमनोरथस्य अतएव पीतं रक्तमेवासवं येन तस्य मृत्योः हासादट्टहासाल्लक्ष्याद्दृश्याद्दन्ता रेजुरिति मन्ये इत्युत्प्रेक्षा ॥ ६८ ॥

निम्नेष्विति । भूमौ निम्नेषु निम्नस्थलेषु ओघीभूतं राशीभूतं अस्तक्षतानां सम्बन्धि यदस्रं रक्तं प्रकाशाञ्चकार दिदीपे । प्रकाश दीप्ताविति धातोर्लिट् चानेकाचश्चाम् वक्तव्यमित्याम्प्रत्यये कृञो ऽनुप्रयोगः । तदस्रमन्तकान्तःपुरस्य कृतान्तावरोधस्य संव्यानानामुत्तरीयाणां रागार्थं रञ्जनार्थं कुसुम्भस्येदं कौसुम्भं अम्भः किं नु कुसुम्भद्रवो नु वेत्युत्प्रेक्षा ॥ ६९ ॥

रामेणेति । रामेण भार्गवेण सामर्थ्यात् त्रीन् वारान् त्रिः । द्वित्रिचतुर्भ्यः सुजिति सुच्प्रत्ययः । त्रिरावृत्ताः सप्त त्रिःसप्तकृत्वः एकविंशतिवारानित्यर्थः । सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसु

रामेण त्रिःसप्तकृत्वो ह्रदानां
चित्रं चक्रे पञ्चकं क्षत्रियास्त्रैः ।
रक्ताम्भोभिस्तत्क्षणादेव तस्मिन्
सङ्ख्येऽसङ्ख्याः प्रावर्तन्त द्वीपवत्यः ॥ ३० ॥
सन्दानान्तादस्त्रिभिः शिञ्जितास्त्रै-
राविश्याधः शातशस्त्रावलूनाः ।
कूर्मौपम्यं व्यक्तमन्तर्नदीना-
मैभाः प्रापन्नङ्घ्रयोऽसृक्स्रवीणाम् ॥ ३१ ॥

जिति कृत्वसुच्प्रत्ययः । क्षत्रियास्त्रै राजन्यशस्त्रैः चित्रमद्भुतं ह्रदानां पञ्चपरिमाणमस्य पञ्चकम् । सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेष्विति स्वार्थे कन् प्रत्ययः । चक्रे कृतं तस्मिन् सङ्ख्ये युद्धे । मृधमास्कन्दनं सङ्ख्यमित्यमरः । क्षणादेव रक्तैरेवाम्भोभिः असङ्ख्या द्वीपवत्यो नद्यः प्रावर्तन्त प्रासरन् रामेण बहुकालेन च स्यमन्तपञ्चकाख्यं ह्रदपञ्चकमेव कथञ्चित् कृतं । अत्र तु क्षणमात्रेणासङ्ख्या नद्यः प्रवृत्ता इत्युपमानादुपमेयस्याधिक्योक्तेर्व्यतिरेकालङ्कारः ॥ ३० ॥

सन्दानान्तादिति । शिञ्जितास्त्रैरभ्यस्तास्त्रविद्यै रस्त्रिभिरायुधीयैः अधः रथानामधस्तादाविश्य प्रविश्य सन्दानान्तात् बन्धनप्रदेशात् गुल्फदेशमधिकृत्येत्यर्थः । शातं शितं । शाच्छोरन्यतरस्यामिति विकल्पादीत्वाभावः । तेन शस्त्रेणावलूनाः छिन्नाः । इभानामिमे ऐभाः अङ्घ्रयश्चरणाः असृक्स्रवीणां नदीनामन्तरभ्यन्तरे व्यक्तं कूर्मौपम्यं कमठोपमां । स्वार्थे ष्यञ् प्रत्ययः । अतएवौपम्यादयः

पद्माकारैर्योधवक्त्रैरिभानां
कर्णभ्रष्टैश्चामरैरेव हंसैः ।
सोपस्काराः प्रावहन्नस्रतोयाः
स्रोतस्विन्यो वीचिपृक्तैस्तरङ्गैः ॥ ७२ ॥
उत्क्रान्तानामामिषायोपरिष्टा
दध्याकाशं बभ्रमुः पत्त्रवाहाः ।
मूर्त्ताः प्राणा नूनमद्याप्यवेक्षा
मोक्तुः कायन्त्याजिता दारुणास्त्रैः ॥ ७३ ॥

चातुर्वर्ण्यवदिति वामनः । प्रापन् प्राप्ताः । आपेर्लुङि पुषादित्वात् च्लेरङादेशः । उपमा ॥ ७१ ॥

पद्माकारैरिति । उच्चैर्वीचिषु तरद्भिः प्लवमानैः पद्माकारैः कमलकल्पैर्योधवक्त्रैर्भटमुखैरिभानां कर्णेभ्यो भ्रष्टैश्चामरैर्हंसैः सोपस्काराः सपरिकराः । सम्पर्युपेभ्यः करोतौ भूषणे इति सुडागमः । अस्रतोयाः रक्तजलाः स्रोतस्विन्यो नद्यः प्रावहन् । अत्र रूपकोपमयोः सङ्करः सुगमः ॥ ७२ ॥

उत्क्रान्तानामिति । पत्त्राणि वहन्तीति पत्त्रवाहाः पक्षिणः आमिषाय आमिषमत्तुं । क्रियार्थोपपदस्य च कर्मणि स्थानिन इति चतुर्थी । उत्क्रान्तानां मृतानां उपरिष्टादध्याकाशमाकाशे । विभक्त्यर्थेऽव्ययीभावः । बभ्रमुः भ्रेमुः । वा जृभ्रमुत्रसामिति विकल्पादेत्वाभ्यासलोपाभावः । अथोत्प्रेक्ष्यते । दारुणास्त्रैः घोरास्त्रैः कायं त्याजिता विसर्जिताः । त्यजेर्ण्यन्तात् द्विकर्मकात्कर्मणि क्तः । ण्यन्ते कर्तुश्च कर्मणामिति वचनात् । मूर्त्ताः मूर्त्तिमन्तः । प्राणाः

आतन्वद्भिर्दिक्षु पत्त्रायनाद-
माप्तैर्दूरादाशु तीक्ष्णैर्मुखाग्रैः ।
आदौ रक्तं सैनिकानामजीवै-
र्जीवैः पश्चात्पत्त्रिपूगैरपायि ॥ ७४ ॥
ओजोभाजां यद्रणे संस्थितानां
मादत्तोग्रं सार्द्धमङ्गेन नूनम् ।
ज्वालाव्याजादुद्वमन्ती तदन्त-
स्तेजस्तारं दीप्तजिह्वा ववाशे ॥ ७५ ॥

अद्येदानीमपि कायमवेक्षामासुः पूर्वाभिमानात् पुनः कायप्रवेशापेक्षिणो मूर्त्ताः प्राणा एव नूनमाराद्वमन्तीत्युत्प्रेक्षार्थः । इजादेश्च गुरुमतोऽनृच्छ इत्याम्प्रत्ययः कृञ्चानुप्रयुज्यते लिटीत्यस्तेरनुप्रयोगः आम्प्रत्ययवदित्यत्र कृञ एवेति नियमादस्तेर्नात्मनेपदम् ॥ ७३ ॥

आतन्वद्भिरिति । दिक्षु पत्त्रायनादं पत्त्रान्तघोषं आतन्वद्भिर्विस्तृण्वद्भिर्दूरादाशु प्राप्तैरागतैरजीवैरजीवैरचेतनैः । पचाद्यजन्तेन नञ्समासः । पत्त्रिपूगैर्बाणसङ्घातैरित्यर्थः । तीक्ष्णैर्मुखाग्रैः करणैः सैनिकानां रक्तमपायि पीतं । पिबतेः कर्मणि लुङ् आतो युक् चिण्कृतोरिति युगागमः । पश्चाज्जीवैश्चेतनैः पत्त्रिपूगैः पक्षिवृन्दैः कर्तृभिस्तीक्ष्णैर्मुखाग्रैश्चञ्चुपुटैः करणैरपायि । अत्रोभयेषां पत्त्रिणां प्रकृतत्वात्केवलप्रकृतविषयः श्लेषः ॥ ७४ ॥

ओजोभाजामिति । दीप्ता ज्वलन्ती जिह्वा यस्याः सा दीप्तजिह्वा शिवा । रणे संस्थितानां मृतानामोजोभाजामोजस्विनां ।

नैरन्तर्य्यच्छिन्नदेशान्तरालं
दुर्भक्षस्य ज्वालिना वाशितेन।
योद्धुर्व्वाणप्रोतमादीप्य मांस
म्पाकापूर्व्वस्वादमादे शिवाभिः ॥७६॥

अङ्गेन गात्रेण सार्द्धं यत्तीव्रं तिग्मं तेजआददभक्षयत्। अदेर्लङ् अदः सर्व्वेषामित्यडागमेऽप्रकस्य आडजादीनामित्याडागमोऽक्रस्य आटश्चेति वृद्धिः। तदन्तरन्तरेऽन्तरितं तेजो ज्वालाव्याजा मुखोल्काच्छलादुरमन्ती तारमुच्चैर्व्वाशे रौति स्म। तिरश्चां वाशितं रुतमित्यमरः। नूनमित्युत्प्रेक्षायां अत्र व्याजशब्देन ज्वाला लापह्नवेन तेजस्त्वोत्प्रेक्षणे सापह्नवोत्प्रेक्षेति सर्व्वस्वकारः ॥ ७५ ॥

नैरन्तर्य्येति। नैरन्तर्य्येणाविच्छेदेन छिन्नं देशान्तरालं यस्मिन् कर्म्मणि तद्यथा तथा वाणैः प्रोतं स्यूतं अतएव दुर्भक्षस्य भक्षितुमशक्यस्य। कृच्छ्रार्थे खल्प्रत्ययः। योद्धुर्योधस्य सम्बन्धि मांसं ज्वालिना ज्वालावता वाशितेन रुतेन शिवानां वाशेन जिह्वा ज्वलतीति प्रसिद्धिः। आदीप्य प्रज्वाल्य। वाणदाहाय मांसपाकाय चेति भावः। अतएव पाकेनापूर्व्वोऽभिनवः स्वादो रुचिर्यस्य तत्तथा शिवाभिर्गोमायुभिः। स्त्रियां शिवा भूरिमायगोमायुमृगधूर्त्तका इत्यमरः। आदे जघसे भक्षितमित्यर्थः। लिङ्ग्यन्यतरस्यामिति विकल्पाददेर्घस्लादेशः। वाशितच्छलया जिह्वाज्वालादग्धेषु अप्रतिबन्धेन पाकरुचिरं अघसदित्यर्थः। अत्र पाकापूर्व्वास्वादाय सम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ७६ ॥

ग्लानिच्छेदी क्षुत्प्रबोधाय पीत्वा
रक्तारिष्टं शोणिताजीर्णशेषम् ।
स्वादुङ्कारं कालखण्डोपदंशं
क्रोष्टा डिम्बं व्यष्वणद्व्यस्वनच्च ॥ ७७ ॥

क्रव्यात्पूगैः पुष्कराण्यानकाना-
मत्याशाभिर्मेदसा दारितानि ।
आभीलानि प्राणिनः प्रत्यवस्य
व्कालोनूनं व्याददाबाननानि ॥ ७८ ॥

ग्लानीति । क्रोष्टा जम्बुकः क्षुत्प्रबोधाय ग्लानिच्छेदी खेदहारी शोणिताजीर्णः शेषो यस्य तद्रक्तमेवारिष्टं पानविशेष इति रूपकं । तत्पीत्वा स्वादुङ्कारं स्वादूकृत्य । स्वादुमीति णमुल् । कालखण्डेन यकृता उपदंशं कालखण्डमुपदंशं कृत्वेत्यर्थः । कालखण्डयकृती तु समे इत्यमरः । उपदंशस्तृतीयायामिति णमुल् । कालखण्डस्य दंशनक्रियाकर्मत्वेऽपि भुजिक्रियाकरणत्वात् तृतीयोपपदतया तृतीयाप्रभृतीन्यन्यतरस्यामिति विकल्पेनोपपदसमासः । डिम्बं कलेवरं व्यष्वणत् भुक्तवानित्यर्थः । वेः स्वनो भोजन इति षत्वम् । व्यस्वनद्वाद्यचेति समुच्चयः । अभोजनार्थत्वात् षत्वं न ॥ ७७ ॥

क्रव्यादिति । क्रव्यमदन्तीति क्रव्यादो मांसभक्षकाः कङ्कगृध्रादयः । क्रव्ये चेति विट्प्रत्ययः । तेषां पूगैः कदम्बैः मेदसो वसायाः । मेदस्तु वपा वसेत्यमरः । अत्याशाभिस्तृष्णाभिर्दारितानि मेदश्छिन्नान्या पाटितान्यानकानां तूर्याणां पुष्कराणि मुखानि ।

कीर्णा रेजे साजिभूमिः समन्ता
दप्राणद्भिः प्राणभाजां प्रतीकैः।
वक्रारम्भैरर्द्धसंयोजितैर्वा
रूपैः स्रष्टुः सृष्टिकर्मान्तशाला ॥७९॥

पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले इत्यमरः। प्राणिनः करितुरगादीन् प्रत्यवस्यन् अभ्यवहरन्। अभ्यवहारः प्रत्यवसानं भोजनं जग्धिरिति हलायुधः। कालोऽन्तकः आभीलानि भयङ्कराणि। आभीलं भीमकष्टयोरिति विश्वः। आननानि व्याददौ विजहार। आङो दोऽनास्यविहरण इत्यस्य प्रत्युदाहरणमेतत्। यानि विदारितानि पुष्कराणि तान्येवाननानि। नूनमित्युत्प्रेक्षायाम्॥ ७८॥

कीर्णेति। अप्राणद्भिरजीवद्भिः छिन्नत्वान्निष्प्राणैरित्यर्थः। अन प्राणने इतिधातोर्लटः शत्रादेशः। प्राणभाजां प्राणिनां प्रतीकैरवयवैः। अङ्गं प्रतीकोऽवयव इत्यमरः। समन्तात्कीर्णा सा आजिभूमिः ईषदसमाप्तारम्भैरिति वक्रारम्भैः किं च दुर्हष्टैरित्यर्थः। विभाषा सुपो बहुच् पुरस्तादिति बहुच्प्रत्ययः। तथार्द्धसंयोजितैरर्द्धसृष्टैश्च रूपैः आकारैः। रूपं स्वरूपे सौन्दर्ये आकारश्लोकयोरपीति विश्वः। कीर्णा स्रष्टुः धातुः सृष्टिकर्मान्तशाला वा। सृष्टिकर्मणो नियतागारमिव रेजे इत्युत्प्रेक्षा॥ ७९॥

आयन्तीनामिति। इत्यमुक्तरीत्या अविरतरयमविच्छिन्नवेगं यथा तथा आयन्तीनामभिधावन्तीनामौद्धत्यभाजां प्रागल्भ्यभाजां राज्ञां समूहा राजकानि। गोत्रोक्षोष्ट्रादिना वुञ्

आयन्तीनामविरतरयं राजकानीकिनीना
मित्थं सैन्यैः सममलघुभिः श्रीपतेरूर्म्मिमद्भिः ।
आसीदोघैर्मुहुरिव महद्वारिधेरापगाना
न्दोलायुद्धं कृतगुरुतरध्वानमौद्धत्यभाजाम् ॥८०॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
सङ्कुलयुद्धवर्णनो नामाष्टादशः सर्गः ॥ १८ ॥

प्रत्ययः । तेषामनीकिन्यः सेनास्तासां राजकानीकिनीनां अलघुभि र्महद्भिरूर्म्मिमद्भिस्तरङ्गवद्भिः श्रीपतेः कृष्णस्य सैन्यैः समं सेनाभिः सह अपां समूहोऽघं । भिक्षादिभ्योऽण् । अपेन गच्छन्तीति आपगानामुक्तविशेषणविशिष्टानां वारिधेरोघैः प्रवाहैरिव कृतोगुरु तरध्वनिर्महाध्वनिर्यस्मिन् तन्महदोलायुद्धं अनियतजयपराजय युद्धं मुहुरासीत् । उपमा । मन्दाक्रान्ता वृत्तमेतत् ॥ ८० ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ काव्यव्याख्याने सर्वङ्कषाख्येऽष्टादशः सर्गः ॥ १८ ॥

---

अथोत्तस्थे रणाटव्यामसुहृद्वेणुदारिणा।
नृपाङ्घ्रिपौघसङ्घर्षादग्निवद्वेणुदारिणा ॥ १ ॥

तदेवमष्टादशसर्गे तुमुलं युद्धमभिधायेदानीमेकोनविंशति सर्गे द्वन्द्वयुद्धमनुष्टुभेन छन्दसा चित्रबन्धेन वर्णयितुमारभते । अथेत्यादि । अथैवं तुमुलयुद्धानन्तरं । रणोऽटवीवेत्युपमित समासः । अग्निवदिति तद्धितोपम्यलिङ्गात् । एवमुत्तरत्रापि द्रष्टव्यं। तस्यां रणाटव्यां असुहृदः शत्रवोवेणवोवंशाइव। वेणु मस्करतेजनादिति वंशपर्यायेष्वमरः। तान्दारयति यस्तेनासुहृद्वेणु दारिणा वेणुदारिणा बाणात्मजेन । नृपाअङ्घ्रिपाः पादपाइव तेषामोघाः सङ्घास्तेषां संघर्षात् मत्सरात् तेषाञ्च अग्निवदग्नितुल्यं । तेन तुल्यमिति तुल्यार्थे वतिप्रत्ययः। उत्तस्थे उत्थितम् । भावे लिट् । अत्राग्निवदिति तुल्यार्थेन वतिना धर्मव्यवधाने साहृश्य प्रतिपादिना उपमानोपमेयसमानधर्मसाहृश्यप्रतिपादकानां चतुर्णां चोपादानाच्चेयमार्थी तद्धितगता पूर्णोपमा। सा च रणाट व्यादिसमासगतोपमासापेक्षेति सङ्करः । सर्गेऽस्मिन् अनुष्टुभं वृत्तम्। पञ्चमं लघु सर्वेषु सप्तमं द्विचतुर्थयोः । गुरु षष्ठं च सर्वेषा मेतत् श्लोकस्य लक्षणमिति लक्षणात् । अत्रैकान्तरक्रमेण यमका द्यन्यतमशब्दालङ्कारनियमः सर्वत्र यथासम्भवमर्थालङ्कारस्य तत्र यमकलक्षणमुक्तं दण्डिना । अव्यपेतव्यपेतात्मा व्यावृत्तिर्वर्णसंहतेः। यमकन्तच्च पादानामादिमध्यान्तगोचरं । एकद्वित्रिचतुष्पादे र्यमकानां विकल्पना । आदिमध्यान्तमध्यान्तमध्याद्याद्यान्तसर्वत इति। अत्रेदं समपादान्तं यमकं द्विपादयमकभेदः ॥ १ ॥

आपतन्तममुं दूरादूरीकृतपराक्रमः ।
बलोऽवलोकयामास मातङ्गमिव केसरी ॥ २ ॥
जजौजोजाजिजिज्जाजी तन्ततोऽतिततातितुत् ।
भाभोऽभीभाभिभूभाभूरारारिररिरीररः ॥ ३ ॥

॥ एकाक्षरपादः ॥

आपतन्तमिति । आपतन्तमाधावन्तं अमुं वेणुदारिणं दूरात् ऊरीकृतपराक्रमोऽङ्गीकृतपौरुषस्तेन सहानुगतसंप्रहार इत्यर्थः । बलो बलभद्रः केसरी सिंहो मातङ्गं गजमिवावलोकयामास अनयोरिव तदन्तरमिति भावः । अतोऽलङ्कारेण वस्तुध्वनिः ॥ २ ॥

जजाविति । ततोऽवलोकनानन्तरं जजन्तीति जजाः योधाः । जज युद्धे पचाद्यच् । जजानामोजसा जाता जजौजोजा तामाजिं जयतीति जजौजोजाजिजित् । जयतेः क्विप् । जजतीति जाजी योधो । ताच्छील्ये णिनिः । अतिततानत्युद्धतान् अतितुदति अतिव्यथयतीति अतितुत् । तुदतेः क्विप् । भस्येव भा यस्य स भाभो नक्षत्रकान्तिः । नक्षत्रमृक्षं भं तारेत्यमरः । नास्ति भीर्येषां तेऽभियो निर्भीकाः तानिभान् गजान् अभिभवतीति अभीभाभिभूः । क्विप् । तस्याः भासस्तेजसो भूः स्थानं अभीभाभिभूभाभूः । अराः सन्त्येषामित्यरीणि चक्राणि तैः रीणन्ति गच्छन्तीति अरिर्यो रथाः । री गतिरेषणयोरितिधातोः क्विप् । तेषां ईरं प्रेरणं राति अरिरीररो रथिकः । आतोऽनुपसर्गे कः । अरिः शत्रुर्बलभद्रः तं वेणुदारिणं आर ययौ तमाससारेत्यर्थः । ऋ गताविति धातो र्लिट् द्विर्भावतोर्णलि वृद्धिः अभ्यासस्योरदत्वे अत आदेरिति

भवन्भयाय लोकानामाकम्पितमहीतलः ।
निर्घातइव निर्घोषभीमस्तस्यापतद्रथः ॥ ४ ॥
रामे रिपुः शरानाजिमहेष्वास विचक्षणे ।
कोपादथैनं शितया महेष्वा स विचक्षणे ॥ ५ ॥

दीर्घे पुनः सवर्णदीर्घः । भिन्नैकाक्षरपादाख्योऽनुप्रासभेदः भाभ इत्युपमानुप्रासयोरेकवाचकानुप्रवेशलक्षणसङ्करः ॥ ३ ॥

भवन्निति । लोकानां जनानां जगतां च । लोकस्तु भुवने जने इत्यमरः । भयाय भवन् सम्पद्यमानः भयं जनयन्नित्यर्थः । क्लृपेः सम्पद्यमाने चतुर्थी च वक्तव्येति क्लृपेरर्थनिर्देशाच्चतुर्थी । आकम्पितमहीतलोभूकम्पं कुर्वन्नित्यर्थः । निर्घोषेण भीमोभयङ्करः तस्य बलभद्रस्य रथोनिर्घातइवापतत् आधावत् । श्रौती पूर्णोपमा ॥ ४ ॥

रामइति । रिपुर्वेणुदारी आजिमहेषु रणोत्सवेष्विति रूपकं । महउद्धवउत्सवइत्यमरः । विचक्षणे प्रगल्भे । विचष्टइति कर्त्तरि ल्युडिति न्यासकारः असनयोश्च प्रतिषेधोवक्तव्यइति चक्षिङः ख्याञादेशाभावः । रामे बलभद्रे शरान् आस चिक्षेप । असतेर्लिट् अत आदेरित्यभ्यासदीर्घे सवर्णदीर्घः । कोपात्स रामएनं वेणुदारिणं शितया शातया । शाच्छोरन्यतरस्यामितीत्वम् । महेष्वा महेषुणा । पत्री रोपइषुर्द्वयोरित्यमरः । विचक्षणे जघान । क्षणु हिंसायामिति धातोः कर्त्तरि लिट् । अभिन्नसमपादोनाम पादाभ्यासयमकभेदः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ ५ ॥

दिशमर्कमिवावाचीं मूर्च्छागतमपाहरत् ।
मन्दप्रतापन्तं सूतः शीघ्रमाजिविहायसः ॥ ६ ॥
कृत्वा शिनेः शाल्वचमूं सप्रभावा चमूर्जिताम् ।
ससर्ज वक्त्रैः फुल्लाब्जसप्रभा वाचमूर्जिताम् ॥ ७ ॥
उल्मुकेन द्रुममाप्य सङ्कुचत्पत्रसञ्चयम् ।
तेजः प्रकिरता दिक्षु सप्रतापमदीप्यत ॥ ८ ॥

दिशमिति । मूर्च्छागतं रामेषुपातान्मोहमुपगतं । अतएव मन्दप्रतापमल्पप्रकाशं तं वेणुदारिणं अवाचीं दक्षिणां दिशं प्राप्तं । अतएव मन्दप्रतापमर्कमिव सूतः सारथिरनूरुश्च आजे विहायसः आकाशादिवाजिविहायसइत्युपमितसमासः । शीघ्रमपाहरत् अपसारितवान् । उपमा ॥ ६ ॥

कृत्वेति । प्रभावेन सह वर्त्ततइति सप्रभावा महानुभावा शिनेः सात्यकिपितामहस्य चमूः सेना । शाल्वो नाम चैद्यपक्षो राजा तस्य चमूं सेनां जितां कृत्वा जित्वेत्यर्थः । अतएव वक्त्रैर्मुखैः । येनाङ्गविकारइति तृतीया विकासस्यापि विकारत्वात् । फुल्लाब्जस्य प्रफुल्लारविन्दस्य सप्रभा समानप्रभा हर्षेण विकासितवक्त्रेत्यर्थः । ऊर्जितामुदारां वाचं ससर्ज के यूयमस्मदग्रइत्याद्युच्चैर्जगर्ज इत्यर्थः । उपमायमकयोः संसृष्टिः ॥ ७ ॥

उल्मुकेनेति दिक्षु तेजः प्रभावं प्रकाशञ्च प्रकिरता विक्षिपता उल्मुकेन भागवतेन राज्ञा अलातेन च । सङ्कुचन्तो पत्रसम्पदाहनसम्पत्पर्णसङ्घाश्च यस्य तम् । सप्रतापं सपराक्रमं प्रकटतापसहितं च । द्रुमं द्रुमाख्यं राजानं वृक्षञ्च प्राप्यादीप्यत

भवन्भयाय लोकानामाकम्पितमहीतलः ।
निर्घात इव निर्घोषभीमस्तस्यापतद्रथः ॥ ४ ॥
रामे रिपुः शरानाजिमहेष्वास विचक्षणे ।
कोपादथैनं शितया महेष्वा स विचक्षणे ॥ ५ ॥

दीर्घे पुनः सवर्णदीर्घः । भिन्नैकाक्षरपादाख्योऽनुप्रासभेदः आभ इत्युपमानुप्रासयोरेकवाचकानुप्रवेशलक्षणसङ्करः ॥ ३ ॥

भवन्निति । लोकानां जनानां जगतां च । लोकस्तु भुवने जने इत्यमरः । भयाय भवन् सम्पद्यमानः भयं जनयन्नित्यर्थः । क्लृपि सम्पद्यमाने चतुर्थी च वक्तव्येति क्लृपेरर्थनिर्देशाच्चतुर्थी । आकम्पितमहीतलोभूकम्पं कुर्वन्नित्यर्थः । निर्घोषेण भीमोभयङ्करः तस्य बलभद्रस्य रथोनिर्घातइवापतत् आधावत् । श्रौती पूर्णोपमा ॥ ४ ॥

रामइति । रिपुर्वेणुदारी आजिमहेषु रणोत्सवेष्विति रूपकं । महउद्धव उत्सवइत्यमरः । विचक्षणे प्रगल्भे । विचष्टइति कर्त्तरि ल्युडिति न्यासकारः असनयोश्च प्रतिषेधोवक्तव्यइति चक्षिङः ख्याञादेशाभावः । रामे बलभद्रे शरान् आस चिक्षेप । अस्यतेर्लिट् अत आदेरित्यभ्यासदीर्घे सवर्णदीर्घः । कोपात्स रामएनं वेणुदारिणं शितया शातया । आच्छादन्तरस्यामितीत्वम् । महेष्वा महेषुणा । पञ्चो रोपदृष्वोरित्यमरः । विचक्षणे जघान । क्षणु हिंसायामिति धातोः कर्त्तरि लिट् । अभिन्नपदपादोनाम पादाभ्यासयमकभेदः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ ५ ॥

दिग्भमर्कमिवावाचीं मूर्च्छागतमपाहरत् ।
मन्दप्रतापन्तं सूतः शीघ्रमाजिविहायसः ॥६॥
कृत्वा शिनेः शाल्वचमूं सप्रभावा चमूर्जिताम् ।
ससर्ज्ज वक्त्रैः फुल्लाब्जसप्रभा वाचमूर्ज्जिताम् ॥७॥
उल्मुकेन द्रुमम्प्राप्य सङ्कुचत्यबसञ्चयम् ।
तेजः प्रकिरता दिक्षु सप्रतापमदीप्यत ॥ ८ ॥

दिग्भमिति । मूर्च्छागतं रामेषुपातामोहमुपगतं । अतएव मन्दप्रतापमल्पप्रकाशं तं वेणुदारिणं अवाचीं दक्षिणां दिशं प्राप्तं । अतएव मन्दप्रतापमर्कमिव सूतः सारथिर्मूतस्य आजे विहायसः आकाशादिवाजिविहायसदत्युपमितसमासः । शीघ्रमपा हरत् अपसारितवान् । उपमा ॥ ६ ॥

कृत्वेति । प्रभावेन सह वर्त्ततइति सप्रभावा महानुभावा शिनेः सात्यकिपितामहस्य चमूः सेना । शाल्वो नाम चैद्यपक्षो राजा तस्य चमूं सेनां जितां कृत्वा जित्वेत्यर्थः । अतएव वक्त्रैर्मुखैः । येनाङ्गविकारइति तृतीया विकासस्यापि विकारत्वात् । फुल्लाब्जस्य प्रफुल्लारविन्दस्य सप्रभा समानप्रभा हर्षेण विकासितवतीत्यर्थः । ऊर्ज्जितामुदारां वाचं ससर्ज्ज के यूयमस्मदग्रइत्यादि गर्व्वगर्भं जगादे त्यर्थः । उपमायमकयोः संसृष्टिः ॥ ७ ॥

उल्मुकेनेति दिक्षु तेजः प्रभावं प्रकाशञ्च प्रकिरता विक्षिपता उल्मुकेन भागवतेन राज्ञा अलातेन च । सङ्कुचन्ती बलसम्पदाहलसम्पत्पर्णसम्पच्च यस्य तम् । सप्रतापं सपराक्रमं प्रकटतापसहितं च । द्रुमं द्रुमाख्यं राजानं वृक्षञ्च प्राप्यादीप्यत

पृथोरध्यक्षिपद्रुक्मी यया चापमुदायुधः ।
तयैव वाचाऽपगमं ययाचापमुदा युधः ॥ ९ ॥

समं समन्ततो राज्ञामापतन्तीरनीकिनीः ।
कार्ष्णिः प्रत्यग्रहीदेकः सरस्वानिव निम्नगाः ॥१०॥

दधानैर्घनसादृश्यं लसदायसदंशनैः ।
तत्र काञ्चनसच्छाया ससृजे तैः शराशनिः ॥११॥

॥ निरोष्ठ्यः ॥

प्रजज्वले । भावे लङ् । अत्राभिधायाः प्रकृतार्थे नियन्त्रणाद् प्रकृतार्थप्रतीतिर्ध्वनिरेव न श्लेषः ॥ ८ ॥

पृथोरिति । रुक्मी भीष्मकात्मजो रुक्मिणीभ्राता । उदायुधः उद्यतायुधः सन् । यया वाचा पृथोराजश्चापमध्यक्षिपत् धिगिदं वृथा कष्टमिति निनिन्द । अपगता मुद्यस्मात्तया अपमुदा निरुत्साहया तयैव वाचा युधो युद्धादपगममपसरणं ययाच । मां त्राहि पलायमानं शरणागतोऽस्मीति प्रार्थयामासेत्यर्थः । याचिः उभयपदी ॥ ९ ॥

सममिति । समं युगपत्समन्तत आपतन्तीरागच्छन्तीराज्ञां चैद्यपक्षाणामनीकिनीः सेनाः । कृष्णस्यापत्यं पुमान् कार्ष्णिः प्रद्युम्नः । अत इञ् । निम्नगा नदीः सरस्वान् समुद्र इवैकोऽसहायः प्रत्यग्रहीत् प्रत्यवरुरोध ॥ १० ॥

दधानैरिति । लसन्ति आयसानि अयोमयानि दंशनानि वर्माणि येषां तैः । तनुत्रं वर्म दंशनमित्यमरः । अत एव घन सादृश्यं कार्ष्ण्यान्मेघसाम्यं दधानैस्तैस्तुनिकैः तत्र कार्ष्णौ काञ्चन

नखांशुमञ्जरीकीर्णामसौ तरुरिवोल्मुकैः।
बभौ बिभ्रद्धनुःशाखामधिरूढशिलीमुखाम् ॥१२॥
प्राप्य भीममसौ जन्यं सौजन्यन्दधदानते।
विध्यन्मुमोच न रिपूनरिपूगान्तकः शरैः ॥ १३ ॥

सच्छाया सुवर्णवर्णा शर एवाशनिः विद्युत्सद्रुजे उत्सृष्टा। उपमा रूपकयोः संसृष्टिः। श्लेष्ठ्यवर्णविरहाल्लिरोष्ठ्यं चित्रभेदः शब्दालङ्कारः ॥ ११ ॥

नखेति। नखांशवोमञ्जर्य्य इव ताभिः कीर्णां व्याप्तां अधिरूढाः शिलीमुखाबाणाअलयस्य यस्यां तां। अलिबाणौ शिलीमुखावित्यमरः। धनुः शाखेव तां बिभ्रदसौ कार्ष्णिरुल्मुकैरुल्मतस्तरुरिव बभौ। तरुरिवेति लिङ्गात्सर्व्वत्रोपमितसमासः। शिलीमुखेति श्लिष्टविशेषणेयमुपमा ॥ १२ ॥

प्राप्येति। अरिपूगानां शत्रुसङ्घानामन्तकः अरिपूगान्तकोऽसौ कार्ष्णिः भीमं भयङ्करं जन्यं युद्धं प्राप्य। युद्धमायोधनं जन्यमित्यमरः। आनते नम्रे सौजन्यं सौहार्द्दं दधत् न तु विध्यन्। न क्लीवं न कृताञ्जलिमिति निषेधादिति भावः। रिपून् प्रतिपक्षान् शरैर्विध्यन् प्रहरन् न मुमोच न ररक्षेत्यर्थः। संदंशयमकभेदः ॥ १३ ॥

कृतस्येति। असौ कार्ष्णिः पूर्व्वचितिपैर्विजयार्थंशया विजया श्रद्धया पुरोऽग्रे कृतस्य नियुक्तस्य प्रयुक्तस्य वा अनेकस्यानेकाकिनः ससहायस्येत्यर्थः। अन्यत्रानेकस्य बहुसङ्ख्यस्य बाणस्य बाणासुरस्य

कृतस्य पूर्व्वचितिपैर्विजयासंशया पुरः ।
अनेकस्य चकारासौ बाणैर्बाणस्य खण्डनम् ॥१४॥
या बभार कृतानेकमाया सेना ससारताम् ।
धनुः स कर्षन्रहितमायासेनाससार ताम् ॥ १५ ॥
ओजोमहौजाः कृत्वाधस्तात्त्वणादुत्तमौजसः ।
कुर्व्वन्नाजावमुख्यत्वमनयन्नाम मुख्यताम् ॥१६॥
दूरादेव चमूर्भल्लैः कुमारो हन्ति स स्म याः ।
न पुनः सांयुगीन्ताः स्म कुमारो हन्ति सस्मयाः ॥१७॥

भरजातस्य स बाणैः खण्डनं छेदं चकार । अत्र बाणयोर्द्वयोरपि प्रकृतत्वात्केवलप्रकृतयोः श्लेषः ॥ १४ ॥

येति । या सेना कृतानेकमाया कृतबहुकपटा सती ससारतां सारवत्तां बभार तां सेनां स कार्ष्णिः धनुः कर्षन् धनुषा विध्य न्नित्यर्थः । आयासेन रहितमनायासं यथा तथा आससार अभि युक्तवानित्यर्थः बाणं भङ्क्त्वा तत्सेनां बभञ्जेत्यर्थः ॥ १५ ॥

ओज इति । महौजा महाबलः प्रद्युम्नः उत्तमौजसोनाम राज्ञः ओजस्तत्क्षणादेवाधःकृत्वाभिभूय आजौ युद्धे अमुख्यत्वमप्रधानत्वं कुर्व्वन् अथ वा अमुख्यत्वं अमुख्यार्थत्वं तन्नाम्नः कुर्व्वन् नाम निजं प्रद्युम्ननामधेयं मुख्यतां प्रधानतां प्रसिद्धार्थतामानयत् । प्रकृष्टं द्युम्नं बलं यस्येति प्रद्युम्नइति स्वामी ॥ १६ ॥

दूरादिति । स कुमारः प्रद्युम्नः सस्मयाः सगर्वाः याश्चमूर्दूरादेव भल्लैर्बाणविशेषैर्हन्ति स्म जघान ताश्चम्वः पुनर्भूयः संयुगस्थेमा

निपीड्य तरसा तेन मुक्ताः काममनास्थया।
उपाययुर्विलक्षत्वं विद्विषोन शिलीमुखाः ॥ १८ ॥
तस्यावदानैः समरे सहसा रोमहर्षिभिः।
सुरैरशंसि व्योमस्थैः सह सारोमहर्षिभिः ॥ १९ ॥
सुगन्धयद्दिशः शुभ्रमम्लानि कुसुमन्दिवः।
भूरि तत्रापतत्तस्मादुत्पपात दिवं यशः ॥ २० ॥

सांयुगीनं पृथ्वीं रणभुवमित्यर्थः। गोत्रा कुः पृथिवी पृथ्वीत्य मरः। न आरोहन्ति स्म नारूढाः ॥ १७ ॥

निपीड्येति। तेन प्रद्युम्नेन तरसा बलेन कामं निपीड्य अनास्थया अनादरेण मुक्ताः। आर्त्तान परिहन्तव्याइति निषेधेना बध्याइति जीवन्तोमुक्ताइत्यर्थः। अन्यत्र क्षिप्ताः विद्विषोविलक्षत्वं सत्रपत्वमाययुः। विलक्षस्तु त्रपान्वितइत्यमरः। शिलीमुखाबाणास्तु विलक्षत्वं लक्ष्यभ्रष्टत्वं नाययुः। अत्र द्वयोरपि विलक्षत्वयोर भेदाध्यवसायादयं व्यतिरेकोविद्विषां शिलीमुखानां च प्रकृतत्वात्तस्य केवलयोगितौपम्याश्रितइति सङ्करः ॥ १८ ॥

तस्येति। समरे तस्य प्रद्युम्नस्यावदानैरत्युग्रकर्म्मभिः करणैः सहसा सद्यः रोमहर्षिभिः रोमाञ्चवद्भिः व्योमस्थैः सुरैः महर्षिभिः सह सार्द्धं सारोबलमशंसि शंसितः ॥ १९ ॥

सुगन्धयदिति। दिशः सुगन्धयत् सुगन्धाः कुर्व्वत्। सुगन्धा त्करोतीति एयन्तात् शतृप्रत्ययः। शुभ्रं धवलं अम्लानि म्लानि रहितं भूरि प्रभूतं कुसुमं दिवोऽन्तरीक्षात्तत्र प्रद्युम्ने अपतत् तस्मात्प्रद्युम्नाद्यशः पूर्व्वोक्तगुणयुक्तं दिवमन्तरिक्षं प्रति उत्पपात।

सोढुन्तस्य द्विषोनालमपयोधरवारणम्
अर्ज्जुनाव यशश्च द्यामपयोधरवारणम् ॥ २१ ॥
केशप्रचुरलोकस्य पर्य्यस्कारि विकासिना ।
शेखरेणेव युद्धस्य शिरः कुसुमलक्ष्मणा ॥ २२ ॥

अत्र द्युम्नशुभ्रयोः कुसुमयशोभ्यामन्योऽन्योपस्कारजननादन्योऽन्यालङ्कारः । परस्परं क्रियाजनने ऽन्योऽन्यमिति लक्षणात् ॥ २० ॥

सोढुमिति । अपगताभयान्निवृत्ता योधानां रवाः सिंहनादा येषां ते अपयोधरवाः द्विषः शत्रवः तस्य कार्ष्णेः रणं सोढुं नालमशक्ताः । अतएव यशश्च अविद्यमानं पयोधराणां वारणं मेघप्रतिघातोयस्य तत् अपयोधरवारणं सत् द्यामूर्णुनाव मेघ मण्डलं व्यतीत्य स्वर्गमाच्छादयामासेत्यर्थः । ऊर्णोतेर्लिट् । अजादेर्द्वितीयस्येति द्वितीयस्याचोद्विर्भावः । गुवद्भावादाम्प्रतिषेधः । यमकवाक्यार्थहेतुककाव्यलिङ्गयोः संसृष्टिः ॥ २१ ॥

केशेति । विकासिना विविधमार्गचारिणा विकस्वरेण च कुसुमलक्ष्मणा पुष्पकेतुना प्रद्युम्नेन अन्यत्र कुसुमचिह्नेन तन्मयेनेत्यर्थः । कशवत्प्रचुराः प्रभूताः लोकाः जनायस्मिन् तस्य युद्धस्य शिराऽग्रभूमिः अन्यच्च केशैः प्रचुरस्य केशाढ्यस्य लोकस्य जनस्य शिरः मूर्द्धा शेखरेणापीडेनेव शिखामाल्यमेवेत्यर्थः । शिखास्वापीड शेखरावित्यमरः । पर्य्यस्कारि परिष्कृतं भूषितमित्यर्थः । परिपूर्व्वात्करोतेः कर्म्मणि लिट् सम्पर्य्युपेभ्यः करोतौ भूषणे इति सुडागमः अड्व्यावव्यवायेऽपोति नियमात्परिनिविभ्यइत्यादिना षत्वे सिवादोनां वाड्व्यवायेऽपीति विकल्पः । उपमा ॥ २२ ॥

सादरं युध्यमानापि तेनान्यनरसादरम्।
सा दरम्पृतना निन्ये हीयमाना रसादरम् ॥२३॥
इत्यालिङ्गितमालोक्य जयलक्ष्म्या झषध्वजम्।
क्रुद्धयेव क्रुधा सद्यः प्रपेदे चेदिभूपतिः ॥ २४ ॥

सादरमिति । सादरं साभिनिवेशं युध्यमानापि सम्प्रहर न्त्यपि अरं द्रुतं हठादिति यावत् रसात् रणे रागात् हीयमाना अपकृष्यमाणा प्रद्युम्नमच्छिन्नेति भावः। अतएवात्र विरोधाभासो ऽलङ्कारः। जहातेः कर्म्मणि लटः शानजादेशः। सा पृतना चैद्य सेना तेन प्रद्युम्नेन अन्येषां तटस्थानामपि नराणां सादं निश्चेष्टतां राति ददातीति अन्यनरसादरं। आतोऽनुपसर्गे कः इति कप्रत्ययः। दरं भयं दरोऽस्त्रियां भये श्वभ्रे इत्यमरः। निन्ये नीता। नयतेः प्रधाने कर्म्मणि लिट्। प्रधानकर्म्मण्याख्येये लादीन्याहुर्द्वि कर्म्मणामिति वचनात्। विरोधाभासयमकयोः संसृष्टिः ॥ २३ ॥

इतीति । इतीत्थं जयलक्ष्म्या आलिङ्गितं झषध्वजं मकर केतुम्प्रद्युम्नम्। पृथुरोमा झषोमत्स्यइत्यमरः। आलोक्य सद्यः क्रुद्धया सपत्न्यागमात्कोपितयेवेत्युत्प्रेक्षा । क्रुधा प्रद्युम्नान्तया रुषा कर्त्र्या चेदिभूपतिः प्रपेदे प्राप्तः तं विव्याधेति शेषः । कामिन्यः प्रायेण साहसिक्यः सपत्नीगन्धमसहमानाः सद्यः पुरुषान्तरमाश्र यन्ते इति भावः । विजयिनं प्रद्युम्नं दृष्ट्वा सद्यस्सैद्यस्सुकोपेत्यर्थः ॥ २४ ॥

अर्हितामिति। मानी अभिमानवान् स क्रुद्धयद्यः वस्तम्भः अत्रमानाः कलभसमाः कलभप्रमाणाः अतएवामोघाउग्रा

अहितानभि वाहिन्यां स मानी चतुरङ्गया।
चचाल वल्गात्कलभसमानीचतुरङ्गया ॥ २५ ॥
ततस्ततधनुर्मौर्वीविस्फारस्फारनिस्वनैः।
तूर्य्यैर्युगक्षये क्षुभ्यदकूपारानुकारिणी ॥ २६ ॥

सुरङ्गायस्यां तया वल्गात्कलभसमानीचतुरङ्गया। चत्वार्य्यङ्गानि हस्त्यादीनि यस्यास्तया चतुरङ्गया वाहिन्या करणेन अहितानभि शत्रून् प्रति चचाल। कलभसमेत्युपमा यमकेन संसृज्यते ॥ २५ ॥

अथ कलापकेन सेनां वर्णयति। ततस्ततेत्यादि। ततश्चैद्य चलनानन्तरं ततानामाकृष्टानां धनुर्मौर्वीणां विस्फारैः स्फाराः प्रभूताः निस्वनाः येषां तैस्तूर्य्यैः युगक्षये कल्पान्ते क्षुभ्यन्तमुद्वेलन्तमकूपारं समुद्रमनुकरोतीति तदनुकारिणी सा सेनेत्युत्तरेणान्वयः। उपमा ॥ २६ ॥

सकारेति। पुनः कीदृशी। कारावधे निश्चये च बले यत्ने रतावपीति विश्वः। सकाराः सयत्नाः धोवाद्याः नाना नाना विधाश्च ये आराश्वरीणां समूहाः। भिक्षादिभ्योऽण्। तेषां कासा गतिभेदाः कायविग्रहाश्च तेषां सादं ददतीति साददाः नाश कारकाः सायकायस्यां सा तथोक्ता। रसेन रागेणाढ्वोयस्याः सा रसाढ्वा रणरागिणीत्यर्थः। वाद्यसाराणां वाद्यश्रेष्ठानां ये नादा घोषादिघोषास्तेषां वादं कलहं ददतीति वाददानि तैः सह कलहायमानानि वादनानि वाद्यानि यस्यां सा वाद्यसारनादवादद वादना। अतएव तेषां तुल्यतोक्तेरतिशयोक्तिः सर्व्वतोभ्रमणात् सर्व्वतोभद्राख्यश्चित्रबन्धः। अतएव दर्शी। तदिष्टं सर्व्वतो

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| स | का | र | ना | ना | र | का | स |
| का | य | सा | द | द | सा | य | का |
| र | सा | ह | वा | वा | ह | सा | र |
| ना | द | वा | द | द | वा | द | ना ॥ २७ ॥ |

॥ सर्व्वतोभद्रः ॥

लोलासिकालियकुला यमस्यैव स्वसा स्वयम् ।
चिकीर्षुरुल्लसल्लोहवर्म्मश्यामा सहायताम् ॥ २८ ॥

भद्रं भ्रमणं यदि सर्व्वतइति । उद्धारस्तु । चतुःषष्टिकोष्ठे चतुरङ्गबन्धे क्रमेणाद्यपङ्क्तिचतुष्टये पादचतुष्कं विलिख्यानन्तरं पङ्क्तिचतुष्टयेऽप्यधःक्रमेण पादचतुष्टयलेखने प्रथमासु चतसृषु प्रथमपादः सर्व्वतोवाच्यते । एवं द्वितीयादिषु द्वितीयइत्यादि ॥ २७ ॥

लोलेति । लोलान्यसीनामेव कालियानां कृष्णसर्प्पविशेषाणां कुलानि यस्यां सा उल्लसद्भिर्लोहवर्म्मभिरयःकञ्चुकैः श्यामा अतएव यमस्यान्तकस्य सहायतां भ्रातृस्नेहादस्मिन् सेनासंहारे साहाय्यं चिकीर्षुः स्वयं साक्षात्स्वसा तस्यैव भगिनी यमुनेव स्थितेत्युत्प्रेक्षा ॥ २८ ॥

सा सेनेति । तारोऽत्युच्चैर्नादः सिंहनादो येषां ते जना यस्यां सा तारनादजना अनामया अव्यथा सा पूर्व्वोक्ता सेना मत्ता धीरा अदुष्टाश्च नागा गजा यस्मिन् कर्म्मणि तत्तथा गमनारम्भे रसेन रागेण अनारता अविरता आसीत् अविच्छिन्नरणरागाभूदित्यर्थः । मुरजबन्धः । तस्योद्धारस्तु । तिर्य्यग्रेखा लिखेत्पञ्च नवोर्द्ध्वास्तत्र पङ्क्तयः । अष्टकोष्ठास्ततः शुद्धास्तु श्लोकं लिखेत् क्रमात् । तत्राद्य

सा से ना ग म ना र म्भे
र से ना सी द ना र ता ।
ता र ना द ज ना म त्त
धी र ना ग म ना म या ॥२९॥

॥ मुरजबन्धः ॥

॥ कालापकम् ॥

द्वित्रितुर्यासु तुर्य्यत्रिद्व्याद्यपङ्क्तिषु। आद्यद्वित्रिचतुःपञ्चषट्सप्ताष्टमकोष्ठगः । दृश्यते प्रथमः पादश्चतुर्थस्यैवमेव हि । चतुर्थपङ्क्तिप्राथम्यात्प्रथमावधिवीक्षणात् । द्वितीयादाबाद्यद्व्योर्द्वितुर्य्ये त्रितुरीयके । तुर्य्यत्रिद्व्योस्तृतीयाद्ये द्रष्टव्योऽङ्घ्रिर्द्वितीयकः । तृतीयोऽङ्घ्रिर्द्वितीयान्त्ये आद्यसप्तमषष्ठयोः । द्वित्रिपञ्चमयोस्तुर्य्यषष्ठसप्तमयोः क्रमात्। तृतीयान्त्ये च सर्व्वोयमथान्यः क्रमउच्यते ॥ आद्यन्त्ययुग्मयोः पङ्क्त्योस्त्रिस्योगोभूत्रिकाक्रमः । त्वैकं द्वितयं द्वे च द्वयमेकमिति क्रमात्। यद्वा द्वितयमेकं च द्वयमेकं द्वयं पुनः। स्वपङ्क्तिप्रक्रमादेव विन्यासद्वितयं भवेत् ॥ यद्वा प्रथमतुर्य्याङ्घ्री स्वपङ्क्त्योस्तदनुक्रमात् द्वितीयोऽङ्घ्रिर्द्वितीयस्यां क्रमादाद्यचतुष्टये।व्युत्क्रमाच्च तृतीयस्यामाद्यमेव चतुष्टये । व्युत्क्रमेण द्वितीयस्यां तृतीयस्यां क्रमेण च। द्रष्टव्योहि तृतीयोऽङ्घ्रिरन्त्यकोष्ठचतुष्टये॥ विन्यासभेदास्त्वन्येऽपि सन्त्येव बहवोऽत्र हि । विस्तरात्तु न लिख्यन्ते स्वयमूह्या विचक्षणैः ॥ २९ ॥

धूतेति । क्षमाभृतां राज्ञां प्रतिहन्नाहृति प्रष्ठाः अग्रेसराः । सुपि स्थ इति कप्रत्ययः प्रष्ठोऽग्रगामिनीति षत्वे ष्टुत्वम् । धूताः

धूतधौतासयः प्रष्ठाः प्रातिष्ठन्त समास्तताम्।
शौर्य्यानुरागनिकषः सा हि वेलानुजीविनाम् ॥३०॥
दिवमिच्छन् युधा गन्तुं कोमलामलसम्पदम्।
दधौ दधानोऽसिलतां कोऽमलामलसं पदम्॥३१॥
कृतोरुवेगं युगपद्व्याजिगीषन्त सैनिकाः।
विपक्षं बाहुपरिघैर्जङ्घाभिरितरेतरम्॥३२॥

कम्पिताः धौताउत्तेजिताः असयो यैस्ते धूतधौतासयः सन्तः प्रातिष्ठन्त प्रस्थिताः। समवप्रविभ्यः स्थदति तङ्। सा वेला अनुजीविनां भृत्यजीविनां शौर्य्यानुरागयोः पुरुषकारस्वामिभक्त्यो र्निकषः परीक्षास्थानं हि अतोऽग्रे स्थातव्यं अन्यथा भीरुत्वं स्वामि द्रोहस्य स्यातामिति भावः। वाक्यार्थहेतुकं काव्यलिङ्गम्॥ ३०॥

दिवमिति। युधा युद्धेन कोमलास्मारवः अमलाः शीतोष्णादि दोषरहिताः सम्पदोयस्यास्तां कोमलामलसम्पदम् दिवं स्वर्गं गन्तुमिच्छन् कः पुमान् अमलां धौतां असिलतां दधानः अलसं पदं दधौ सर्व्वोऽपि निःशङ्कमाक्रमतइत्यर्थः। अत्र स्वर्गेच्छाया विशेषणगत्या निःशङ्कप्रस्थानहेतुत्वात्काव्यलिङ्गं तद्यमकेन संसृज्यते ॥ ३१ ॥

कृतेति। सेनायां समवेताः सैनिकाः सैन्याः। सेनायाः पाक्षिक ष्ठक्। बाहुभिः परिघैरिव बाहुपरिघैः बाहुदण्डैः विपक्षं प्रत्यक्षगाभिः प्रसृताभिः। जङ्घा तु प्रसृतेत्यमरः। इतरेतर मन्योऽन्यं सयूथ्योयमेव कृतउरुर्महान् ऊर्व्वोश्च वेगोयस्मिन् कर्म्मणि तद्यथा तथा युगपद्व्याजिगीषन्त विजेतुमैच्छन्। अत्यमहिमकया

वाहनाजनि मानासे साराजावनमा ततः
मत्तसारगराजेभे भारीहावज्जनध्वनि ॥ ३३ ॥
निध्वनज्जवहारीभा भेजे रागरसात्तमः
ततमानवजारासा सेना मानिजनाहवा ॥ ३४ ॥

॥ श्लोकप्रतिलोमयमकम् ॥

योद्धुमधावन्नित्यर्थः। विपूर्व्वाज्जयतेः सन्नन्तात् लुङि पूर्व्ववत्सन इत्यात्मनेपदम्। अत्र विपक्षसयूथयोर्बाहुजद्वयोश्च प्रकृतत्वात् केवलप्रकृतास्पदा तुल्ययोगिता ॥ ३२ ॥

वाहनेति। ततोऽनन्तरं मानमभिमानं अस्यति क्षिपतीति तस्मिन् मानासे पराहङ्कारहारिणि। कर्म्मण्यण्। मत्ताः सारगाः बलभाजश्च राजेभान्टपगजा यस्मिन् मत्तसारगराजेभे माराजौ श्रेष्ठयुद्धे। आजेः पुंलिङ्गता श्चेया। भारी भारवान् पूर्ण ईहावतामुत्साहवतां जनानां ध्वनिर्यस्मिन् तत् भारीहावज्जनध्वनि यथा तथा न नमतीत्यनमा अभङ्गुरा। पचाद्यजन्तेन नञ्समासः। वाहना निर्वाहयितृत्वं। ण्यासश्रन्थोयुच्। अजनि जाता सैनिकानामित्यर्थात् सिद्धं। जनेः कर्त्तरि लुङि दीपजनेत्यादिना चिण् ॥ ३३ ॥

एतत्प्रातिलोम्येन श्लोकान्तरमाह। निध्वनदिति। निध्वनन्तो ब्रंहन्तो जवाजवनाः हारिणो मनोहराश्चेभा यस्यां सा निध्वनज्जवहारीभा। ततो विस्तृतो मानवजो मनुष्यजातः आरासः कलकलो यस्यां सा ततमानवजारासा मानिनां मानवतां जनानामाहवो यस्यां सा मानिजनाहवा सेना रज्यतेऽनेनेति रागः क्रोधः स एव रस

अभग्नवृत्ताः प्रसभादाकृष्टा यौवनोद्धतैः ।
चक्रन्दुरुच्चकैर्मुष्टिग्राह्यमध्या धनुर्लताः ॥ ३५ ॥
करेणुः प्रस्थितोऽनेकोरेणुर्घण्टाः सहस्रशः ।
करेऽणुः शीकरो जज्ञे रेणुस्तेन शमं ययौ ॥ ३६ ॥

स्तस्मात् रागरसात् तमोमोहं भजे क्रोधान्धाजनीत्यर्थः । अत्र प्रातिलोम्येन पूर्वश्लोकावृत्तेः श्लोकप्रतिलोमयमकम् । तदुक्तं दण्डिना । आवृत्तिः प्रातिलोम्येन पादार्द्धश्लोकगोचरा । यमकं प्रतिलोमत्वात्प्रतिलोममिति स्मृतमिति ॥ ३४ ॥

अभग्नेति । अभग्ना अभङ्गुरा वृत्ता वर्त्तुलायाश्च यास्तां अभग्नवृत्ताः । विशेषणसमासः । अन्यत्राचलितचरित्राः । बहुव्रीहिः । मुष्टिग्राह्यं मुष्टिधार्य्यं मध्यं यासां ताः धनुर्लताः अन्यत्र मुष्टिमेयमध्याः यौवनेनोद्धतैर्धृष्टैर्दृप्तैश्च प्रसभाद्बलादाकृष्टाः सत्यः एकत्र गुणेष्वन्यत्र कचेषु चेति भावः । उच्चैस्तरां चक्रन्दुष्टङ्कारध्वनिं चक्रुर्धनुर्लताअन्यत्र चुक्रुशुश्च । अत्र प्रस्तुतधनुर्लताविशेषणादप्रस्तुतधूर्त्तास्कन्दितपतिव्रताप्रतीतेः समासोक्तिः तथाच आकर्षणस्य विशेषणगत्या क्रन्दनहेतुत्वात्काव्यलिङ्गमङ्गाङ्गिभावेन सङ्कीर्य्यते ॥ ५२ ॥

करेणुरिति । अनेकोबहुः करेणुः करेणवः प्रस्थितः । जातावेकवचनम् । असङ्ख्याताः करिणोयोद्धुं ययुरित्यर्थः । करेणुरिभ्यां स्त्री नेभे इत्यमरः । सहस्रशोघण्टाः करिकण्ठस्थारेणुर्दध्वनुः । अतएक हल्मध्येऽमादेश्चादेर्लिटीत्येत्वाभ्यासलोपौ । करे पुष्करे अणुरल्पः शीकरोऽम्बुकणोजज्ञे । जातावेकवचनम् । करेष्वणवः

धृतप्रत्ययशृङ्गाररसरागैरपि द्विपैः।
सरोषसम्भ्रमैर्बभ्रे रौद्र एव रणे रसः ॥ ३७ ॥
न तस्थौ भर्तृतः प्राप्तमानसम्प्रतिपत्तिषु।
रणैकसर्गेषु भयं मानसं प्रति पत्तिषु ॥ ३८॥

शीकराजातादित्यर्थः। जनेः कर्त्तरि लिट्। तेनाणुना शीकरेण रेणुः रजः शमं ययौ। एतेन करिणां बाहुल्यं व्यज्यते ॥ ३६ ॥

धृतेति। धृतः प्रत्ययः शृङ्गाररसएव रागो यैस्तैरपीति विरोधः रौद्रशृङ्गारयोर्विरोधित्वात् धृतसिन्दूररञ्जनैरित्य विरोधः। अतएव विरोधाभासोऽलङ्कारः। शृङ्गारः सुरते नाट्ये रस च गजमण्डने। शृङ्गारं चूर्णसिन्दूरे लवङ्गकुसुमेऽपि चेति विश्वः। सरोषसम्भ्रमैः द्विपैः रणे। रौद्ररसएव क्रोधरसएव बभ्रे भृतः। कर्म्मणि लिट् ॥ ३७ ॥

नेति। भर्त्तृतः स्वामिभ्यः प्राप्ते मानसम्प्रतिपत्ती पूजासौमनस्ये यैस्तेषु प्राप्तमानसम्प्रतिपत्तिषु रणे एकसर्गेषु नियतोत्साहेषु नियतनिश्चयेषु वा। सर्गास्तु सर्जनाध्यायस्वभावोत्साहनिश्चया इति वैजयन्ती। पत्तिषु पदातिषु मानसम्प्रति पत्तीनां मानसे स्थित्यर्थः। कर्म्मप्रवचनीययुक्ते द्वितीया। भयं न तस्थौ पूर्व्वोप कारस्मारिणोरणाय निर्भीकाः प्रातिष्ठन्तेत्यर्थः। अन्यथा यस्तु भीतिपरावृत्तः सङ्ग्रामे हन्यते परैः। भर्तुर्यद्दुष्कृतं किञ्चित्तत्सर्व्वं प्रतिपद्यते। यदस्य सुकृतं किञ्चिदमुत्रार्थमुपार्ज्जितम्। भर्त्ता तत्सर्व्वमादत्ते परावृत्तहतस्य त्विति निषेधस्मरणादिति भावः। अत्र मानसम्प्रतिपत्त्योर्विशेषणगत्या भयानवस्थानहेतुत्वात्पदार्थ हेतुकं काव्यलिङ्गं यमकेन संसृज्यते ॥ ३८ ॥

बाणाहिपूर्णतूणीरकोटरैर्धन्विशाखिभिः ।
गोधाश्लिष्टभुजाशाखैरभूद्भीमा रणाटवी ॥३९॥
नानाजाववजानाना सा जनौघघनौजसा ।
परानिहाऽह्यानिराप तान्वियाततयाऽन्विता ॥४०॥

॥ प्रतिलोमानुलोमपादः ॥

विषमं सर्व्वतोभद्रचक्रगोमूत्रिकादिभिः ।
श्लोकैरिव महाकाव्यं व्यूहैस्तदभवद्बलम् ॥ ४१ ॥

बाणेति । रणमेवाटवी रणाटवी बाणैरिवाहिभिः पूर्णा तूणीरा निषङ्गा एव कोटराः कुहरा येषान्तैः गोधास्तलानि गिहाकाश्च । गोधा तले निहाकायामिति विश्वः । तलं ज्याघात वारणम् । ततो गोधा एव गोधा इति श्लिष्टरूपकम् । ताभिराश्लिष्टाः भुजा एव शाखा येषां तैर्धन्विभिर्धानुष्कैरेव शाखिभिर्वृक्षैर्भीमाभय ङ्करा अभूत् । समस्तवस्तुवर्णनात्सावयवरूपकम् ॥ ३९ ॥

नानेति । इहास्यां नानाविधायां आजौ चित्रयुद्धे ओजसा तेजसा अवजानाना अवज्ञां कुर्व्वती । अकर्म्मकाच्चेत्यात्मनेपदम् । जनौघैर्घना सान्द्रा जनौघघना बहुजनेत्यर्थः । अहानिरभया वियाततया वैयात्येन धार्ष्ट्येनान्विता धृष्टेत्यर्थः । धृष्टो धृष्णु र्वियातश्चेत्यमरः । सा चैद्यसेना तान्परान् अरीन् आप प्राप । अत्र प्रतिपादं पादार्द्धस्यैवावृत्तेरर्द्धपादप्रतिलोमयमकम् ॥ ४० ॥

विषममिति । तद्बलं चैद्यसेना सर्व्वतोभद्रचक्रगोमूत्रिकादिभिः आदिग्रहणान्मुरजबन्धादिसङ्ग्रहः श्लोकैर्महाकाव्यं शिशुपाल बधादिकमिव व्यूहैः सर्व्वतोभद्रादिभिरेव बलविन्यासैः ।

संहत्या सात्वताश्चैद्यम्प्रति भास्वरसेनया ।
ववले योद्धुमुत्पन्नप्रतिभा स्वरसेन या ॥ ४२ ॥
विस्तीर्णमायामवती लोललोकनिरन्तरा ।
नरेन्द्रमार्गं रथ्येव पपात द्विषताम्बलम् ॥ ४३ ॥
वारणागगभीरा सा साराऽभोगगणारवा ।
कारितारिवधा सेना नासेधा वरितारिका ॥ ४४ ॥

॥ युग्मम् ॥

व्यूहस्तु बलविन्यास इत्यमरः । विषमं दुरवग्रहमभवत् । नग नगरादिवर्णनयुक्तलक्षणं महाकाव्यम् ॥ ४१ ॥

संहत्येति । भास्वरा तेजिष्ठा सेना यस्यास्तया भास्वरसेनया सात्वतां यदूनां संहत्या संघेन चैद्यं प्रति ववले प्रचेले । वल चलने इतिधातोर्भावे लिट् न शसददवादीति वकारादित्वादेत्वाभ्यास लोपयोः प्रतिषेधः । या यदूनां संहतिः स्वरसेन स्वभावेन योद्धुमुत्पन्नप्रतिभा सञ्जातप्रतिभा या स्वयं रणकण्डूला सा पराकृता कथं निवर्त्ततइति भावः ॥ ४२ ॥

अथ यदुसेनायाः प्रतिबलाभियोगं युग्मेनाह । विस्तीर्ण मित्यादि । आयामवती द्राघीयसी लोललोकनिरन्तरा चलज्जनसङ्कुला सा सेनेत्युत्तरश्लोकेनान्वयः । सा यदुसेना विस्तीर्ण द्विषतां बलं नरेन्द्रमार्गं राजपथं रथ्या विशिखेव पपात सञ्जगाम । उपमानेऽपि विशेषणं योज्यम् ॥ ४३ ॥

वारणेति । कीदृशी सेना वारणैरेवागैरचलैर्गभीरा दुरव गाहा वारणागगभीरा सा साराणां श्रेष्ठानां न भियं गच्छन्तीत्य

अधिनागम्प्रजविनोविकसत्पिच्छचारवः।
पेतुर्वर्हिणदेशीयाः शङ्कवः प्राणहारिणः ॥४५॥

भीगानां निर्भीकाणां गणानां अन्तमङ्गानामारवीयस्यां सा वारा भीगगणारवा कारितारिवधा कृतशत्रुवधा। रामोराज्यमकार यदितिवदत्र स्वार्थे णिच्। मास्यामेधः प्रतिषेधोयस्यां सा मासेधा नञर्थेन मशब्देन बहुव्रीहिः। अनामेधा वा वरितारिका ईप्सितशत्रुका अनेनाहं योत्स्ये इति स्वयं वृतप्रतिभटेत्यर्थः। शैषिकः कप्प्रत्ययः। सा सेना पपातेति पूर्व्वेणान्वयः। अत्र प्रातिलोम्येन अर्द्धावृत्तेः अर्द्धप्रतिलोमयमकमेतत् लक्षणन्तु निध्वनदित्यादिश्लोकप्रतिलोमयमके ॥ ४४ ॥

अधीति। प्रजवन्तीति प्रजविनोऽतिजवनाः। प्रजोरिनिरिति इनिप्रत्ययः। विकसद्भिः पिच्छैः कलापैश्चारवः। अतएव ईषदसमाप्तवर्हिणावर्हिणदेशीयामयूरकल्पाः। ईषदसमाप्ताविव्या दिना देशीयर्प्रत्ययः। प्राणहारिणः शङ्कवः शस्त्रायुधानि। वा पुंसि शस्त्रं शङ्कुर्ना इत्यमरः। नागेष्वधिनागम्। विभक्त्यर्थे ऽव्ययीभावः। गजेषु सर्प्पेषु च निपेतुः सर्प्पेषु वर्हिणा इवेत्यर्थः। अतएवोपमालङ्कारः। यद्दोयाहिगजानागादति वैजयन्ती ॥४५॥

प्रवृत्तेति। विकसन् जृम्भमाणोध्वनोध्वनिर्यस्मिन् तद्यथा तथा साधने समरद्वारे प्रवृत्तेऽप्यविषादिभिर्विषादरहितैर्विषाणिभि र्दन्तिभिर्युधं आप्य प्राप्य विकसत्प्रभूतं दानं मदोववृषे। युद्धा रम्भे धनदानञ्च ध्वन्यते सत्सम्पत्त्वात् साधनेऽपि अविषादस्या विरोधादिरोधाभासः। गोमूत्रिकाचित्रबन्धोऽयम्। वर्णानामेक

प्र वृ त्ते वि क स द्वा नं सा ध ने ष्व वि षा दि भिः ।
व वृ षे वि क स द्दा नं यु ध मा प्य वि षा णि भिः
॥ ४६ ॥ ॥ गोमूत्रिकाबन्धः ॥

पुरः प्रयुक्तैर्युद्धान्तश्चलितैर्लब्धशुद्धिभिः ।
आलापैरिव गान्धर्व्वमदीप्यत पदातिभिः ॥ ४७ ॥
केनचित्स्वामिनान्येषां मण्डलाग्रानऽवद्यता ।
प्रापे कीर्त्तिसुतमहीमण्डलाग्राऽनवद्यता ॥ ४८ ॥

रूपत्वं यद्येकान्तरमर्द्धयोः । गोमूत्रिकेति तत्प्राहुर्दुष्करन्तद्विदो विदुरिति लक्षणात् । षोडशकोष्ठद्वये पङ्क्तिद्वयेऽर्द्धद्वयं क्रमेण विलिख्यैकान्तरविनिमयेन वाचने श्लोकनिष्पत्तिरित्युद्धारः ॥ ४६ ॥

पुर इति । तद्युद्धं पुरः प्रयुक्तैः गजादिभ्यः प्राक् प्रवर्त्तितैः । अन्यत्र गानात्पूर्व्वमुच्चारितैः चलितैः मण्डलचारिभिः अन्यत्र मुक्तरावर्त्तितैरित्यर्थः लब्धशुद्धिभिः कातर्य्यकपटादिदोषरहितैरित्यर्थः अन्यत्राद्दृत्तैरागानुगुणैरित्यर्थः पदातिभिः पत्तिभिः करणैः गान्धर्व्वं गानमालापैरालापिभिरिवाद्यरविक्षेपैरिवादीप्यताशोभत ॥ ४७ ॥

केनचिदिति । स्वामिना स्वशत्रुणा अन्येषां मण्डलाग्रान् अवद्यता खण्डयता । द्यतेर्लटः शत्रादेशः । केनचिद्वीरेण कीर्त्तिसुतं यशोव्याप्तं महीमण्डलाग्रं भूपृष्ठं यस्याः सा कीर्त्तिसुतमहीमण्डलाग्रा अनवद्यता अनिन्द्यता प्रापे प्राप्ता ॥ ४८ ॥

विहन्तुं विद्विषस्तीक्ष्णः सममेव सुसंहतेः ।
परिवारात्पृथक्चक्रे खड्गश्चात्मा च केनचित् ॥ ४९ ॥
अन्येन विदधेऽरीणामतिमात्रा विलासिना ।
उद्गूर्णेन चमूस्तूर्णमतिमात्राविलाऽसिना ॥ ५० ॥
सहस्रपूरणः कश्चिल्लूनमूर्द्धाऽसिना द्विषः ।
तथोर्द्ध्वएव काबन्धीमभजन्नर्त्तनक्रियाम् ॥ ५१ ॥

विहन्तुमिति । केनचिद्वीरेण विद्विषो विहन्तुं तीक्ष्णो निशितः परिच्छेत्ता च खड्गः सुसंहतेः सुघटितात् सुष्ठु सङ्घीभूताच्च परिवारात्कोशात् परिजनाच्च । परिवारः परिजने खड्गकोशे परिच्छदेऽपि विश्वः । सममेव पृथक् चक्रे उद्धृतः । आत्मा च पृथक् चक्रे विभक्तः । खड्गमुत्कृष्य स्वसैन्यान्निर्गत्यारिमध्ये पपातेत्यर्थः । अत्र खड्गात्मनोः प्रकृतयोः समानक्रियायोगात् केवलप्रकृतास्पदा तुल्ययोगिता ॥ ४९ ॥

अन्येनेति । अन्येन वीरेण विलासिना विलसनशीलेन उद्गूर्णेन उद्यतेन असिना खड्गेन मात्रां मानमतिक्रान्तातिमात्रा अपरिमिता अरीणां चमूः सेना तूर्णं शीघ्रं अतिमात्रमत्यन्तमाविला कलुषा अतिमात्राविला अत्याविला विदधे कृता ॥ ५० ॥

सहस्रेति । पृणातीति पूरणः । पॄ पालनपूरणयोः कर्त्तरि ल्युट् । सहस्राणां पूरणः पालयिता पूरयिता वा सहस्रपूरणः सहस्ररक्षो सहस्रहन्ता वा कश्चिद्भटः कबन्धस्तु सहस्रपूरणः सहस्रसङ्ख्यापूरकः सहस्रादेकः कबन्धो नृत्यतीति प्रसिद्धिः । असिना खासिना द्विषो लूनमूर्द्धा लूनशत्रुमूर्द्धा । सापेक्षत्वेऽपि

शस्त्रव्रणमयश्रीमदलङ्करणभूषितः ।
ददृशेऽन्योरावणवदलङ्करणभूषितः ॥ ५२ ॥
द्विषद्विशसनच्छेदनिरस्तोरुयुगोऽपरः ।
सिक्तश्वास्रैरुभयथा बभूवारुणविग्रहः ॥ ५३ ॥

गमकत्वात्समासः । कबन्धस्तु द्विषोऽसिना लूनमूर्द्धा तथा कबन्धवद्देहेनोर्द्ध एव तिष्ठते । कबन्धस्येमां काबन्धीं नर्त्तनक्रिया मभजत् । विजयहर्षात्स्वयमपि कबन्धवन्ननर्त्तेत्यर्थः । अतएव मातृशब्दाविषाद मभवदस्तुषस्यस्याख्योनिदर्शनाभेदः । कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरमित्यमरः ॥ ५१ ॥

शस्त्रेति । शस्त्रव्रणमयानि तद्रूपाणि । स्वार्थे मयट् । तैरेव श्रीमद्भिः शोभावद्भिरलङ्करणै रलङ्कारैर्भूषितोऽलङ्कृतः शस्त्रव्रणा लङ्कृतइत्यर्थः । अन्यः कश्चित् अविद्यमाना लङ्का यस्याः सा अलङ्केति बहुव्रीहिः । अतएव स्त्रियाः पुंवदित्यादिना पुंवद्भावः । सा रणभूस्तस्यामुषितः स्थितोऽलङ्करणभूषितः । वसेर्निवासार्था त्कर्त्तरि क्तः वचिस्वपीत्यादिना सम्प्रसारणम् । रावणवत् ददृशे दृष्टः । सर्व्वाङ्गीनव्रणभूषणत्वेन रावणएवायं लङ्कासम्बन्ध विरहात्तु व्यतिरेकइत्यर्थः । उपमाव्यतिरेकयमकानां सङ्करः ॥ ५२ ॥

द्विषदिति । द्विषद्विशसनं । निर्व्वापणं विशसनं मारणं प्रति घातनमित्यमरः । तस्मिंश्छेदेनारिशस्त्रप्रहारेण निरस्तमूरुयुगं यस्य सः अतएवास्रैरस्रभिश्च सिक्तोऽपरोवीरः उभयथा उभाभ्यां प्रकाराभ्यां । प्रकारे गुणवचनस्येति थाल् । अरुणस्यानूरोरिव

भीमतामपरोऽम्भोधिसमेऽधित महाहवे।
दाक्षे कोपः शिवस्येव समेधितमहा हवे ॥५४॥
दन्तैश्चिच्छिदिरे कोपात्प्रतिपक्षगजा इव।
परनिस्त्रिंशनिर्लूनकरवालाः पदातयः ॥ ५५ ॥

अरुणोऽरुणवर्णस्य विग्रहो यस्य सोऽरुणविग्रहो बभूव । अरुणो ऽर्कार्कसारथ्योररुणो लोहिते ऽन्यवदिति विश्वः । अत्रारुणच्छेदास्त्रिकयोर्विशेषणगत्याभयथारुणविग्रहभावहेतुत्वात् काव्यलिङ्ग मुपमाश्लेषाभ्यां सङ्कीर्य्यते ॥ ५३ ॥

भीमेति। अम्भोधिसमे सागरसदृशे महान् आहवस्तस्मिन् महाहवे सम्यगेधितमहाः संवर्द्धिततेजाः अपरो वीरः दक्ष प्रजापतेरयं दाक्षस्तस्मिन्दाक्षे हवे यज्ञे । हवो यज्ञे तथाज्ञाने इति विश्वः । समेधितमहाः सन्दीपिततेजाः शिवस्य कोप इव वीरभद्र इवेत्यर्थः । भीमतां भयङ्करतां अधित धृतवान् । बिभ्यत्यस्मादिति भीमः । भियः षुक्वेत्यौणादिके मप्रत्यये भीमो भीष्मश्च । भीमादयोऽपादानइति निपातनादपादानायता । उपमायमकयोः संसृष्टिः ॥ ५४ ॥

दन्तैरिति। परेषां निस्त्रिंशैः खड्गैर्निर्लूनकरवालाः छिन्न खड्गाः पादाभ्यामतन्तीति पदातयः पत्तयः । अज्यतिभ्यां पादे चेत्यौणादिकइण् पादस्य पदोऽज्यतिगोपहतेष्विति पदादेशः । कोपात् गजा इव प्रतिपक्षं प्रत्तु दन्तैर्दशनैर्विषाणैश्च चिच्छिदिरे चिच्छिदुः ॥ ५५ ॥

रणे रभसनिर्भिन्नद्विपपाटविकासिनि ।
न तत्र गतभीः कश्चिद्विपपाट विकासिनि ॥ ५६ ॥
यावन्न सत्कृतैर्भर्त्तुः स्नेहस्यान्तृण्यमिच्छुभिः ।
अमर्षादितरैस्तावत्तत्यजे युधि जीवितम ॥५७॥

रणइति । रभसोवेगहर्षयोरिति विश्वः । रभसेन वेगेन निर्भिन्नद्विपाः पाटितगजाः पाटविकानां पाटववतां अनयोरथस्मिन् । पाटवशब्दान्मत्वर्थीयष्ठक्प्रत्ययः । विकासिनि प्रवृद्धे तत्र तस्मिन् रणे गतभीर्निर्भीकः । अतएव कश्चित्कोऽपि न विपपाट न पाटयामास न पलायत । अत्र गतभीकत्वस्य विशेषणगत्या अपलायनहेतुत्वात्काव्यलिङ्गम् । द्विपदलनेऽपि रणे निर्भीकइति विरोधस्य यमकेन संसृज्यते ॥ ५६ ॥

यावदिति । सत्कृतैः स्वस्वामिना पूर्वसम्मानितैः अतएव भर्त्तुः स्नेहस्य स्वामिप्रेम्णः आनृण्यमनृणत्वमिच्छुभिर्योधैरिति शेषः । युधि जीवितं यावन्न तत्यजे त्यक्तं तावदितरैरसत्कृतैरमर्षादसत्कारक्रोधाज्जीवितं तत्यजे । अथ वाऽस्मान्नाद्येति स्वामिनमुपालभ्य स्वयमेव प्राक् प्राणान् पजहुरित्यर्थः सत्कारादिविशेषणोत्थ काव्यलिङ्गं सुगमम् ॥ ५७ ॥

अथैवंविधानां मरणस्यैव कर्त्तव्यतामुपपादयति । अयइति । अयः शुभावहोविधिरिति अयशोभी भाग्यवान् स चासौ दुरालोकस्तेजस्वित्वाद्दुर्दर्शश्चेति विशेषणसमासः । तस्मिन् अयशोभिदुरालोके कोपधाम कोपाश्रयः कुपितइत्यर्थः आप्य कोपे भीरुत्वापातात् । अतएव रणमाहतः रणाहतः रणार्थी

अयशोभिदुरा लोके कोपधामरणादृते ।
अयशोभिदुरालोके कोपधा मरणादृते ॥ ५८ ॥

॥ समुद्गयमकं ॥

स्खलन्ती न क्वचित्तैक्ष्ण्यादभ्यग्रफलशालिनी ।
अमोचि शक्तिः शाक्तीकैर्लोहजा न शरीरजा ॥ ५९ ॥

त्यर्थः । कर्त्तरि क्तः । कोपधाम चासौ रणादृतश्च तस्मिन् कोपधामरणादृते लोके एवंविधे वीरलोके । अयशोभिदुरा स्वा भ्यनादरनिमित्तापकीर्त्तिनिवर्त्तिका । विदिभिदिच्छिदेः कुरच् । उपधा उपायोमरणादृते प्राणत्यागं विनेत्यर्थः । को न कोपी त्यर्थः । अन्यारादितरर्त्ते इति पञ्चमी । अत्रायशोभिन्वादीनां लोक विशेषणद्वारा तद्वर्त्तिनामुपजीविनामवसरे जीवत्यागहेतुत्वात् काव्यलिङ्गं यमकेन सङ्कीर्य्यते । समुद्गयमकभेदोऽयं । अर्द्धा भ्यास: समुद्ग: स्यादस्य भेदास्त्रयोमतादति लक्षणात् ॥ ५८ ॥

स्खलन्तीति । शक्तिः प्रहरणं येषां ते. शाक्तीकाः । शाक्तीकः शक्तिहेतिकइत्यमरः । शक्तियष्ट्योरीकगिति प्रहरणार्थे ईकक् प्रत्ययः । तैक्ष्ण्यात् नैशित्यात् क्वचिदपि न स्खलन्ती प्रतिहतिं न प्राप्नवती । अभ्यग्रं समग्रं यत् फलं शल्यं तेन शालते । अन्यत्र अभ्यग्रेणामन्नेन फलेन श्रेयसा शालतइति अभ्यग्रफलशालिनी । लोहजा अयोमयी शक्तिरायुधविशेषः अमोचि मञ्चुप् मुक्ता । शरीरजा शक्तिः सामर्थ्यंस्त्वा तु नामोचि । अतिव्याप्यामेऽप्यर्थोच

रथेन रणकाम्यन्तौ दूरादुपगताविभौ ।
गतासुरन्तरा दन्ती वरण्डक इवाभवत् ॥ ६५ ॥
भूरिभिर्भारिभिर्भीरैर्भूभारैरभिरेभिरे ।
भेरीरेभिभिरभ्राभैरभीरुभिरिभैरिभाः ॥ ६६ ॥

॥ द्व्यक्षरः ॥

इधातेर्लुङि गातिस्थेत्यादिना सिचो लुक् । उपमायमकयोः संसृष्टिः ॥ ६४ ॥

रथेनेति । रणमात्मन इच्छन्तौ रणकाम्यन्तौ । काम्यचेति रणशब्दात्काम्यच् प्रत्यये सनाद्यन्तधातुत्वाल्लटि शत्रादेशः । रथेन दूरादुपगतौ । इभावन्तरा इभयोर्मध्ये । अन्तरा अन्तरेण युक्त इति द्वितीया । गतासुर्मृतो दन्ती दैवान्मध्यवर्त्ती हस्तिकुणप इत्यर्थः । वरण्डकोऽन्तरावेदिरिवाभवत् । वरण्डकोऽन्तरावेदौ सन्दोहमुखरागयोरिति विश्वः । अभ्यासकाले काञ्चनवेदिमन्तर्धाय दन्तिनौ योधयत इति प्रसिद्धम् । उपमा ॥ ६५ ॥

भूरिभिरिति । भूरिभिः भूयोभिः भारिभिः पताकाभिस्तरणादिभारवद्भिः । मत्वर्थीय इनिप्रत्ययः । भियं रातीति भीरैः भयदैः । रा दाने आतोऽनुपसर्गे कः । भूभारैः महाकायत्वाद्भुवो भारायमाणैः । भेर्य इव रेभन्ते ध्वनन्तीति भेरीरेभिभिः । रेभृ शब्दे ताच्छील्ये णिनिः । अभ्राभैर्मेघमेचकैरिति चोपमाद्वयम् । अभीरुभिर्निर्भीकैः इभैर्गजैः । इभाः प्रतिगजाः तादृशा एव अभिरेभिरे अभियुक्ताः । उपमानुप्रासयोः सङ्करः । द्व्यक्षरानुप्रासः ॥ ६६ ॥

निस्त्रिंशासिच्छिन्नालूनैस्तथा हस्तैर्न हस्तिनः।
युध्यमाना यथा दन्तैर्भग्नैरापुर्विहस्तताम्॥ ६७॥

निपीडनादिव मिथो दानतोयमनारतम्।
वपुषामद्रयापातादिभानामभितोऽगलत्॥ ६८॥

॥ अर्धसंयोगः ॥

रणाङ्गणं सर इव प्लावितं मदवारिभिः।
गजः पृथुकराकृष्टशतपत्रमलोडयत्॥ ६९॥

निस्त्रिंशेति। युध्यमानाः सम्प्रहरन्तः हस्तायेषां सन्तीति हस्तिनः। हस्ताज्जाताविती निप्रत्ययः। यथा भग्नैर्दन्तैः विषाणैः विहस्ततां हस्तहीनत्वमितिकर्त्तव्यतामूढत्वञ्चापुः। विहस्तव्याकुलौ समावित्यमरः। तथा निस्त्रिंशाभिरसिलताभिर्लूनैश्छिन्नैर्हस्तैः शुण्डादण्डैर्विहस्ततां नापुः हस्तेभ्योऽपि दन्तानां प्रहारसाधनत्वादिति भावः। अत्र हस्तस्याच्छेदे वैहस्त्यं न हस्तच्छेदे इति विरोधः प्रतिपत्तिमूढतया समाहित इति विरोधाभासोऽलङ्कारः॥ ६७॥

निपीडनादिति। इभानां वपुषां अद्रयापाताभिद्रयाभियोगाद्धेतोः मिथो निपीडनादिव वस्त्रादिनिपीडनादिवेत्युत्प्रेक्षा। अनारतमश्रान्तं दानतोयमभितोऽगलत् वस्त्रवत् निर्द्रयापातेऽपि मदातिरेक इति गजानामुत्साहातिशयोक्तिः। अत्र संयोगाभावादसंयोगश्चित्रभेदः। श्लोऽनन्तराः संयोगः॥ ६८॥

रणेति। गजो मदवारिणा प्लावितमुक्षितं रणाङ्गणं सर इव पृथुना करेणाकृष्टानि शतपत्राणि अमितवाहनानि पद्मानि च

शरक्षते गजे भ्रङ्क्तेस्मविषादिविषादिनि ।
कृतव्याजेन रुदितमत्रासीदतिसीदति ॥ ७० ॥
अन्तकस्य पृथौ तत्र शयनीयइवाहवे ।
दशनव्यसनादीयुर्मत्कुणात्वमतङ्गजाः ॥ ७१ ॥

कुशशयानि च यस्मिन् कर्म्मणि तत्तथा रणाङ्गणमशोभयत् उपाशोभयत् । श्लेषविशेषणेयमुपमा ॥ ६८ ॥

शरक्षते इति । गजे शरेण क्षते प्रहते अतएव विषादिना विषादवता त्रिषादिना यन्त्रा सह वर्त्तते इति तस्मिन् सविषादि विषादिनि तत्र रणे अतिसीदति अतिमग्ने सति म्हते सतीत्यर्थः । सदेर्लटः शत्रादेशः । भ्रङ्क्तैः कर्त्तृभिः । न लोकेत्यादिना षष्ठी प्रतिषेधः । कृतव्याजेन कृतच्छलेन रुदितं रोदनमासीत् । स्वाश्रयनाशदुःखाद्रोदनं कृतमिवेत्युत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या । सा च कृतव्याजेनेत्यपह्नवपूर्व्वकत्वात्सापह्नवेति सर्व्वस्वकारः ॥७०॥

अन्तकस्येति । अन्तकस्य म्हत्योः सम्बन्धिनि शेतेऽस्मिन्निति शयनीये तल्पइव स्थितइत्यर्थः । कृत्यल्युटोबहुलमित्यधिकरणेऽनीयर् । पृथौ विशाले तत्राहवे मतङ्गजाः दशनव्यसनादिपाप भङ्गाद्धेतोः मत्कुणत्वमीयुः मत्कुणाइव दृष्टाइत्यर्थः । सुभरक पाथिनः खट्वाश्रयाः कीटविशेषामत्कुणाः । कालेऽप्यजातदन्तो च स्त्र्यव्यजनो च मत्कुणः । तस्मात्तस्मादन्ते तथात्वरूपकं अन्तकस्य शयनीयइवेत्युत्प्रेक्षासापेक्षमिति सङ्करः ॥ ७१ ॥

अथ युग्मेनाह । अभीकेत्यादि । अभीका निर्भीका मतिर्यस्य तेनाभीकमतिकेन निर्भयचित्तेन । शेषिकः कप्प्रत्ययः । दृहि दीप्ति ।

अ भी क म ति के ने ह्रे
भी ता म न्द स्य ना श ने।
क न त्स का म से ना के
म न्द का म क म स्य ति ॥७२॥

॥ अर्द्धभ्रमकः ॥

दधतोऽपि रणे भीममभीक्ष्णमावमासुरम्।
स्थिताः परैरभिमुखाः सुरभूयमुपाययुः ॥ ७३ ॥

॥ युग्मम् ॥

भीतानामानन्दस्य नाशने। नन्द्यादिल्वात्कर्त्तरि ल्युट्। कनन्ती दीप्यमाना सकामा विजयित्वात्पूर्णकामा सेना यत्र तस्मिन् कनत्सकामसेनाके। पूर्ववत्कप्। मन्दकामकं मन्दोत्साहं । पूर्ववदेव कप्। अस्यति निराकुर्व्वाणे रणइत्युत्तरेण सम्बन्धः। अत्र सर्व्वतोभद्रवत्सर्व्वपादभ्रमणाभावात्पदार्द्धानामेव भ्रमणादर्द्धभ्रमकम् । उद्धारस्तु सर्व्वतोभद्रवत्स्यादेव ॥ ७२ ॥

दधतइति । रणे पूर्व्वोक्तप्रकारे अभीक्ष्णमत्यन्तं भीमं भयङ्करं आसुरमसुरसम्बन्धिनं भावं पुरुषकारलक्षणं । भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु इति वैजयन्ती । असुरत्वञ्च दधतः दधानाअपि परैः शत्रुभिः अभिमुखाएव स्थिताः हताः वीराइति शेषः अतएव सुराणां भावं सुरभूयं सुरत्वं देवत्वमुपाययुः । स्वर्गं यान्त्यपराङ्मुखाइति स्मरणादिति भावः। भुवोभावे इति क्यप्। अत्रासुरभावेऽपि सुरभूय

येनाक्रमूहे व्रणवत्सरुचा परतोमरैः।
समत्वं स ययौ खड्गत्सरुचापरतोऽमरैः॥ ७४॥
निपातितसुहृत्स्वामिपितृव्यभ्रातृमातुलम्।
पाणिनीयमिवालोकि धीरैस्तत्समराजिरम्॥७५॥

मुपाययुरिति विरोधस्य भावशब्दस्यार्थान्तरत्वेन परिहारा द्विरोधाभासः॥ ७३ ॥

येनाक्रमिति। रुचा सह वर्त्तते यस्तेन सरुचा तेजस्विना येन वीरेण परतोमरैः शत्रुशस्त्रैः व्रणवत्सव्रणमक्रमूहे ऊढं। वहेः कर्म्मणि लिट् सम्प्रसारणम्। खड्गत्सरौ खड्गमुष्टौ चापे च रतः खड्गत्सरुचापरतः खड्गेषुप्रहारेण युद्धं कुर्व्वन्नित्यर्थः। त्सरुः खड्गादिमुष्टौ स्यादित्यमरः। स वीरोऽमरैः समत्वं ययौ पौरुषेणेति भावः। उपमायमकयोः संसृष्टिः॥ ७४ ॥

निपातितेति। निपातिताश्वीरशय्याक्रमिताः सुहृदादयोयत्र तत्तथोक्तं। अभिमुखबन्धोरपि रणे बध्यत्वादिति भावः। अन्यत्र निपातिताः लक्षणाभावे शब्दसाधुत्वाय सूत्रकृता सूत्रस्वरूपेणोच्चारिताः सुहृदादिशब्दायत्र तदित्यर्थः। अतएव तत्समराजिरं रणाङ्गणं। पाणिनिना प्रोक्तं पाणिनीयं अष्टाध्यायीव्याकरणमिव। तेन प्रोक्तमिति छप्रत्ययः। धीरैर्धृष्टैरेवालोकि दृष्टं। उभयत्रापि धीरैर्दुरवगाहत्वादिति भावः। शोभनं हृदयं यस्य स सुहृत्। सुहृद्दुर्हृदौ मित्रामित्रयोरिति हृदयशब्दस्य हृद्भावोनिपातितः। स्वमस्यास्तीति स्वामी ईश्वरः। स्वामिन्नैश्वर्य्ये इति मत्वर्थीय निपातः। पितुर्भ्राता पितृव्यः स्यान्मातुर्भ्राता तु मातुलइत्यमरः।

अभावि स्निग्धा सन्ध्याभ्रसंदृग्रुधिरतोयया ।
हते योद्धुर्जनः पांशौ स दृग्रुधि रतो यया ॥ ७६ ॥
विदलत्पुष्कराकीर्णाः पतच्छङ्खकुलाकुलाः ।
तरत्पत्ररथा नद्यः प्रासर्प्पन्रक्तवारिजाः ॥ ७७ ॥
अरुगजनोऽस्तक्षतिमानवमज्जवसादनम् ।
रक्षःपिशाचं मुमुदे नवमज्जवसादनम् ॥ ७८ ॥

पितृव्यमातुलमातामहपितामहादिति व्यडुलजन्तनिपातः । विभर्त्तीति भ्राता । नप्तृनेष्ट्रादिसूत्रादौणादिको निपातः ॥ ७५ ॥

अभावीति । सन्ध्याभ्रसदृक् सन्ध्यामेघसदृशं रुधिरमेव तोयं यस्यास्तया स्निग्धा रक्तनद्या अभावि भूतं । भावे लुङि चिण् । यथा स्निग्धा दृशो रुणद्धीति दृग्रुधि दृष्टिरोधके । रुधेः क्विप् । पांशौ रजसि हते सति स जनो वीरलोको योद्धुं रतः उत्सुकः अभूदिति शेषः । उपमायमकयोः संसृष्टिः ॥ ७६ ॥

विदलदिति । विदलद्भिर्विदीर्य्यमाणैः पुष्करैः करिहस्ताग्रैः अन्यत्र विकसद्भिः पद्मैराकीर्णाः व्याप्ताः । पतद्भिः शङ्खकुलैः ललाटास्थिसङ्घैः कम्बुसङ्घैश्चाकुलाः । तरन्ति प्लवमानानि पत्राणि वाहनानि रथाश्च अन्यत्र पत्ररथा पक्षिणो यासु ताः रक्तवारिजा रुधिरतोयजन्याः अन्यत्र रक्तानि वारिजानि यासु ताः नद्यः प्रासर्प्पन् प्रावहन् । अत्र नदीनां रक्तनदीनां च श्लेषः ॥ ७७ ॥

असृगिति । अस्तक्षतिमान् अस्तप्रहारवान् जनो वीरजनो ऽसृग्पङ्कं अवसादनं अवसन्नचेष्टाविगम्य मादनं मादकं यथा स्यात्तथा

चित्रैश्चापैरपेतज्यैः स्फुरद्रक्तासृतह्रदम् ।
पयोदजालमिव तद्वीराशंसनमाबभौ ॥ ७९ ॥
बन्धौ विपन्नेऽनेकेन नरेणेह तदन्तिके ।
अशोचि सैन्ये घण्टाभिर्न रेणे हतदन्तिके ॥ ८० ॥

अवमत नरयोर्मज्जवसयोर्मेदोरक्षोरदनं भक्षकं । कर्त्तरि ल्युट् । रक्षांसि च पिशाचाश्च रक्षःपिशाचं । समाहारे द्वन्द्वैकवद्भावः । मुमुदे जहर्ष । अत्र मोदस्य वमनवाक्यार्थहेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गं तच्च यमकेन संसृज्यते ॥ ७८ ॥

चित्रमिति । अपेतज्यैरपगतमौर्वीकैः । मौर्वी ज्या शिञ्जिनी गुणइत्यमरः । चापैश्चित्रं विचित्रं स्फुरन्ति रक्तान्येव असृतह्रदाः शम्पा यस्मिन् तत् । शम्पा शतह्रदा ह्रादिनीत्यमरः । तत्प्रकृतं वीरः आशंस्यते अत्रेति वीराशंसनं भयङ्करा युद्धभूमिः । सा वीराशंसनं युद्धभूमिर्यातिभयप्रदेत्यमरः । पयोदजालमिवाबभौ ॥ ७९ ॥

बन्धाविति । इह सैन्ये बन्धौ विपन्ने मृते सति अनेकेन नरेण अनेकैर्नरैरित्यर्थः । जातावेकवचनम् । तदन्तिके तस्य मृतस्य बन्धोरन्तिके अशोचि किन्तु हतादन्तिनोयत्र तस्मिन् हतदन्तिके सैन्ये घण्टाभिर्न रेणे न रध्वने । रणतेर्भावे लिट् । अत्र हतदन्तिकेइति विशेषणगत्या घण्टानामरणहेतुत्वात्पदार्थहेतुककाव्यलिङ्गं यमकेन संसृज्यते ॥ ८० ॥

क्षुत्तैरिति । क्षुत्तैः छिन्नैः दन्तिनां दन्तैर्गात्रैश्च कीर्णा मही रणभूमिः क्षुण्णाः पिष्टाः लोकापवोजनप्राणायैस्तैः मृत्योर्मुसलोलूखलैः कीर्णेव रेजे । अथायं मुसलोऽस्त्री स्यादुलूखल

क्षत्तैः कीर्णा मही रेजे दन्तैर्गात्रैश्च दन्तिनाम्।
नृलोकाक्षुभिर्मृत्योर्मुसलोलूखलैरिव ॥ ८१ ॥
युद्धमित्थं विधूतान्यमानवानभियोगतः।
चैद्यः परान्पराजिग्ये मानवानभियोगतः ॥ ८२ ॥
अथ वक्षोमणिच्छायाच्छुरितपीतवाससा।
स्फुरदिन्द्रधनुर्भिन्नतडितेव तडित्वता ॥ ८३ ॥

मित्यमरः । अत्र मुसलोलूखलैरिति राजदन्तादिपाठेऽपि सर्वकूलाभ्रेत्यादिसूत्रादेव व्यभिचारज्ञापकात्परनिपातव्यत्ययः ॥ ८१ ॥

युद्धमिति । मानवानभिमानवान् चैद्यो युद्धमाप्तः प्राप्तः सन् इत्थं विधूतान् अभिभूतान् अन्ये चैद्यातिरिक्ता मानवा येस्तान् । विधूतान्यमानवान् अभियः निर्भीकान् परान् अरीन् अभियोगतोऽभियोगादभ्यवरोधात् पराजिग्ये जिगायेत्यर्थः । विपराभ्यां जेरित्यात्मनेपदम् । संश्लिटोर्जैरिति कुलकम् ॥ ८२ ॥

अथ भगवदभियोगं पञ्चभिः कुलकेनाह । अथेत्यादि । अथ चैद्यजयानन्तरं वपुषा राजन् परः पुमान् शङ्खनेति पञ्चमेन सम्बन्धः । तद्रूपस्तावत्त्रिभिर्विशिनष्टि । वक्षोमणेः कौस्तुभस्य छायया छुरितानि व्याप्तानि पीतवासांसि पीताम्बराणि यस्य तेन । अत एव स्फुरता इन्द्रधनुषा भिन्नाः संयुक्तास्तडितो यस्य तेन तडित्वता मेघेनेव स्थितेनेत्यर्थः ॥ ८३ ॥

नीलेनेति । पुनः कीदृशेन वपुषा नीलेन श्यामलेन तथा नाकं नाकरहितं यथास्थितं तथ निर्मोलापायमाः उज्ज्वलन्तीत्यु

नीलेनानालनलिननिलीनोऌलनालिना ।
ललनालालनेनालं लीलालोलेन लालिना ॥ ८४ ॥

॥ द्व्यक्षरः ॥

अपूर्व्वयेव तत्कालसमागमसकामया ।
दृष्टेन राजन्वपुषा कटाक्षैर्विजयश्रिया ॥ ८५ ॥

विभावी विभवी भाभोविभाभावी विवोविभोः ।
भवाभिभावी भावावोभवाभावोभुवोविभुः ॥ ८६ ॥

॥ द्व्यक्षरः ॥

अलनायलाश्चालयोयस्य तेन अनालनलिननिलीनोऌलनालिना मुखसैारभलोभपरिभ्रमद्भृङ्गभ्रमरेणेत्यर्थः । ललनानां विलासिनीनां स्त्रीणां लालनेन उपलालनेन वशीकरणेनेत्यर्थः । अलमत्यन्तं लीलालोलेन क्रीडालोलुपेन लीलालाभेनेति पाठे लीलानां विलासानामालाभेनालयेनेत्यर्थः । लालयति भक्तानिति लालिना भक्तानुकम्पिनेत्यर्थः । द्व्यक्षरानुप्रासोऽलङ्कारः ॥ ८४ ।

अपूर्व्वयेति । किञ्च अपूर्व्वयेव अपूर्व्वसमागमयेव तत्कालसमागमे सकामया साभिलाषया विजयश्रिया चैद्यविरक्तयेति भावः । कटाक्षैरपाङ्गैर्दृष्टेनालोकितेन वपुषा राजन् दीप्यमानः । अत्र प्रस्तुतजयश्रीविशेषणसाम्यादप्रस्तुतानुरक्तकामिनीप्रतीतेः समासोक्तिः प्रतीयमानाभेदाध्यवसायादपाङ्गदर्शनोत्प्रेक्षा च ॥ ८५ ॥

विभावीति । विभावोऽस्यास्तीति विभावी प्रभावसम्पन्नः विभवोऽस्यास्तीति विभवी ऐश्वर्य्यवान् भयाभेवाभा यस्य स भाभो

उपैतुकामैस्तत्पारं निश्चितैर्योगिभिः परैः ।
दृश्यत्यागकृतोद्योगैरदृश्यत परः पुमान् ॥ ८७ ॥

मत्वचवद्गुज्ज्वलइत्यर्थः । विभां विशिष्टाभां भावयति सम्पादयति विश्वस्येति विभाभावी । तस्य भासा सर्वमिदं विभातीति श्रुतेः । भुवोण्यन्तात् णिनिः । विना पक्षिणा वाति गच्छतीति विवः । पक्षिवाहनइत्यर्थः । आतोऽनुपसर्गे कः । विभोर्निर्भीकः । भवं संसारं अभिभवतीति भवाभिभावी भक्तानां संसारनिवर्त्तक इत्यर्थः । भुवोणिनिः । भावान् जन्तून् अवतीति भावावः विश्वत्राता । भावोलीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुष्विति वैजयन्ती । अवतेः कर्म्मणि अण् । भवाभावोऽस्यास्तीति संसारदुःखैरस्पृष्ट इत्यर्थः । अर्शआदित्वादच्प्रत्ययः । भुवोभूमेर्विभुर्भर्त्ता ॥ ८६ ॥

उपैत्विति । एवम्भूतः परः पुमान् परमपुरुषोहरिः । तत्पारं तस्य हरेः पारं अन्तमुपैतुकामैस्तं जिगीषुभिः । अन्यत्र दिदृक्षुभिरित्यर्थः । तुङ्काममनसोरपीति मकारलोपः । निश्चितैर्योद्धुं कृतनिश्चयैरित्यर्थः । अन्यत्र निश्चिततत्त्वैः । सकर्म्मकादप्यविवक्षिते कर्म्मणि क्तः । यद्वा पीतागावः विभक्ता भ्रातरइत्यादिवदूहयितव्यं स्फुटीकृतं चैतत् द्रष्टापथे स वर्णलिङ्गी विदितइत्यत्र । दृश्यत्यागकृतोद्योगैर्मरणोद्यतैः । अन्यत्र मुमुक्षुभिरित्यर्थः । योगिभिः सन्नाहवद्भिरुपायवद्भिर्वा । अन्यत्र ध्यानवद्भिः । योगः सन्नहनोपायध्यानसङ्गतिमुक्तिष्वित्यमरः । परैः शत्रुभिः । अन्यत्र परमयोगिभिः अदृश्यत परेभ्योऽतिष्ठतेत्यर्थः अन्यत्र साक्षात्कृतः । तमेव विदित्वातिमृत्युमेतीति श्रुतेः । अर्था

तं श्रिया घनयाऽनस्तरुचा सारतया तया।
यातया तरसा चारुस्तनयाऽनघया श्रितम् ॥८८॥

॥ गतप्रत्यागतम् ॥

विद्विषोऽविद्विषुरुद्वीक्ष्य तथाप्यासन्निरेनसः।
अरुष्यमपि रोगघ्नं निसर्गादेव भेषजम् ॥ ८९ ॥

॥ युग्मम् ॥

त्तरप्रतीतिर्ध्वनिरेव न श्लेषः अभिधायाः प्रकृतार्थे नियन्त्रणात् ॥ ८७ ॥

युग्मेनाह। तमिति। घनया आनन्दसान्द्रया। अनस्तरुचा अक्षीणकान्त्या। सारतया सारत्वेन सर्वोत्कर्षगुणेन यातया व्याप्तया। चारुस्तनया रम्यकुचया। स्वाङ्गाच्चोपसर्जनादसंयोगोपधा दिति विकल्पादनोकारः। अनघया निर्दोषया तया प्रसिद्धया श्रिया रमया तरसा त्वरया श्रितमालिङ्गितं तं हरिमुद्वीक्ष्ये त्युत्तरेण सम्बन्धः। अत्रापि प्रातिलोम्येनाद्धावृत्तेरर्द्धप्रतिलोम यमकम्। एतल्लक्षणन्तु प्रागेवोक्तम् ॥ ८८ ॥

विद्विष इति। तं पूर्वोक्तं हरिं उद्वीक्ष्य विद्विषः शत्रवः। अद्विषुः द्विषन्ति स्म। लङि द्विषश्चेति विकल्पेन झेर्जुसादेशः। तथापि द्विषन्तोऽपि निरेनसो निष्पापाः आसन्। द्वेषवोऽपि साफल्यमित्यर्थकलं दृष्टान्तेनाह। अरुष्यमिति। रोषतद्रति रुष्यं। राजसूयेत्यादिना क्यबन्तो निपातितः। अरुष्यमरोषमाण मपि भेषजमौषधं। भेषजौषधभैषज्यानीत्यमरः। निसर्गात् स्वभावबलकेरैव रोगं हन्तीति रोगघ्नं आरोग्यकारि। हरिर्द्वेषताम

विदितन्दिवि केऽनीके तं यातन्निजिताजिनि ।
विगदङ्गविरोद्धारोयोद्धायोनतिमेति न ॥ ९० ॥

॥ प्रतिलोमेनायमेवार्थः ॥

नियुज्यमानेन पुरः कर्म्मण्यतिगरीयसि ।
आरोप्यमाणोरुगुणम्भर्त्रा कार्म्मुकमानमत् ॥ ९१ ॥

पापानीति वचनादिति भावः । अमनुष्यकर्तृके चेति टप्रत्ययः ॥ ८९ ॥

विदितमिति । किञ्च योद्धा वीरोयोहरिः नतिं परेषां नम्रतां नैति नापैति । नितरां जिताआजयोयेन तस्मिन् निजिताजिनि अनेकाजिविजयिन्यपि अनीके सैन्ये । वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियामित्यमरः । यातं योद्धुमागतम् । दिवि स्वर्गेऽपि विदितं प्रख्यातं विगदं निरामयं तं हरिं गवि भुवि । रोद्धारोजेतारः के न केऽपीत्यर्थः । प्रातिलोम्येऽप्येतएव पदार्थ वाक्यार्थो । एतदपि श्लोकप्रतिलोमयमकमेव पदपदार्थादि संवादस्तु वैचित्रीविशेषः । लक्षणन्तु निध्वनदित्यत्रैवोक्तमनुसन्धेयम् ॥ ९० ॥

नियुज्यमानेनेति । पुरोऽग्रे अतिगरीयसि कर्म्मणि रणकर्म्मणि अन्यच दुष्करे कस्मिंश्चित्कृत्यवस्तुनि नियुज्यमानेन व्यापारयिष्यता आज्ञापयिष्यता च भर्त्रा स्वामिना आरोप्यमाणोऽधिक्रियमाणः उरुर्महान् गुणोज्या यस्मिन् तत् । अन्यच वर्त्तमानसौन्दर्य्यादिकः । कर्म्मणे प्रभवतीति कार्म्मुकं धनुः । कर्म्मणउकञ् । आनमत् गुणाकर्षणादाकुञ्चितकोटिकमभूत् । अन्यच प्रणतइत्यर्थः । अत्र प्रकृतकार्म्मुकविशेषणसाम्यादप्रस्तुतनियोज्यपुरुषप्रतीतेः समासोक्तिः ॥ ९१ ॥

तत्र बाणाः सुपरुषः समधीयन्त चारवः ।
दिवामभूत्सुपरुषस्तस्याकृष्टस्य चारवः ॥ ९२ ॥
पश्चात्कृतानामप्यस्य नराणामिव पत्त्रिणाम् ।
यो यो गुणेन संयुक्तः स स कर्णान्तमाययौ ॥ ९३ ॥
प्रापे रूपी पुरोऽरेपाः परिपूरी परः परैः ।
रोपैरपारैरुपरि पुपूरेऽपि पुरोऽपरैः ॥ ९४ ॥
॥ द्व्यक्षरः ॥

तत्रेति । तत्र कार्मुके शोभनानि परूंषि येषां ते सुपरुषः सुपर्वाणः । अतएव चारवोऽतिरम्याबाणाः समधीयन्त निहिताः आकृष्टस्य तस्य कार्मुकस्यारवस्य दिवां सुष्ठु परुषः सुपरुषोऽति कर्कशोऽभूत् । यमकविशेषालङ्कारः ॥ ९२ ॥

पश्चादिति । नराणां पुंसामिव पश्चात्कृतानां निषङ्गसङ्गि तया पृष्ठस्थापितानामपि अन्यत्रावधीरितानामपि । पत्त्रिणा मिषूणां मध्ये इत्यर्थः । यो यः पत्त्री नरस्य गुणेन ज्यया दाक्षिण्या दिना च संयुक्तः संबद्धः स स पत्त्री नरस्यास्य हरेः कर्णान्तं कर्ण समीपमाययौ आगतः गुणयोगादाकर्णमाकृष्टः अन्यत्रान्तिकमागत इत्यर्थः । श्लेषसङ्कीर्णोपमा ॥ ९३ ॥

प्रापइति । पुरा पूर्वं रूपी मत्स्यकूर्माद्यनेकरूपवान् अरेपाः निष्पापः परिपूरयति कामैर्भक्तानिति परिपूरी भक्तवरदः । पूरयतेर्णिनिः । परः परमपुरुषोहरिः परैः शत्रुभिः प्रापे प्राप्तः आवृत इत्यर्थः । अपरैरन्यैः शत्रुभिः कर्तृभिः अपारैरनन्तै रोपै रिषुभिः । पत्त्री रोपइषुर्द्वयोरित्यमरः । पुरोऽग्रे उपरि च

दिङ्मुखव्यापिनस्तीक्ष्णान् ह्रादिनो मर्म्मभेदिनः ।
चिक्षेपैकक्षणेनैव सायकानहितांश्च सः ॥ ९५ ॥
शरवर्षी महानादः स्फुरत्कार्म्मुककेतनः ।
नीलच्छविरसौ रेजे केशवच्छलनीरदः ॥ ९६ ॥

॥ गूढचतुर्थः ॥

पुपूरे पूरितः । पृणातेः कर्म्मणि लिट् । शब्दानुप्रासोऽलङ्कारः ॥ ९४ ॥

दिगिति । स हरिर्दिङ्मुखव्यापिनो दिगन्तव्यापकान् । अतितीक्ष्णान् निशितान् क्रूरांश्च । ह्रादन्ते इति ह्रादिनः पक्षनादवतः सिंहनादवतश्च । मर्म्मभेदिनो मर्म्मस्थानविदारकान् सायकानिषून् अहितानरींश्च एकक्षणेनैव चिक्षेप निरास । अत्र सायकानामहितानां च प्रकृतानामेव तुल्यधर्म्मयोगादौपम्योपगमात्तुल्ययोगिताभेदः ॥ ९५ ॥

शरेति । शरवर्षी बाणवर्षी नीरवर्षी च । शरं नीरे शरो बाण इति विश्वः । महान् नादः सिंहनादो गर्जितं च यस्य स महानादः । स्फुरन्ती कार्म्मुककेतने धनुर्ध्वजौ यस्य सः । अन्यत्रेन्द्रचापचिह्न इत्यर्थः । नीलच्छविः श्यामकान्तिः । अस्य केशवस्य छलं कपटं यस्य सः नीरदः केशवच्छलनीरदो हरिर्मेघोऽसौ रेजे रणरङ्गात्सर्व्वोत्कर्षेण दिदीपे इत्यर्थः । अत्र छलशब्देन हरित्वापह्नवेन मेघत्वारोपणाच्छलादिशब्दैरसत्यत्वप्रतिपादनरूपोपह्नवालङ्कारः । त्रिपाद्यन्तर्गतचतुर्थपादाक्षरलाद्गूढचतुर्थाख्यश्चित्रविशेषः शब्दालङ्कारश्चेति सङ्करः ॥ ९६ ॥

न केवलञ्जनैस्तस्य लघुसन्धायिनो धनुः ।
मण्डलीकृतमेकान्ताद्बलमैक्षि द्विषामपि ॥ ९७ ॥
लोकालोकी कलोऽकल्ककलिलोऽलिकुलालकः ।
कालोऽकलोऽकलिः काले कोलकेलिकिलः किल
॥ ९८ ॥ ॥ द्व्यक्षरः ॥

नेति । लघु शीघ्रं सन्धत्ते यस्तस्य लघुसन्धायिनस्तस्य हरेः धनुरेव केवलं एकान्तात् मण्डलीकृतं शीघ्राकर्षान्नियमेन वलयीकृतं जनैर्नैक्षि । कर्म्मणि लुङ् । किन्तु द्विषां बलमपि मण्डलीकृतं त्रासादेकत्र पुञ्जीकृतमैक्षि । अत्र धनुर्बलयोः प्रकृतयोरेव तुल्यधर्म्मयोगात् केवलप्रकृतास्पदा तुल्ययोगिता ॥ ९७ ॥

युग्मेनाह । लोकेति । लोकानालोकते इति लोकालोकी त्रैलोक्यदर्शी कलो मधुरभाषी कल्केन पापेन दम्भेन वा कलिलो न भवतीति अकल्ककलिलः । कल्कः पापाशये पापे दम्भेइति विश्वः । अलिकुलालकः अलिकुलनीलमूर्द्धज इत्यर्थः । कालो नीलवर्णः कालात्मको वा नास्ति कला यस्य सोऽकलः निरंश इत्यर्थः अकलि रकलहः स्वयमकलहशील इत्यर्थः । काले प्रलयकाले कोलकेल्या वराहलीलया किलति क्रीडति कोलकेलिकिलः । किलशब्दस्तु खल्वर्थे । विव्याधेत्युत्तरेण सम्बन्धः । द्व्यक्षरानुप्रासः ॥ ९८ ॥

असीति । स पूर्वोक्तगुणविशिष्टो हरिः तनुत्राणि एषां सन्तीति तनुत्रिणो वर्म्मिणः । तनुत्रं वर्म्म दंशनमित्यमरः । तान् द्विषतः शत्रून् असितारासु नेत्रकनीनिकासु विव्याध प्रजहार । तथा हि

अस्थितारास्तु विव्याध द्विषतः स तनुत्रिणः ।
दानेषु स्थूललक्ष्यत्वन्नहि तस्य शरासने ॥ ९९ ॥

॥ युग्मम् ॥

वररोऽविवरोवैरिविवारी वारिरारवः ।
विववार वरोवैरं वीरोरविरिवौर्वरः ॥ १०० ॥

॥ द्व्यक्षरः ॥

मुक्तानेकशरम्प्राणानहरद्भूयसान्द्विषाम् ।
तदीयन्धनुरन्यस्य न हि सेहे सजीवताम् ॥१०१॥

तस्य हरेः दानेषु वितरणेषु एव स्थूललक्ष्यत्वं विपुलविषयत्वं । स्थूलदानस्थूललक्ष्यदानशौण्डावङ्गप्रदे इत्यमरः । शरासने शरक्षेपे तु न किन्तु सूक्ष्मलक्ष्यत्वमेव अतोऽस्थितारावेधित्वमस्य युक्तमित्यर्थः । अतोवाक्यार्थहेतुकं काव्यलिङ्गम् ॥ ९९ ॥

वररइति । वरान् रातीति वररोवरप्रदः । रादाने आतोऽनुपसर्गे कः । अविवरोनिर्विवरोनीरन्ध्रः । वैरिणः शत्रून् विवारयति वैरिविवारी । वारीणि रातीति वारिरः । पूर्ववत्कः । तस्येवारवोयस्य स वारिरारवः । वरः श्रेष्ठोवीरः शूरः स हरिः । उर्वरा सर्व्वशस्याढ्यभूमौ स्यादूमिमात्रके इत्यमरः । तस्यां भवः और्वरः पृथ्वीभवः रविरिव वैरं वैरिणां वृन्दं विववार विवारयामास अधानेत्यर्थः । द्व्यक्षरानुप्रासः ॥ १०० ॥

मुक्तेति । मुक्तानेकशरं क्षिप्तबहुबाणं । तस्य हरेरिदं तदीयं धनुः भूयसां द्विषां प्राणानहरत् । तथा हि अन्यस्य परस्य सजीवतां न सेहे । अथ वा अन्यस्य धनुषः सजीवतां सज्याकत्वं न सेहे ।

राजराजीरुरोजाजेरजिरेऽजोऽजरोऽरजाः ।
रेजारिजूरजोर्जार्जो रराजर्जुरजर्जरः ॥ १०२ ॥

॥ द्व्यक्षरः ॥

उद्धतान्द्विषतस्तस्य निघ्नतो द्वितयं ययुः ।
पानार्थे रुधिरं धातौ रक्षार्थे भुवनं शराः ॥१०३॥

विषु जीवति जीवः स्वाम्भोर्व्वी स्तीति वैजयन्ती । वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ १०१ ॥

राजेति । न जायते इत्यजोऽनादिः । अन्येष्वपि दृश्यते इति जनेर्डप्रत्ययः । न जीर्य्यते इत्यजरः अनन्तः । पचाद्यच् । नास्ति रजो यस्येत्यरजा रजोगुणरहितः । रेजन्तीति रेजाः तेजिष्ठाः । रेजृ दीप्तौ पचाद्यच् । ते च ते अरयश्च तेषां जूरो हिंसनं तेन जातं रेजारिजूरजं । तदूर्ज्जं बलं अर्ज्जयतीति रेजारिजूरजोर्जार्जी । अर्ज्जेर्णिनिः । ऋजु राज्जववान् । जर्जरो न भवतीति अजर्जरो दृढः स हरिः आजेरजिरे रणाङ्गणे राजराजीः राजश्रेणीः रुरोज बभञ्ज । रुज भङ्गे लिट् । अतएव रराज दिदीपे । द्व्यक्षरानुप्रासः ॥१०२ ॥

उद्धतानिति । उद्धतान् दृप्तान् द्विषतः शत्रून् निघ्नतो हिंसतः । जासिनिप्रहणेति सूत्रे निप्रेतिसङ्घातविपर्य्यस्तव्यस्त ग्रहणोपदेशाद्धिंसन्तेः शेषकर्माणि द्वितीयैव । तस्य हरेः शराः । पानार्थे धातौ पा पाने इति धातौ सति रुधिरं रक्षार्थे धातौ पा रक्षणे इति भुवनं जगच्चेति द्वितयं ययुः रुधिरमपिबन् भुवनमरक्षंश्चेति शेषार्थः । अत्र पानयोरभेदाध्यवसायेन रुधिर भुवनयोस्तुल्ययोगितालङ्कारः । तच्च पानार्थइत्यादिवाक्यस्य शब्दा

क्रूरारिकारी कोरेकक्कारकः कारिकाकरः ।
कोरकाकारकरकः करीरः कर्करोऽर्करुक् ॥१०४॥

॥ द्व्यक्षरः ॥

विधातुमवतीर्णोऽपि लघिमानमसौ भुवः ।
अनेकमरिसङ्घातमकरोद्भूमिवर्द्धनम् ॥ १०५ ॥

बधेन भवनमरक्षमिति सूक्ष्मार्थगर्भत्वात् सौक्ष्म्यन्नाम गुणः । अत: मञ्जुत्वल्पत्वं शब्दानां सौक्ष्म्यमुच्यतइति लक्षणात् ॥ १०३ ॥

अथ युग्मेनाह । क्रूरेति । क्रूरान् अरीन् किरति विक्षिपति इति क्रूरारिकारी । किरतेर्णिनिप्रत्ययः । कोर्भूमेरेककारकः एक कर्त्ता । करोतेर्ण्वुल् । कारिकायातनाः करोति दुष्टानामिति कारिकाकरः । कारिका यातनावृत्त्योरित्यमरः । कृञोहेत्वित्यादिना ताच्छील्ये टप्रत्ययः । कारिकाः क्रियाः । धात्वर्थनिर्देशे ण्वुल् । तत्करइति केचित् । कोरकाकारौ करौ यस्य स कोरकाकारकरकः कमलमुकुलरमणीयपाणिरित्यर्थः । शैषिकः कप्रत्ययः । करिणोगजान् ईरयति क्षिपततीति करीरः । कर्मण्यण् । कर्करोऽरण कर्कशइत्यर्थः । अर्कस्येव रुक् यस्य सोऽर्करुगिल्युपमा । द्व्यक्षरान्प्रायः ॥ १०४ ॥

विधातुमिति । भुवोभूमेर्लघिमानं लघुत्वं भारावतरणं विधातुमवतीर्णोऽपि भुवि जातोऽप्यसौ पूर्व्वोक्तगुणोभगवान् हरिः अनेकं बहुमरिसङ्घातं भूमिवर्द्धनं भूभारमकरोत् इति विरोधः मृतमकरोदित्यविरोधः । अतएव विरोधाभासोऽलङ्कारः ॥ १०५ ॥

दारी दरदरिद्रोऽरिदारुदारोऽद्रिदूरदः।
दूरादरैर्द्रोऽददरद्रोदोरुद्दारुरादरी॥ १०६ ॥

॥ द्व्यक्षरः ॥

एकेषुणा सङ्गतियान् द्विषोभिन्दन्द्रुमानिव।
स जन्मान्तरनामस्य चक्रे सदृशमात्मनः ॥१०७॥

दारीति। दारी वक्रदारवान्। भूमार्थे मत्वर्थीयः। दरेण भयेन दरिद्रोनिर्भीकः। दरोऽस्त्रियां भये श्वभ्रइत्यमरः। उदारोमहान् दाता वा। उदारोदातृमहतोरित्यमरः। अद्रिवत् दुःखेन रद्यते दूरदोदुर्भेदोऽद्रिदूरदः। रद विलेखने खल् प्रत्ययः। अरौद्रः साधूनां सौम्यः रोदसीं रुणद्धीति रोदोरुत् विश्वव्यापी। रुधेः क्विप्। ददातीति दारुर्दाता। ददातेरौणादिको रुप्रत्ययः। आदरोऽस्यास्तीति आदरी सन्मार्गादरवान् स हरिः अरिरेव दारु काष्ठमरिदारु दूरादेव अददरत् दारयति स्म। दारयतेर्णौ चङि अत स्मृदृत्वरप्रथम्रदस्तृस्पशामित्यभ्यासस्यात्वम्। अरिदार्विति रूपकमर्थालङ्कारो द्व्यक्षरानुप्रासश्च ॥१०६॥

एकेषुणेति। स हरिरेकेषुणा एकेनैव शरेण सङ्गानां पूरणान् सङ्गतियान् सङ्गशः स्थितानित्यर्थः। वक्रपूगगणसङ्घस्य तिथुगिति तिथुगागमादेव ज्ञापकादसङ्ख्यात्वेपि सङ्घात् डट् प्रत्ययः। द्विषः शत्रून् द्रुमानिवेत्युपमा। भिन्दन् विदारयन्। जन्मान्तरे रामस्य दाशरथेरात्मनः सदृशं चक्रे। एकशरेणानेकारिद्रुमभेदस्तु जन्मान्तरभावनया यातइति भावः। विभेद च पुनस्तालान् स एकेन महेषुणेति रामायणे ॥ १०७ ॥

शूरः शौरिरशिशिरैराशाशैराशु राशिशः।
शरारुः श्रीशरीरेशः शुशूरेऽरिशिरः शरैः ॥१०८॥

॥ द्व्यचरः ॥

व्यक्तासीदरितारीणां यत्तदीयास्तदा मुहुः।
मनोहृतोऽपि हृदये लेगुरेषान्न पत्त्रिणः ॥ १०९ ॥

शूर इति । शृणातीति शरारुः दुष्टघातुकः । शरारुर्घातुको हिंस्र इत्यमरः । शृवन्द्योरारुरित्यारुप्रत्ययः । श्रीशरीरस्येशः श्रीशरीरेशः लक्ष्मीप्राणनाथः शूरो वीरः शौरिः कृष्णः अशिशिरै स्तीक्ष्णैः आशादिशोऽश्नुवत इत्याशाशैर्दिगन्तव्यापकैः । अश्नोतेः कर्मण्यण् । शरैर्बाणैः अरिशिरः शत्रुशिरांसि । जातावेकवचनम् । राशिशः सङ्घशः आशु शीघ्रं शुशूरे जघान । शूर हिंसास्तम्भनयोरिति धातोर्लिट् । द्व्यचरानुप्रासः ॥ १०८ ॥

व्यक्तेति । तदा तस्मिन्समये एषां अरीणामरिता शत्रुता मुहुर्व्यक्ता आसीत् । यद्यस्मात्तस्य हरेरिमे तदीयाः पत्त्रिणो बाणाः मनो हरन्ति कायादुद्धरन्ति इति मनोहृतो मारका इत्यर्थः । हरतेः क्विप् । मनोज्ञाः प्रतीयन्ते । अतएव मनोहृतोऽपि हृदये मनसि न लेगुर्न लग्नाः इति विरोधः वक्षो निर्भिद्य निर्जग्मुरित्यर्थः । हृदयं वक्षसि स्वान्ते इति विश्वः । विरोधाभासोऽलङ्कारः ॥ १०९ ॥

नामेति । भर्त्तुः स्वामिनो नामाक्षराणां फलेषु लिखितानां मलिना मालिन्यं तिरोधानं मा भूदिति बुद्ध्येत्यर्थः । अतः मार्गणाः हरिशराः पराङ्गनां अरिशरीराणां असून् प्राणान् असृजत । असृङ्लड् । मासं रक्तं । रक्ताविक्षेपस्य आशुभावनिमित्तस्य

नामाक्षराणामलिता मा भूद्भर्त्तुरतः स्फुटम् ।
अगृह्णन पराङ्गानामङ्कनस्तत्र मार्गणाः ॥११०॥

॥ अतालव्यः ॥

आच्छिद्य योधसार्थस्य प्राणसर्व्वस्वमाशुगाः ।
ऐकागारिकवद्भूमौ दूराज्जग्मुरदर्शनम् ॥१११॥

भीमास्त्रराजिनस्तस्य बलस्य ध्वजराजिनः ।
कृतघोराजिनश्चक्रे भुवः सरुधिराजिनः ॥११२॥

स्वागिनामाक्षरमालिन्यपरिहारार्थमुत्प्रेक्ष्यते स्फुटमिति । अत्र तालव्यवर्णाभावादतालव्यइति चित्रभेदः ॥ इचुयशानां तालुरिति इवर्णस्यापि तालुत्वेऽपि व्यञ्जनापेक्षएवायं नियमइति न दोषः ॥ ११० ॥

आच्छिद्येति । आशुगाः बाणाः योधसार्थस्य वीरवर्गस्य प्राणसर्व्वस्वं आच्छिद्य ऐकागारिकाश्चौराः । चौरकागारिकस्तेनेत्यमरः । ऐकागारिकः चौरइत्यर्थे निपात्यते इत्येके । इकट्प्रत्यये वृद्धिश्च निपात्यते इत्यपरे । तैस्तुल्यमैकागारिकवत् । तुल्यार्थे वतिः । दूराद्भूमावदर्शनमदृश्यतां जग्मुः ॥ १११ ॥

भीमेति । जिनोहरिः अवतारान्तरनाम्ना व्यपदेशः । भीमा अस्त्रराजयोयस्य तस्य भीमास्त्रराजिनः । इकोऽचि विभक्ताविति नुमागमः । ध्वजैराजते यस्तस्य ध्वजराजिनः । ताच्छील्ये णिनिः । कृता घोरा आजिर्युद्धं येन तस्य कृतघोराजिनः । पूर्व्ववन्नुमागमः । तस्य बलस्य सैन्यस्य सर्व्वाभिर्भीभुवस्तद्रणभूमेः सरुधिराः साजाश्चक्रे । चतुष्पादयमकम् ॥ ११२ ॥

मांसव्यधोचितमुखैः शून्यतान्दधदक्रियम्।
शकुन्तिभिः शत्रुबलं व्यापि तस्येषुभिर्नभः ॥११३॥
दाददोदुद्दुद्दादी दादादोदूददीददोः।
दुद्दादं ददद दुद्दे ददाददददोऽददः ॥११४॥
॥ एकाक्षरः ॥

मांसेति। मांसव्यधो मांसखण्डनम्। व्यधजपोरनुपसर्ग्गे इत्यप्प्रत्ययः। तत्रोचितानि परिचितानि मुखानि चञ्चवः शल्यानि च येषां तैः शकुन्तिभिः कङ्कैः शून्यतामचेतनत्वं अन्यत्र तुच्छत्वममूर्त्तत्वं वा दधत् अतएव अक्रियमस्पन्दं शत्रुबलं व्यापि व्याप्तं। आप्नोतेः कर्म्मणि लुङ्। तस्य हरेरिषुभिः नभो व्यापि। अत्रेषुपक्षिणां नभोबलयोर्व्याप्तितुल्यधर्म्मयोगित्वात्तुल्ययोगिताभेदः ॥ ११३ ॥

दाददइति। दीयते इति दादः दानं। दद दाने इति कर्म्मणि घञ्। दादं ददातीति दाददो दानप्रदः। आतोऽनुपसर्ग्गे कः। दुद्दुद्दादी दुत उपतापः। टुदुञ् उपतापे क्विप्। तद्दुदं उपतापं ददति साधूनामिति दुद्दाः खलाः। पूर्व्ववत्कः। तेषां दुदं उपतापं ददतइति दुद्दुद्दादी। दद दाने इति धातोर्णिनिः। दादादः। दाः शुद्धिः। दैप् शोधने क्विप्। तां ददतइति दादादः। दद दाने कर्म्मण्यण्। दूददीददोः। दूः परितापः। दूञ् परितापे क्विप्। तां ददातीति दूदाः दुष्टाः। दीः क्षयः। दीङ् क्षये क्विप्। तां दत्तइति दीदौ नाशकौ। उभयत्रातोऽनुपसर्ग्गे कः। दूदानां दीदौ दुष्टमर्द्दकौ दोषौ भुजौ यस्य सः दूददीददोः

स्रुतेभकुम्भोरसिजैर्हृद्यक्षतिजन्मभिः ।
प्रावर्त्तयन्नदीरस्रैर्द्विषां तद्योषितां च सः ॥११५॥

दुष्टभञ्जकभुज इत्यर्थः । ददाददददः । ददन्ते इति ददाः दातारः न ददन्ते इति अददा अदातारः तेषां द्यानामपि ददोऽदाता ददाददददः । सर्व्वत्र दद दाने पचाद्यच् । अदन्तीत्यदा वकासुरपूतनाप्रभृतयः । अदः पचाद्यच् । तान् द्यति खण्डयति इति अददः । दोऽवखण्डने आतोऽनुपसर्गे कः । एवम्भूतो हरिः । दुदं ददातीति दुद्दः दुःखदः तस्मिन् दुद्दे अरौ । दुदं ददत इति दुद्दादं अस्त्रं । दद दाने कर्म्मण्यण् । ददे ददौ प्रयुक्तवानित्यर्थः । दद दाने कर्त्तरि लिट् । एकाक्षरानुप्रासोऽलङ्कारः ॥ ११४ ॥

स्रुतेति । स हरिः स्रुताः उच्चिताः इभकुम्भाः उरसि जाता उरसिजा इव इभकुम्भा इवोरसिजाश्च यैस्तैः । हृद्यक्षतिभिर्वक्षःप्रहारैः मनोभङ्गस्य विषादापादकैः जन्म येषां तैः । हृदयं वक्षसि स्वान्त इति विश्वः । द्विषां तद्योषितां चास्रैः शोणितैरस्रुभिश्च । अस्रमस्रुणि शोणित इति विश्वः । नदीः प्रावर्त्तयत् प्रावाहयत् । अरिवधेन तन्नारीररोदयदित्यर्थः । अत्र द्यानामप्यस्राणां प्रकृतत्वात् प्रकृतश्लेषः । तैरस्रैर्द्विषां तद्योषितां यथासङ्ख्यसम्बन्धाद्यथासङ्ख्यालङ्कारः । तदुपजीवनेन द्विषान्तद्योषितां चास्रैः शोणितैः श्लेषमूलाभेदातिशयोक्तिमहिम्ना अस्तरूपतुल्यधर्म्मयोगित्वात्तुल्ययोगित अङ्गाङ्गिभावेनैषां सङ्करः ॥ ११५ ॥

सदामदबलप्रायस्समुद्धृतरसो बभौ।
प्रतीतविक्रमः श्रीमान्हरिर्हरिरिवापरः ॥ ११६ ॥

॥ अर्थत्रयवाची ॥

सदेति। सदा मदो यस्य स सदामदः नित्यमत्तस्तं बलं बल भद्रं प्रीणातीति सदामदबलप्रायः। परत्वात्कर्मण्यण्प्रत्ययः। समुद्धृता रसा भूर्येन स समुद्धृतरसः प्रतीताः प्रसिद्धाः विक्रमाः पादन्यासा यस्य सः त्रिविक्रम इत्यर्थः। श्रीमान् रमापतिः हरिः कृष्णोऽपरोऽन्यो हरिरिन्द्र इव बभौ सोऽपि सतामामदो दुःखदो यो बलासुरस्तस्य प्रायो नाशस्तं करोतीति सदामदबलप्रायः। तत्करोतीति ण्यन्तात्पचाद्यच्। समुद्धृतरसः अमृतपानेन सम्यगप हृतविषः। शृङ्गारादौ विषे वीर्ये द्रवे रागे गुणे रस इत्यमरः। प्रतीतविक्रमः प्रसिद्धपराक्रमः श्रीमान् स्वाराज्यलक्ष्मीयुक्तः। तथा ऽपरोन्यो हरिः सूर्य इव बभौ। सोऽपि आमं रोगं द्यति खण्ड यतीति आमदः। बलं पृणातीति बलप्रः। मूलविभुजादित्वात्कः। सतां भक्तानामामदो बलप्रश्च अय उदयो यस्य स सदामदबल प्रायः। स्वोदयेन सतामारोग्यबलकारीत्यर्थः। उद्यन्नद्येत्यादि श्रुतेरिति भावः। समुद्धृतरसः। घर्मकालसंशोषितसलिलः। प्रतीतविक्रमः प्रसिद्धखगतिः। यमानिलेन्द्रचन्द्रार्कविष्णुसिंहां शुवाजिषु शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिष्वित्यमरः। तदेवमुपमानयोरुपमेये चार्थत्रयवचनादर्थत्रयवाच्येष चित्रभेदः। एतावदेव कवेर्विवक्षितमतोऽन्यत्तु वाच्यस्योपस्कार्यमेव। अत्रापरो हरिरिवेत्यपरशब्दप्रयोगादुत्प्रेक्षेयं नोपमा। अपरस्येन्द्रस्यार्कस्य

द्विधा त्रिधा चतुर्द्धा च तमेकमपि शत्रवः ।
पश्यन्तः स्पर्द्धया सद्यः स्वयम्पञ्चत्वमाययुः ॥११७॥

वाऽप्रसिद्धेः । प्रसिद्धसादृश्यवर्णनमुपमा । प्रसिद्धतादृप्यारोपे रूपकम् । प्रसिद्धतादृप्यभावनमुत्प्रेक्षा । अतएव लक्षयन्ति । अप्रकृत गुणक्रियाभिसम्बन्धादप्रकृतत्वेन प्रकृतसंभावनमुत्प्रेक्षेति तस्माद परशब्देन प्रकृतस्याप्रकृतत्वाध्यवसायप्रतीतेरिवशब्देन तस्य साध्यत्व प्रतीतेरुत्प्रेक्षैवेति सर्व्वस्वकारः । तस्मादिवशब्दमात्रप्रयोगएवोपमा । अपरशब्दमात्रप्रयोगेऽतिशयोक्तिः । उभयोः प्रयोगे तूत्प्रेक्षैवेति विवेकः । अतएवात्रानेकार्थवर्णनव्यवसायिभिरपरशब्दस्यान्यार्थता व्यतिरेकेणार्थान्तरकल्पनापि नालङ्कारिकाणां पन्थाः । श्लेषश्चात्रो त्प्रेक्षावीजभूतसाधर्म्यनिर्व्वाहमात्रोपयोगितया तदङ्गमिति सङ्कर इत्यलमतिप्रसङ्गेन ॥ ११६ ॥

द्विधेति । शत्रवः एकमपि तं हरिं द्विधा द्वित्वेन त्रिधा त्रित्वेन चतुर्द्धा चतुष्टयेन पश्यन्तः भयात्तथा भ्राम्यन्तइत्यर्थः । स्पर्द्धया मत्सरेण सद्यः स्वयं पञ्चत्वं पञ्चधाभावं मरणञ्चाययुः । मत्सरिणस्तदधिकमाचरन्तीति भावः । स्यात्पञ्चता कालधर्म्मो दिष्टान्तः प्रलयोऽत्ययः । अन्तोनाशोद्वयोर्मृत्युर्मरणं निधनो ऽस्त्रियामित्यमरः । पाञ्चभौतिकस्य शरीरस्य पञ्चधाभावः पञ्चता । अत्र स्पर्द्धेति हेतोरुत्प्रेक्षणाद्धेतूत्प्रेक्षा सा च व्यञ्जका प्रयोगाद्गम्या स्पर्द्धयेवेत्यर्थः ॥ ११७ ॥

सदेति । सदैव सर्व्वदैव सम्पन्नं सर्व्वलक्षणसमग्रं वपुर्यस्य स सम्पन्नवपुर्नित्यपरिपूर्णमूर्त्तिः । संहितायां रुलोपे पूर्व्वस्य दीर्घो

सदैव सम्पन्नवपूरणेषु
स दैवसम्पन्नवपूरणेषु ।
महोदधेस्तारि महानितान्तं
महोदधेऽस्तारिमहा नितान्तम् ॥ ११८ ॥

॥ समुद्गः ॥

इष्टं कृत्वार्थं पत्रिणः शार्ङ्गपाणे-
रैत्याधोमुख्यं प्राविशन् भूमिमाशु ।
शुद्धा युक्तानां वैरिवर्गस्य मध्ये
भर्त्रा क्षिप्तानामेतदेवानुरूपम् ॥ ११९ ॥

अस्तं निरस्तमरीणां महस्तेजो येनासौ अस्तारिमहाः महानधिकः स हरिः दैवसम्पत् भाग्यसम्पत्तिः सैव नवम्पूरणं प्रत्ययसाधनं येषां तेषु दैवसम्पन्नवपूरणेषु दैवसहायेषु महोदधेर्महार्णवस्य इतान्तं प्राप्तपारं समुद्रपारगामि नितान्तं तारि विस्तीर्णं महस्तेजोऽदधे धारयामास । अर्द्धाभ्यासलक्षणसमुद्गयमकभेदः । अर्द्धाभ्यासः समुद्गः स्यादस्य भेदास्त्रयो मता इत्युक्तं दण्डिना । उपेन्द्रवज्रा वृत्तम् ॥ ११८ ॥

इष्टमिति । शार्ङ्गं पाणौ यस्य शार्ङ्गपाणेः कृष्णस्य । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति पाणेः परनिपातः । पत्रिणो बाणाः इष्टमर्थं शत्रुवधात्मकं कृत्वा आधोमुख्यं अधोमुखत्वमेत्य प्राप्य आशु भूमिमाविशन् शुद्धा लोहशुद्धाः पवित्रतया च युक्तानां तथापि भर्त्रा स्वामिना वैरिवर्गस्य मध्ये क्षिप्तानां पातितानां एतदेव आधोमुख्येन कचिन्निलयनमेवानुरूपमुचितम् ।

सत्वम्मानविशिष्टमाजिरभसादालब्ध्य भव्यः पुरो
लब्धावचयशुद्धिरुद्धुरतरश्रीवत्सभूमिर्मुदा ।
मुक्त्वा काममपास्तभीः परमृगव्याधः स नादं हरे
रेकौघैः समकालमभ्रमुदयी रोपैस्तदातस्तरे ॥१२०॥

॥ चक्रबन्धः ॥

सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । आगतं वश देवीवृत्तम् । पश्चार्श्च्छिन्ना वैश्वदेवी ममौ याविति लक्षणात् ॥ ११९ ॥

सत्वमिति । भव्यः कल्याणमूर्त्तिः लब्धोऽघचयः शुद्धिश्च येन स लब्धाघचयशुद्धिः श्रीवत्सस्य लाञ्छनविशेषस्य भूमिर्वक्षः सा उद्धुरतरा उन्नततरा यस्य स उद्धुरतरश्रीवत्सभूमिः काममपास्त भीः निर्भीकः परे शत्रवस्तएव मृगास्तेषां व्याधः मृगयुरित्य श्लिष्टरूपकम् । व्याधो मृगबधाजीवो मृगयुर्लुब्धकोऽपि चेत्यमरः । उदयी नित्याभ्युदयवान् । नित्ययोगे मत्वर्थीयः । स हरिः पुरः पूर्वं आजिरभसात् रणरागात् मानविशिष्टमहङ्कारोद्धुरं सत्वं बलं अ.लब्ध्याश्राय मुदा उत्साहेन हरेः सिंहस्य नादं मुक्त्वा सिंह नादं कृत्वेत्यर्थः समकालमेककालं । अत्यन्तसंयोगे द्वितीया । एक श्चौघोयेषां तैः एकौघैः एकप्रहारै रोपैरिषुभिरभ्रमाकाशं तदा तस्मिन् काले आतस्तरे आच्छादयामास । शार्दूलविक्रीडितमिति गुणः । चक्रबन्धाख्यश्चित्रविशेषोऽलङ्कारः पूर्वोक्तरूपकेण संसृज्यते । चक्र बन्धोद्धारस्तु । द्वादशषडरे खात्मके नवमषडक्षान्तराचवति चक्रे नाभिस्थानेन षट्कोणविंशतिकोष्ठं प्रत्येकं चामगतं पङ्क्तिषट्कं सम

इति श्रीमाघकृतौ शिशुपालवधे
महाकाव्ये एकोनविंशतितमः सर्गः ॥१९॥

रेखया लिखित्वा तत्रैकस्यां पङ्क्तौ वामपार्श्वक्रमेण आद्यपादमालिख्य तथा प्रादक्षिण्येन द्वितीयतृतीययोर्द्वितीयतृतीयौ लिखित्वा नेमिस्थाने बाह्यवलये आद्यरकोष्ठपङ्क्तेन सहाष्टादशकोष्ठवर्ति तृतीयपादान्तकोष्ठवर्त्तिवर्णमारभ्य प्रादक्षिण्येन चतुर्थपादं लिखित्वा तत्रैव समापयेत्। तत्र तत्राद्यन्तवर्णैः सह चतुर्थपादोद्धारः तत्र नाभिस्थाने आद्यपादत्रयद्शमाक्षरसंवादः। तृतीयान्तकोष्ठे चतुर्थाद्यन्तवर्णयोः संवादः तृतीयवलये माघकाव्यमिदं। षष्ठे शिशुपालवध इति कविकाव्यनामोद्धारः। शार्दूलविक्रीडितं वृत्तम्॥ १२०॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वङ्कषाख्ये एकोनविंशतितमः सर्गः॥ १९॥

मुखमुल्लसितत्रिरेखमुच्चै
र्भिदुरभ्रूयुगभीषणन्दधानः ।
समिताविति विक्रमानमृष्यन्
गतभीराह्वत चेदिराट् मुरारिम् ॥ १ ॥

अथ हरिशिशुपालयोर्युद्धं वर्णयितुमुपोद्घातं करोति । मुखमिति । इतीत्थं समितावाजौ । समित्याजिसमिद्युध इत्यमरः । विक्रमान् मुरारेः पराक्रमान् अमृष्यन् असहमानः अत एव त्रिस्रो रेखास्त्रिरेखाः । दिक्सङ्ख्ये संज्ञायामिति समासः । ता उल्लसिताः क्रोधादुद्भूता यस्मिन् तदुल्लसितत्रिरेखं । क्वचि त्त्रिलोकमित्यपि पाठः । तथा भिदुरेण ग्रन्थिलेन भ्रूयुगेन भीषणं भयङ्करं उच्चैरुन्नतं मुखं दधानः चेदिषु राजते चेदिराट् । सत्सूद्विषेत्यादिना क्विप् । यद्वा । चेदीनां राट् चेदिराट् । अन्येभ्योऽपि दृश्यते इति क्विप् । राजा राट् पार्थिवः क्ष्माभृदित्यमरः । गतभीः निर्भीकः सन् मुरारिं हरिं आह्वत । अयमहं वासि मामभ्युपेहि इति स्पर्द्धया अमर्षादाकारयामासेत्यर्थः । विनाशकाले विपरीतबुद्धेर्दुर्वारत्वादिति भावः । स्पर्द्धायामाङ इति ह्वयतेर्लुङि तङ् आत्मनेपदेष्वन्यतरस्यामिति च्लेरङादेशः । अमामर्षस्य विशेषणगत्या आह्वानहेतुत्वात् काव्यलिङ्गम् । सर्गेऽस्मिन्नौपच्छन्दसिकं वृत्तम् । वैतालीये गुर्वाधिक्यात् । तदुक्तं वैतालीये द्विः स्वराश्चयुक्पादे युग्वसवोऽन्ते गश्चौपच्छन्दसिकमिति ॥ १ ॥

शितचक्रनिपातसम्प्रतीक्षं
वहतः स्कन्धगतञ्च तस्य मृत्युम् ।
अभिशौरि रथोऽथ नोदिताश्वः
प्रययौ सारथिरूपया नियत्या ॥ २ ॥

अभिचैद्यमगाद्रथोऽपि शौरे
रवनिञ्जागुडकुङ्कुमाभिताम्रैः ।
गुरुनेमिनिपीडनावदीर्ण
व्यसुदेहस्रुतशोणितैर्विलिम्पन् ॥ ३ ॥

शितेति । अथ आज्ञानानन्तरं शितचक्रनिपातं शितसुदर्शन प्रहारं सम्प्रतीक्षत इति शितचक्रनिपातसम्प्रतीक्षं । ईक्षतेः कर्म्मण्यण् । स्कन्धगतं मृत्युं वहतः तस्य चैद्यस्य रथः सारथिरूपया नियत्या विधिनेति रूपकं । भाग्यं स्त्री नियति र्विधिरित्यमरः । नोदिताश्वः प्रेरिताश्वः सन् अभिशौरि शौरिमभि । आभिमुख्येऽव्ययीभावः । अव्ययादाप्सुप इति सुपो लुक् । प्रययौ प्रतस्थे ॥ २ ॥

अभीति । अथ शौरेः कृष्णस्य रथोऽपि जागुडो देशविशेषः तत्र यत्कुङ्कुमं तद्वदभिताम्रैररुणैरित्युपमा । यावकेति पाठे यावकस्य कुङ्कुमस्य ताभ्यामभिताम्रैरित्यर्थः । गुरूणां नेमीनां चक्रधाराणां निपीडनेन नोदनेनावदीर्णेभ्यो व्यसूनां विगत प्राणानां देहेभ्यः स्रुतैः शोणितैरसृग्भिरवनिं विलिम्पन् उपदिह्यन् सन् । अभिचैद्यं चैद्यमभि । समासो व्यासो वा विकल्पात् । अगात् । इणो गा लुङीति गादेशः ॥ ३ ॥

स निरायतकेतनांशुकान्तः
कलनिक्वाणकरालकिङ्किणीकः ।
विरराज रिपुक्षयप्रतिज्ञा
मुखरो मुक्तशिखः स्वयन्नु मृत्युः ॥ ४ ॥
सजलाम्बुधरारवानुकारी
ध्वनिरापूरितदिङ्मुखो रथस्य ।
प्रगुणीकृतकेकमूर्द्ध्वकण्ठैः
शितिकण्ठैरुपकर्णयाम्बभूवे ॥ ५ ॥

स इति । निरायतोऽतिदीर्घः केतनांशुकान्तः ध्वजपटाञ्चलो यस्य सः कलनिक्वाणैः मधुरस्वरैः करालाः कुशलाः प्रगल्भाः किङ्किण्यः क्षुद्रघण्टिका यस्य सः तथोक्तः । नद्यृतश्चेति कप् । किङ्किणी क्षुद्रघण्टिकेत्यमरः । स कृष्णस्य रथः रिपुक्षयस्य शिशुपालवधस्य प्रतिज्ञया मुखरो वाचालः अत एव मुक्तशिखो मुक्तकेशः विरराज । नाहमेनमहत्वा शिखाबन्धं करिष्यामीत्युद्घोषयन्नित्यर्थः स्वयं साक्षान्नु मृत्युरन्तकः किमित्युत्प्रेक्षा ॥ ४ ॥

सजलेति । सजलोऽम्बुधरः तस्यारवं गर्ज्जितमनुकरोतीति तथोक्तः तद्गम्भीर इत्यर्थः । उपमालङ्कारः । आपूरितदिङ्मुखो व्याप्तदिगन्तो रथस्य कृष्णरथस्य ध्वनिः ऊर्द्ध्वाः कण्ठाः येषां तैरूर्द्ध्वकण्ठैः आकस्मिकघनरवलोभादिव्यग्रत्वोन्नमितकन्धरैरित्यर्थः । शितिकण्ठैर्नीलकण्ठैः प्रगुणीकृताः अतितारीकृताः केका यस्मिन् कर्मणि तद्यथा तथा । केका वाणी मयूरस्येत्यमरः । उपकर्णयाम्बभूवे मेघारवभ्रान्त्या दत्तकर्णैरित्यर्थः । एतेन भ्रान्तिमदलङ्कारो व्यज्यत इति वस्तुनालङ्कारध्वनिः ॥ ५ ॥

अभिवीक्ष्य विदर्भराजपुत्री-
कुचकाश्मीरजचिह्नमच्युतोरः ।
चिरसेवितयापि चेदिराजः
सहसावाप रुषा तदैव योगम् ॥ ६ ॥

जनिताशनिशब्दशङ्कमुच्चै-
र्धनुरास्फालितमध्वनन्नृपेण ।
चपलानिलचोद्यमानकल्प-
क्षयकालाग्निशिखानिभस्फुरज्ज्यम् ॥ ७ ॥

अभीति । चेदिराजः शिशुपालः । राजाहःसखिभ्यष्टच् । विदर्भराजपुत्र्या रुक्मिण्याः कुचयोर्यत्काश्मीरजं कुङ्कुमं तच्चिह्नं यस्य तदच्युतोरः कृष्णवक्षः अभिवीक्ष्य चिरसेवितया चिरोपयुक्तापि रुक्मिणीहरणात्प्रभृति संभृतयापीत्यर्थः । रुषा रोषेण तदैव तदानीमिवेत्युत्प्रेक्षा । सहसा योगं सम्बन्धमवाप । यथा कामी कान्यन्तरभोगचिह्नदर्शनोद्दीप्तः कान्तया संयुज्यते तद्वदित्यर्थः परमार्थस्वरूप एव कोपो वैदर्भीकुचकुङ्कुमदर्शनादुद्दीपित इत्यर्थः । अत्र प्रकृतरुड्विशेषणसाम्यादप्रकृतकान्ताप्रतीतेः समासोक्तिः उक्तोत्प्रेक्षा त्वङ्गमस्याः ॥ ६ ॥

जनितेति । नृपेण चेदिपेन आस्फालितं घट्टितं अत एव चपलानिलेन तीव्रानिलेन चोद्यमानस्य संवर्ध्यमानस्य कल्पक्षयकालाग्नेर्या शिखा ज्वाला तया समाना तन्निभा। इति नित्यसमासः । सा स्फुरन्ती दोधूयमाना ज्या मौर्वी यस्य तत्तथोक्तं धनुः जनिता उत्पादिता अशनिशब्दशङ्का यस्मिन् कर्मणि

समकालमिवाभिलक्षणीय
ग्रहसन्धानविकर्षणापवर्गैः ।
अथ साभिसरं शरैस्तरस्वी
स तिरस्कर्त्तुमुपेन्द्रमभ्यवर्षत् ॥ ८ ॥

ऋजुताफलशुद्धियोगभाजां
गुरुपक्षाश्रयिणां शिलीमुखानाम् ।
गुणिना नतिमागतेन सन्धिः
सह चापेन समञ्जसो बभूव ॥ ९ ॥

मत्तयोक्तम् । उच्चैस्तरामध्वनत् । अत्राग्निशिखाभिरित्युपमाया असनिशब्दश्चेति भ्रान्तिमतः आस्फालितमध्वनदिति पदार्थहेतुककाव्यलिङ्गस्य च सापेक्षत्वात्सङ्करः ॥ ७ ॥

समेति । अथ धनुरास्फालनानन्तरं तरस्वी बलवान् स चैद्यः समकालमिवेत्युत्प्रेक्षा । अत्यन्तसंयोगे द्वितीया । अभिलक्षणीया दृश्याः ग्रहणं सन्धानं मौर्व्यायोजनं विकर्षणमाकर्षणमपवर्गो मोक्षश्च येषां तैः शरैः साभिसरं सानुचरं उपेन्द्रं हरिं तिरस्कर्त्तुमाच्छादयितुमभ्यवर्धत् ॥ ८ ॥

ऋजुतेति । ऋजुता अवक्रत्वं अकुटिलबुद्धित्वञ्च फलं शल्यं श्रेयश्च तेन योगः शुद्धिर्लोहशुद्धिर्निर्विषत्वञ्च अन्यत्र बाह्याभ्यन्तरशुद्धिस्तां भजन्तीति तद्भाजां गुरोर्महतः पक्षस्य कङ्कादिपक्षस्य सहायस्य चाश्रयः आश्रयणमेषामस्तीति गुरुपक्षाश्रयिणां शिलीमुखानां शराणां । गुणिना ज्यावता नतिमागतेन आकर्षणात्कुञ्चितकोटिना विधेयत्वञ्च प्राप्तेन चापेन सह

अविषह्यतमे कृताधिकारं
वशिना कर्म्मणि चेदिपार्थिवेन।
असरद्धनुरुच्चकैर्दृढार्त्ति
प्रसभाकर्षणवेपमानजीवम् ॥ १० ॥

सन्धिः सम्बन्धः समञ्जसः साधीयान् बभूव प्रबलवतां बलिना समेण सन्धिरेवोचितेति भावः । अत्र प्रस्तुतचापशिलीमुखयो र्विशेषणसाम्यादप्रस्तुतारित्रिजिगीषुवस्तुप्रतीतेः समासोक्तिः । तच्च साम्यं वाच्यप्रतीयमानयोरभेदाध्यवसायात्सिद्धम् । न चात्र समासालङ्कारशङ्का कार्य्या समानालङ्कृतियोगे वस्तुनोरननुरूपयोरित्यनुरूपयोरेव वस्तुनोर्योगेन तस्योपस्थापनादित्यनुसन्धेयं जिगीषुगुणयोगिनोरिह भेदात् ॥ ९ ॥

अविषह्येति । वशिना स्वतन्त्रेण चेदिपार्थिवेन अविषह्यतमे दुष्करे कर्म्मण्यरिजयव्यापारे कृताधिकारं कृतनियोगं क्रियमाणमित्यर्थः अतएव दृढयोरार्त्त्योः कोट्योः प्रसभाकर्षणेन वेपमाना दोधूयमाना जीवा ज्या यस्य तत् । अन्यच्च दृढयार्त्त्या ताडनेन प्रसभाकर्षणेन च वेपमानः कम्पमानोजीवः प्राणोयस्ये त्यर्थः । अर्त्तिः पोडाधनुष्कोट्योरित्यमरः । जीवः प्राणिऽस्त्रियां ना तु जन्तावात्मनि गीष्पतौ त्रिषु जीवति मौर्व्यां स्त्रीति वैजयन्ती । धनुरुच्चकैरसरत् अध्वनदाक्रन्दत् । यथा राज्ञा नियुक्तः पराधीनः बलादाकृष्यमाणः क्रोशति तद्वदित्यर्थः । अत्रापि प्रकृतविशेषणसाम्यादप्रकृतापराध्यधिकृतपुरुषप्रतीतेः समासोक्तिः ॥ १० ॥

अनुसन्ततिपातिनः पटुत्व
न्दधतः शुद्धिभृतो गृहीतपक्षाः ।
वदनादिव वादिनोऽथ शब्दाः
क्षितिभर्त्तुर्धनुषः शराः प्रसस्रुः ॥ ११ ॥
गवलासितकान्ति तस्य मध्य
स्थितघोरायतबाहुदण्डनासम् ।
ददृशे कुपितान्तकोन्नमद्भ्रू
युगभीमाकृति कार्म्मुकञ्जनेन ॥ १२ ॥

अन्विति । अथाकर्षणानन्तरं क्षितिभर्त्तुश्चैद्यस्य धनुषः सकाशात् अनुसन्तत्या पतन्तीति अनुसन्ततिपातिनोऽविच्छेदवर्त्तिनः पटुत्वं लक्ष्यभेदपाटवं वाचकत्वशक्तिञ्च दधतः शुद्धिभृतः लोहशुद्धिभृतः निर्दोषाश्च अन्यत्र साधवइत्यर्थः गृहीतपक्षाः स्वीकृतकङ्कादिपक्षाः । अन्यत्र गृहीतनित्यत्वादिसाध्यार्थाः । पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिष्विति वैजयन्ती । शराः वादिनः कथकस्य वदनाच्छब्दाः प्रतिज्ञाहेत्वादयइव प्रसस्रुर्निर्जग्मुः । श्लिष्टविशेषणेयमुपमेति केचित् । श्लेषएव प्रकृताप्रकृतविषय इत्यन्ये ॥ ११ ॥

गवलेति । गवलं माहिषं शृङ्गमित्यमरः । तद्वदसितकान्ति कृष्णवर्णं मध्ये स्थिता घोरा भीमा आयता च बाहुदण्डोनासा नासिकेव यस्मिन् तत्तथोक्तं । कुपितस्यान्तकस्य मृत्योरुन्नतं यद्भ्रुयुगं तद्वद्भीमा आकृतिर्यस्य तत्तस्य चैद्यस्य कार्म्मुकं जनेन ददृशे दृष्टं सभयविस्मयमिति भावः । उपमालङ्कारः ॥ १२ ॥

तडिदुज्ज्वलजातरूपपुङ्खैः
खमयःश्याममुखैरभिध्वनद्भिः ।
जलदैरिव रंहसा पतद्भिः
पिदधे संहतिशालिभिः शरौघैः ॥ १३ ॥
शितशल्यमुखावदीर्णमेघ
चरदस्रःस्फुटतीव्रवेदनानाम् ।
स्रवदस्रुततीव चक्रवालं
ककुभामौर्णविषुः सुवर्णपुङ्खाः ॥ १४ ॥

तडिदिति । तडिद्वदुज्ज्वलादीप्ताजातरूपस्य हेम्नः पुङ्खाः कर्त्तर्य्यो येषां तैः । अयोवत् श्याममुखैः श्यामाग्रैरभिध्वनद्भि र्ध्वनिभिः स्वनत्पत्त्रैर्गर्जद्भिश्च रंहसा वेगेन पतद्भिर्धावद्भिः संहतिशालिभिः सङ्घशालिभिः शरौघैर्जलदैरिव खमाकाशं पिदधे पिहितम् । कर्म्मणि लिट् । वष्टि भागुरिरल्लोपमवाप्योरुप सर्गयोरित्यपेरकारलोपः । उपमालङ्कारः ॥ १३ ॥

शितेति । सुवर्णपुङ्खाः सुवर्णकर्त्तरिकाः शराः शितैर्निशितैः शल्यमुखैः फलाग्रैः अवदीर्णाश्च भिन्नाये मेघास्तेभ्यः चरता स्रवता अस्रेण स्फुटा व्यक्ता तीव्रा वेदना यासां तासां ककुभां सम्बन्धि स्रवन्ती अस्रुततिरस्रुपङ्क्तिर्यस्य तदिव शरप्रहारवेदनया रुद दिव स्थितमित्युत्प्रेक्षा । चक्रवालं मण्डलमौर्णविषुः आच्छादया मासुः । ऊर्णोतेर्लुङीडागमे तस्य विभाषोर्णोरिति ङित्वाभावपक्षे ऊर्णोतेर्विभाषेति वृद्धिविकल्पात्पक्षे गुणः अजादित्वादाटश्चेति वृद्धिः ॥ १४ ॥

अमनोरमतां यती जनस्य
क्षणमालोकपथान्नभःसदां वा ।
रुरुधे पिहिताहिमद्युतिर्द्यौ-
र्विशिखैरन्तरिता च्युता धरित्री ॥ १५ ॥

विनिवारितभानुतापमेकं
सकलस्यापि मुरद्विषो बलस्य ।
शरजालमयं समं समन्ता-
दुरु सद्मेव नराधिपेन तेने ॥ १६ ॥

अमनेति । विशिखैरिषुबाणैः कर्तृभिः पिहिताहिमद्युतिस्तिरोहितार्का । अतएवामनोरमतां यती प्राप्नुवती । इणः शतरि उगितश्चेति ङीप् । द्यौराकाशं जनस्य भौमलोकस्य आलोकपथात् दृष्टिमार्गात् क्षणं रुरुधे रुद्धा । रुधः कर्म्मणि लिट् । अत्र पथोरोधापायत्वात् ध्रुवमपाये इति पञ्चमी । तथान्तरिता च्युता तिरोहिता नष्टा अतएवामनोरमतां यती धरित्री नभःसदां वा आलोकपथात् रुरुधे वाक्ययोजनमन्वयार्थः । अत्र द्युधरित्र्योः प्रकृतयोरेव रोधाख्यतुल्यधर्म्मयोगात्तुल्ययोगिताभेदौ ताभ्यामेव जनस्य नभःसदां यथासङ्ख्यान्वयाद्यथासङ्ख्यालङ्कारः सापेक्षतया सङ्कीर्य्यते ॥ १५ ॥

विनिवारितेति । नराधिपेन सकलस्यापि मुरद्विषो हरेर्बलस्य सैन्यस्य विनिवारितो भानुतापो येन तदेकमद्वितीयं शरजालमयं बाणवृन्दात्मकं उरु महत् सद्मेव सदनमिवेत्युत्प्रेक्षा । समं युगपत्समन्तात्तेने कृतमित्यर्थः । तनोतेः कर्म्मणि लिट् ॥ १६ ॥

इति चेदिमहीभृता तदानीं
तदनीकं दनुसूनुसूदनस्य ।
वयसामिव चक्रमक्रियाक-
मपरितोऽरोधि विपाटपञ्जरेण ॥ १७ ॥

इषुवर्षमनेकमेकवीर-
स्तदरिप्रच्युतमच्युतः पृषत्कैः ।
अथ वादिकृतम्प्रमाणमन्यैः
प्रतिवादीव निराकरोत्प्रमाणैः ॥ १८ ॥

इतीति । इतीत्थं चेदिमहीभृता चैद्येन तदानीं तत्काले दनुसूनुसूदनस्य दानवान्तकस्य हरेस्तदनीकं बलं । वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियामित्यमरः । वयसां चक्रं पक्षिसङ्घ इव अक्रियाकं निश्चेष्टं यथा तथा विपाटयन्तीति विपाटाः शराः । पचाद्यच् । तैरेव पञ्जरेण परितः सर्व्वतः अरोधि रुद्धं । रुधेः कर्म्मणि लुङ् । उपमा ॥ १७ ॥

इष्विति । अथानीकरोधनानन्तरं एकवीरो महाशूरोऽच्युतो हरिररिप्रच्युतं शत्रुगलितं तदनेकमपरिमितमिषुवर्षं पृषत्कैर्बाणैः वादिकृतं वादिना प्रयुक्तं प्रमाणमनुमानं अन्यैः प्रमाणैः प्रत्यक्षमानैः प्रतिवादीव निराकरोत् । इवेन समासो विभक्त्यलोपश्चेति समासात समासगता श्रौती पूर्णोपमा ॥ १८ ॥

प्रतीति । प्रतिकुञ्चितकूर्परेण कुञ्चितकफोणिना । स्यात्कफोणिस्तु कूर्पर इत्यमरः । तेन हरिणा श्रवणोपान्तिकं नीयमाना आकृष्यमाणा गव्या ज्या यस्य तत् । गव्यं गवां हिते गव्या ज्यायां

प्रतिकुञ्चितकूर्परेण तेन
श्रवणोपान्तिकनीयमानगव्यम् ।
ध्वनति स्म धनुर्घनान्तमत्त
प्रचुरक्रौञ्चरवानुकारमुच्चैः ॥ १९ ॥
उरसा विततेन पातितांसः
स मयूराञ्चितमस्तकस्तदानीम् ।
क्षणमालिखितोनु सौष्ठवेन
स्थिरपूर्व्वापरमुष्टिराबभौ वा ॥ २० ॥

क्षीरादिके त्रिष्विति विश्वः । धनुः शार्ङ्गं घनान्ते शरदि ये मत्ताः प्रचुरा भूरयः क्रौञ्चास्तेषां रवमनुकरोतीति तदनुकारं क्रौञ्चकूजितसदृशं यथा तथेत्यर्थः । कर्म्मण्यण् । उच्चैस्तारं ध्वनति स्म दध्वान । लट् स्मे इति भूते लट् । स्वभावोक्त्युपमयोः सङ्करः ॥१९॥

उरसेति । तदानीं धनुष्कर्षणसमये विततेन विस्तारितेनोरसा उपलक्षितः पातितांसो नमितस्कन्धः मयूरवदञ्चितं मनोहरं मस्तकं यस्य सः उन्नमितमूर्द्धेत्यर्थः । स्थिरौ दृढौ पूर्व्वापरौ अग्रिमचरमौ मुष्टी गृहीतसायकमौर्वीकौ पाणी यस्य स हरिः । सुष्ठु भावः सौष्ठवं तेन सौष्ठवेन स्थानकपाटवेन हेतुना क्षणमालिखितोनु लिखित इव आबभौ वा बभासे किं । नुशब्दो वितर्कार्थे । नु पृच्छायां वितर्के चेत्यमरः । वाशब्दोपि तादृश इत्युत्प्रेक्षालङ्कारोऽयम् ॥ २० ॥

ध्वनत इति । ध्वनतो गर्जतः तडित इवाकारो यस्य स तडिदाकारः चलनात्मकत्वाच्चाचिरप्रभाकारस्सन् गुणो

ध्वनतोनितरां रयेण गुर्व्या
स्तडिदाकारचलङ्गुणाद्सङ्ख्याः ।
इषवोधनुषः सशब्दमाशु
न्यपतन्नम्बुधरादिवाम्बुधाराः ॥ २१ ॥
शिखरोन्नतनिष्ठुरांसपीठः
स्थगयन्नेकदिगन्तमायतान्तः ।
निरवर्णि सकृत्प्रसारितोऽस्य
क्षितिभर्त्तेव चमूभिरेकबाहुः ॥ २२ ॥

मौर्वी यस्य तस्मात् । मौर्वीज्याशिञ्जिनीगुणाइत्यमरः । धनुषः शार्ङ्गात् गुर्व्यामहत्यः असङ्ख्या अपरिमिताइषवोऽम्बुधरान्मेधात् अम्बुधाराइवाशु सशब्दं न्यपतन् । अत्रोपमानोपमेययोरेक लिङ्गताम्बयादिषुशब्दोद्विलिङ्गोऽपि स्त्रीलिङ्ग एव प्रयुक्तइति ज्ञापनाय गुर्व्याइति विशेषणम् ॥ २१ ॥

शिखरेति । शिखरं शृङ्गमिवोन्नतं निष्ठुरं चांसपीठं यस्य सः एकदिगन्तं एकदिग्भागं स्थगयन् आयतान्तोद्राघिष्ठस्वरूपः । अन्तोऽध्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिकइति वैजयन्ती । सकृत्प्रसारितः न तु पुनः पुनरिति स्थैर्य्योक्तिः । अस्य हरेरेक बाहुश्चापरोपितो वामबाहुरित्यर्थः चमूभिः । क्षितिभर्त्तेव भूधरइव निरवर्णि साधु निरीक्षितइत्यर्थः । निर्वर्णनन्तु निध्यानं दर्शनालोकनेक्षणमित्यमरः ॥ २२ ॥

तमिति । अकुण्ठमुखाः निशिताग्राः प्रगल्भागिरश्च सुपर्णकेतो गरुडध्वजस्य हरेरिषवः परेणारिणा चित्रं मुक्तं दुष्प्रापं अयथार्थ

तमकुण्ठमुखाः सुपर्णकेतो
रिषवः क्षिप्तमिषुव्रजम्परेण ।
विभिदामनयन्त कृत्यपक्षं
नृपतेर्नेतुरिवायथार्थवर्णाः ॥ २३ ॥

दयितैरिव खण्डिता मुरारे
र्विशिखैः सम्मुखमुज्ज्वलाङ्कलेखैः ।
लघिमानमुपेयुषी पृथिव्यां
विफला शत्रुशरावलिः पपात ॥ २४ ॥

वर्णाः असत्याक्षराः कपटवचनाः उभयवेत्तार इत्यर्थः । कृत्यश्चेयो यथा वर्णश्चारः प्रणिधिरेव चेत्युत्पलमाला । नेतुर्नायकस्य जिगीषोः नृपतेः । कृत्यपक्षं अमात्यादिभेद्यवर्गमिव । कृत्या क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिरित्यमरः । विभिदां भेदं । षिद्भिदादिभ्योऽङ् । अनयन्त । स्वरितेत्यात्मनेपदम् ॥ २३ ॥

दयितैरिति । उज्ज्वलाः स्फुटाः अङ्केषु लेखाश्चिह्नलेखा नखरेखाश्च येषां तैः मुरारेर्विशिखैर्दयितैः प्रियैरिव सम्मुखं समक्षमेव खण्डिता भुग्ना अन्यथावमानिता अतएव विफला विशल्या अलब्धकामा च । अतएव लघिमानमगुरुत्वं अल्पताञ्चोपेयुषी शरावलिः पृथिव्यां पपात । अत्र प्रकृतशरावलिविशेषणसाम्याद् अप्रकृतखण्डितानायिकाप्रतीतेः समासोक्तिः । दयितैरिवेत्युपमा खण्डिताविशेषणान्तःपातित्वादङ्गमेव । अतएव तत्र विशेषणसाम्यं श्लिष्टतया साधारण्येनौपम्यगर्भत्वेन च भवतीत्युक्तं सर्व्वस्व

प्रमुखेऽभिहताश्च पत्रवाहाः
प्रसभं माधवमुक्तवत्सदन्तैः ।
परिपूर्णतरं भुवोऽगतायाः
परितः कातरवत्प्रतीपमीयुः ॥ २५ ॥
इतरेतरसन्निकर्षजन्मा
फलसङ्घट्टविकीर्णविस्फुलिङ्गः ।
पटलानि लिहन्बलाहकाना
मपरेषु क्षणमज्वलत्कृशानुः ॥ २६ ॥

कारैः । अतोऽन्यासक्तविकृते खण्डितेर्ष्याकषायितेति साप्येवं पृथिव्यां पततीति भावः ॥ २४ ॥

प्रमुख इति । पत्राणि वहन्तीति पत्रवाहाः पत्रिणश्चैद्यशराः । कर्मण्यण् । माधवमुक्तवत्सदन्तैः शौरिक्षिप्तशरैः प्रसभं बलात् प्रमुखे शल्याग्रे वदने चाभिहताः खण्डिताः सन्तः अत एव कातरैः त्रस्तैस्तुल्यं कातरवत् । तुल्यार्थे वतिप्रत्ययः । परिपूर्णतरं गतायाः गन्तव्यं गतायाः इत्यर्थः । भुवोऽन्तरालभूमेः परितः प्रतीपं प्रतिकूलमीयुः प्रापुः प्रत्यागताश्च । माधवान्तिकमागत्य जग्मुरित्यर्थः । चकारः पूर्वश्लोकोक्तपतनसमुच्चयार्थः । केचित् खण्डितास्तत्रैव पेतुः केचिन्मुखेषु प्रतिहताः प्रतिनिवृत्ता इत्यर्थः । कातरवदिति तद्धितगता श्रौती पूर्णोपमा ॥ २५ ॥

इतरेतरेति । इतरेतरसन्निकर्षजन्मा शराणां मिथः संश्लेषोत्थः । अन्यान्तरपदत्वाद्व्यधिकरणोऽपि बहुव्रीहिरिष्यते । फलसङ्घट्टेन शल्यसङ्घट्टनेन विकीर्णा विस्फुलिङ्गा यस्य सः कृशानुरग्निर्बलाहकानां

शरदीव शरश्रिया विभिन्ने
विभुना शत्रुशिलीमुखाभ्रजाले ।
विकसन्मुखवारिजाः प्रकाम
मभराजाइव यादवध्वजिन्यः ॥ २७ ॥
स दिवं समचिच्छदच्छरौघैः
कृततिग्मद्युतिमण्डलापलापैः ।
ददृशेऽथ च तस्य चापयष्ट्या
इषुरेकैव जनैः सकृद्विसृष्टा ॥ २८ ॥

वारि वहन्तीति वलाहकाः । पृषोदरादित्वात्साधुः । पटलानि लिहन् आस्वादयन् अपरेषु अन्येषु । समरेष्विति पाठे समरेषु युद्धेषु अपमज्वलत अदीप्यत । अत्र वलाहकानां अग्निदाहास्वादा सम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ २६ ॥

शरदीवेति । विभुना देवेन कर्त्रा शरश्रिया शरसम्पदा करणेन शरदीव शत्रुशिलीमुखाभ्राणीव तेषां जाले विभिन्ने सति विकसन्ति मुखानि वारिजानि इव यासां ताः यादवध्वजिन्यः यदुसेना आशा दिश इव प्रकामं बभुः । अनेकैवेयं उपमा ॥ २७ ॥

स इति । कृततिग्मद्युतिमण्डलस्यापलापो यैस्तैराच्छादितार्क मण्डलैरित्यर्थः । शरौघैर्दिवमाकाशं स हरिः समचिच्छदत् छादयति स्म । छादेर्णौ चङ्युपधाया ह्रस्वः अन्यतरस्यामिति ह्रस्वत्वम् । युक्तमेतत् । लघुहस्तत्वादस्येत्याशयेनोत्प्रेक्ष्यते । अथास्मिन्नवसरे तस्य हरेश्चापयष्ट्या इषुः सकृदेकदा विसृष्टा मुक्ता एकैव जनैर्ददृशे दृष्टा च । इषूनां पुङ्खानुपुङ्खगमनाद्राघीयानेक

भवति स्फुटमागतो विपक्षा
त्स सपक्षोऽपि हि निर्वृतेर्विधाता ।
शिशुपालबलानि कृष्णमुक्तः
सुतरान्तेन ततापतामरौघः ॥ २९ ॥

गुरुवेगविराविभिः पतत्रै
रिषवः काञ्चनपिङ्गलाङ्गभासः ।
विनतासुतवत्सलभ्रुवः स्म
व्यथितभ्रान्तभुजङ्गमं विशन्ति ॥ ३० ॥

एवैषुरेकरैव गच्छतीत्युत्प्रेक्षा । इदमलघुहस्तस्याकाशसञ्चारणं युक्तमिति भावः ॥ २८ ॥

भवतीति । विपक्षाच्छत्रुकुलादागतः सपक्षः कङ्कादिपक्षवान् स च निर्वृतेर्विधाता सुखकरोऽपि भवति हि यतः स्फुटम् । तेन कारणेन कृष्णमुक्तस्तोमरौघः शिशुपालबलानि सुतरां तताप ददाह । अतः शत्रुकुलादागतः स्वजनोऽपि न विश्वसनीय इत्यर्थः । सपक्षोऽप्यनिर्वृतिकर इति विरोधेऽपिशब्दः । विपक्षादागत इत्यविरोधाद्विरोधाभासः ॥ २९ ॥

गुर्व्विति । गुरुवेगविराविभिः गुरुणा वेगेन विरुवन्ति ध्वनन्तीति तथोक्तैः । रैतेर्विभिः । शीघ्रवेगविरावद्भिः पतत्रैः पक्षैरुपलक्षिताः काञ्चनेन पुञ्जलिप्तेन पिङ्गलाङ्गभासः । अन्यत्र काञ्चनवदिति विग्रहः । इषवः शरिशराः विनतासुतवद्वैनतेयैस्तुल्यं व्यथिताभीषिताः अतएव भ्रान्तामूढाभुजङ्गमा यस्मिन्

शतशः परुषाः पुरोविशङ्कं
शिशुपालेन शिलीमुखाः प्रयुक्ताः ।
परमर्म्मभिदोऽपि दानवारे-
रपराधाइव न व्यथां वितेनुः ॥ ३१ ॥
विहिताद्भुतलोकसृष्टिमाये
जयमिच्छन् किल मायया मुरारौ ।
भुवनत्रयकालयोगनिद्रे
न्टपतिः स्वापनमस्त्रमाजहार ॥ ३२ ॥

तत्तथा भुवस्तलं पातालं विशन्ति स्म । तद्धितगता श्रौती पूर्णोपमा पातालप्रवेशाधन्यस्यातिशयोक्त्या सङ्कीर्य्यते ॥ ३० ॥

शतशइति । शिशुपालेन पुरोऽग्रे विशङ्कं निःशङ्कं शतशः प्रयुक्ताः क्षिप्ताउच्चारिताश्च परुषाः निष्ठुराः परमर्म्मभिदोऽपि शिलीमुखाः शराः । शतशः अपराधाः पक्षद्वयसर्ग्गोक्ताः अभिशापाइव दानवारेर्हरेर्व्यथां दुःखं न वितेनुः स्वलापकारामहतामकिञ्चित्करादूति भावः । समासगतोपमा ॥ ३१ ॥

विहितेति । न्टपतिश्चैद्योविहिता अद्भुता लोकसृष्टिरेव माया यस्मिन् तस्मिन् भुवनत्रयकाले प्रलयकाले न त्विदानीमिति भावः उचिता योगनिद्रा । यस्य तस्मिन् मुरारौ मायया जयमिच्छन् किल न तु जेष्यतीति भावः । स्वापयतीति स्वापनं अस्त्रं आजहार प्रयुक्तवानित्यर्थः । अनादिमायाधारे सकलभुवनसृष्टिसंहार महानाटकसूत्रधारे सर्व्वाद्भुतनिधाने सकलकलुषकषणपटुतरा

सलिलार्द्रवराहदेहनीलो
विदधद्भास्करमर्थशून्यसंज्ञम् ।
प्रचलायतलोचनारविन्दं
विदधे तद्बलमन्धमन्धकारः ॥ ३३ ॥

भिधाने पुराणेन्द्रजालिके भगवति हरावपि मायया जिगोषे त्यहो महानस्य व्यामोह इति भावः । अत्र हरिविशेषणैस्तस्य दुर्ज्जयत्वसिद्धेः काव्यलिङ्गम् ॥ ३२ ॥

सलिलेति । सलिलेनार्द्रो यो वराहदेहस्तद्वन्नीलः भामं प्रकाशं करोतीति भास्करः । दिवाविभेत्यादिना टप्रत्ययः । तमर्थशून्या भास्करत्वरूपप्रवृत्तिनिमित्तशून्या संज्ञा भास्कराख्या यस्य तं विदधत् सौरलोकमभिभवन्नित्यर्थः । अन्धङ्करोतीति अन्धकारः स्वापनास्त्रप्रभवतमः । कर्म्मण्यण् । प्रचलानि निद्राघूर्णितानि आयतलोचनान्येवारविन्दानि यस्मिन् कर्म्मणि तत्तथा सूर्य्यतिरोधानेऽरविन्दमुकुलीभावस्याश्चर्यभावादिति भावः । तद्बलं हरिसैन्यं अन्धमपश्यं विदधे निद्रा प्राविशदित्यर्थः । अत्रान्धमन्धेति सकृद्व्यञ्जनयुग्मपौनरुक्त्यात् वृत्त्यनुप्रासभेदः । तस्य वराहदेहनीललोचनारविन्देत्युपमारूपकयोः संसृष्टिः ॥ ३३ ॥

गुरवइति । गुरवो धीराः व्यापतयोऽपि धनुषि निषद्य शयिता निद्रद्रुः सुषुपुरिति यत् एतत् धनुषि निद्राणं वाच्यं निन्द्यं न भवतिः । कुतः हि यस्मात्ते व्यापतयो जाग्रतोऽपि प्रबुद्धा अपि । जागर्तेः शतरि अस्य जक्षित्यादयः षडित्यभ्यस्तसंज्ञा नाभ्यस्ताच्छतुरिति नुम्प्रतिषेधः । चयितापदि सर्व्वापन्निवारक

गुरवोऽपि निषद्य यन्नदद्रु-
र्धनुषि क्ष्मापतयो न वाच्यमेतत् ।
स्थयितापदि जायतेऽपि नित्य-
मनु तत्रैव हि तेऽभवन्निषण्णाः ॥ ३४ ॥

श्लथतां व्रजतस्तथा परेषा-
मगलद्धारणशक्तिमुज्झतः स्वाम् ।
सुगृहीतमपि प्रमादभाजा-
मनसः शास्त्रमिवास्त्रमग्रपाणेः ॥ ३५ ॥

इत्यर्थः । तत्रैव धनुषि नित्यं निषण्णाः संश्रिता अभवन् ननु । अत्र सदा धनुराश्रयवाक्यार्थस्य वाच्यताहेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ ३४ ॥

श्लथतामिति । तथेति पूर्वोक्तधनुराश्रयणसमुच्चये यथा तेषां धनुराश्रयणं तथान्येषां धनुर्गलनमप्यभूदित्यर्थः । श्लथतां प्रयत्नशैथिल्यं व्रजतः भजतः स्वां निजां धारणशक्तिं वाहनसामर्थ्यं उज्झतः त्यजतः परेषां राज्ञां । अग्रश्चासौ पाणिश्चेति । समानाधिकरणसमासः हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदादिति वामनवचनात् । तस्मादग्रपाणेः सुगृहीतं सुष्ठु धृतमपि अन्यत्र स्वभ्यस्तमपि प्रमादभाजां गुणनिकाद्यवधानरहितानां मनसश्चित्तात् शास्त्रं विद्येव अस्त्रमगलदभ्रश्यत् निद्रापारवश्यादित्यर्थः । इवेन सह नित्यसमासात्समासगता श्रौती पूर्णोपमा ॥ ३५ ॥

उचितस्वपनोऽपि नीरराशौ
स्वबलाम्भोनिधिमध्यगस्तदानीम्।
भुवनत्रयकार्य्यजागरूकः
स परस्तत्र परः पुमानजागः ॥ ७६ ॥

उचितेति । नीरराशौ समुद्रे उचितस्वपनोऽपि परिचित निद्रोऽपि तदानीं सर्व्वनिद्रावसरे स्वबलाम्भोनिधिमध्यगः स्वसेना सागरमध्यगतः । बलपाथोनिधीत्यपि पाठः । भुवनत्रयकार्य्ये त्रैलोक्यरक्षाविधौ जागरूकः प्रबुद्धः । जागर्त्तेरूकञित्यूकञ् प्रत्ययः । परः पुमान् परमपुरुषः परं केवलं हरिरेवेत्यर्थः । परमव्ययमिच्छन्ति केवलइति विश्वः । तत्र निद्राणलोके अजागः जागर्त्ति स्म । सर्व्वान्धकारहारिणो नित्यप्रकाशचिदात्मनः तत्रापि कार्य्यग्रस्तस्य कुतो निद्रेति भावः । जागर्त्तेर्लुङि तिप् अदादित्वाच्छपो लुकि सार्व्वधातुकगुणे रपरे हलङ्याबितितिलोपे च रेफस्य विसर्ज्जनीयः । अत्र समुद्रनिद्राशीलस्यैव जागरे विरोध परिहारमुखेन कार्य्यजागरूकत्वपरमपुरुषत्वयोर्विशेषणगत्या तात्त्विकजागरणहेतुकत्वाद्विरोधाभाससङ्कीर्णं काव्यलिङ्गम् ॥ ७६ ॥

अथेति । अथान्धकारव्याप्त्यनन्तरं तस्य हरेर्दृष्टौ चक्षुषि तेजसी त्यर्थः । सूर्य्यरुचीव सूर्य्यतेजसीव । कौस्तुभोदर्प्पणइवेत्युपमित समासः । सूर्य्यरुचीवेतिलिङ्गात् । तं कौस्तुभदर्प्पणं गतायां प्रविष्टायां सत्यां ततः कौस्तुभात् पटु सर्व्वान्धकारद्रावणे समर्थं धाम तेजउद्भूत् उदगात् तद्धामोद्भवनं न चाद्भुतं कुतः असौ विभुर्भगवान् अर्केन्दू विलोचने यस्य स किल खलु अतस्तच्चक्षुषोः

अथ सूर्य्यरुचीव तस्य दृष्टा
यदभूत्कौस्तुभदर्प्पणङ्गतायाम् ।
पटु धाम ततान चाङ्गतन्त
द्विभुरिन्द्वर्कविलोचनः किलासौ ॥ ३७ ॥
महतः प्रणतेष्विव प्रसादः
स मणेरंशुचयः ककुम्मुखेषु ।
व्यकसद्विकसद्विलोचनेभ्यो
दददालोकमनाविलम्बलेभ्यः ॥ ३८ ॥

सूर्य्यात्मकत्वात्तदभिहतात् कौस्तुभाद्दर्प्पणादेरिव धाम प्रादुर्भावो व्यज्यते इत्यर्थः । अतो वाक्यार्थहेतुकङ्काव्यलिङ्गम् ॥ ३७ ॥

महत इति । स पूर्व्वोक्तमणेः कौस्तुभस्यांशुचयः विकसन्ति उन्मीलन्ति विलोचनानि येषां तेभ्योवलेभ्योऽनाविलं प्रसन्न मालोकं दर्शनं तत्स्थानस्य ददत्प्रतियच्छन् । महतो महात्मनः प्रसादोऽनुग्रहः प्रणतेषु भक्तेषु इव ककुम्मुखेषु ककुभामग्रेषु व्यकसदमूर्च्छत् । पूर्णोपमा ॥ ३८ ॥

प्रकृतिमिति । प्रकृतिं स्वभावं प्रतिपादकैः प्रतिपद्यमानैः । लषपतपदेत्यादिना उकञ्प्रत्ययः न लोकेत्यादिना षष्ठीप्रतिषेधः । भानुमतोंऽशुमतः पादैरश्मिभिश्च पुनर्भूयः प्रसक्तुं चक्लृपे शेके । कृपू सामर्थ्ये भावे लिट् कृपोरोलइति ऋकारस्यापि रेफस्य लकारः । जीवलोकः प्राणिवर्गस्य तमसोऽन्धकारस्याभिभवादभिभूतत्वादित्यर्थः । कर्तृकर्मणोः कृतीति कर्म्मणि षष्ठी ।

प्रकृतिप्रतिपादकैश्च पादैः
स्वरूपे भानुमतः पुनः प्रसर्तुम् ।
तमसोऽभिभवादपास्य मूर्च्छां
मुदजीवत्सहसैव जीवलोकः ॥ ३९ ॥
घनसन्तमसैर्जवेन भूयो
यदुयोधैर्युधि रेधिरे द्विषन्तः ।
ननु वारिधरोपरोधमुक्तः
सुतरामुत्तपते पतिः प्रभाणाम् ॥ ४० ॥

सहसैव मूर्च्छामपास्य उदजीवत् उदश्वसीत् । अत्रोज्जीवनस्यार्ककरप्रसारहेतुकत्वात् वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ ३९ ॥

घनेति । घनं सान्द्रं सन्तमसमन्धकारो येषां । अवसमन्धेभ्यस्तमस इति समासान्तोऽच्प्रत्ययः । गतेति पाठे गतं सन्तमसं येषान्तैः यदुयोधैर्यादवभटैर्भूयः पुनरपि जवेन युधि द्विषन्तो रेधिरे जिहिंसिरे हता इत्यर्थः । राध्यतेः कर्म्मणि लिट् । राधो हिंसायामित्येत्वाभ्यासलोपौ । तथा हि वारिधरोपरोधात् मेघापवरणात् मुक्तः प्रभाणां द्युतीनां पतिरर्कः सुतरामुत्तपत एव ननु प्रकाशत एव खलु । उद्विभ्यान्तप इत्यात्मनेपदम् । अत्र यदुयोधानां द्युतिपतेश्च वाक्यभेदेन प्रतिबिम्बकरणाद्दृष्टान्तालङ्कारः । न चोपमानोपमेययोर्भिन्नवचनत्वदोषः लोके चन्द्रार्कादीनामुपमानानामेकत्वेऽपि चन्द्रानना इतिवत् प्रत्येकमौपम्यात् ॥ ४० ॥

व्यवहार इति । व्यवहारे न्यायवादे अनृताभियोगं मिथ्याभिशंसनमिव प्रकाशे कौस्तुभतेजसि तिमिरं प्रस्वापनान्धकारं

म २

व्यवहार इवान्टताभियोग
स्तिमिरन्निर्ज्जितवत्यथ प्रकाशे ।
रिपुरुल्बणभीमभोगभाजां
भुजगानाञ्जननीञ्जजाप विद्याम् ॥४१॥
पृथुदर्विभृतस्ततः फणीन्द्रा
विषमाशीभिरनारतं वमन्तः ।
अभवन् युगपद्विलोलजिह्वा
युगलीढोभयसृक्कभागमाविः ॥ ४२ ॥

निर्ज्जितवति निरस्तवति सति अथैतन्निरसनानन्तरं रिपुश्चैद्य उल्बणान् महतो भीमांश्च भोगान् फणान् कायांश्च भजन्तीति तद्भाजः । भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः । भुजगानां जननीमुत्पादिकां विद्यां मन्त्रं जजाप जपति स्म भुजगास्त्रमाजहारेत्यर्थः । उल्बणेत्यत्र क्वचिदुत्फणेति पाठः । उपमालङ्कारः ॥ ४१ ॥

पृथ्विति । ततो भुजगास्त्रप्रयोगानन्तरं पृथुदर्विभृतः महाफणाधारिण इत्यर्थः । अतएव दर्वीकरो दीर्घपृष्ठ इत्यत्र दर्वीरूपः फण एव करो हस्तोऽस्येति प्रकाशादौ व्याख्यानम् । आशीभिर्दंष्ट्राभिः । आशी उरगदंष्ट्रायामिति वैजयन्ती । अनारतमश्रान्तं विषं वमन्तः उद्गिरन्तः फणीन्द्राः महासर्पाः विलोलैश्चञ्चलै र्जिह्वायुगैर्लीढावास्वादितावुभौ सृक्कभागावोष्ठप्रान्तदेशौ यस्मिन् कर्म्मणि तत्तथा । प्रान्तावोष्ठस्य सृक्कणी इत्यमरः । आविरभवन् । उभादुदात्तो नित्यमिति नित्यपदसामर्थ्यात् वृत्तिविषये उभ

कृतकेशविडम्बनैर्विहायो
विजयन्तस्त्वणमिच्छुभिश्छलेन ।
अमृताग्रभुवः पुरेव पुच्छं
वडवाभर्त्तुरवारि काद्रवेयैः ॥ ४२ ॥

शब्दस्य स्थानेऽप्युभयशब्दस्यैव प्रयोगः । उभयपुत्रइत्यादिप्रयोगसिद्धेरिति कय्यटमस्माभिः प्रकटितं बहुधा सञ्जीविन्यां घण्टापथे सर्वङ्कषायाञ्च तत्र तत्र । स्वभावोक्तिरलङ्कारः ॥ ४१ ॥

कृतेति । कृतकेशविडम्बनैः कार्ष्ण्यादिहितकेशानुकारैः छलेन कपटेन विजयमिच्छुभिरभिलाषुकैः । विन्दुरिच्छुरिति उप्रत्ययान्तो निपातितः न लोकेत्यादिना षष्ठीप्रतिषेधः । विहायसाकाशमाक्रम्य काद्रवेयैः कद्रुपुत्रैः फणीन्द्रैः । स्त्रीभ्योढगिति ढक् । पुरा पूर्वमिव अमृताग्रभुवोऽमृताग्रजस्य वडवाभर्त्तुः उच्चैःश्रवसः पुच्छं अवारि आवृतं । वृञः कर्म्मणि लुङ् । पुरा किल कद्रुविनतयोः कश्यपभार्य्ययोरुच्चैःश्रवसः पुच्छस्य कार्ष्ण्यश्वैत्यविवादे दास्यपणे काद्रवेयैः स्वमातुर्विजयाय गृहीतवालाकारैरुच्चैःश्रवसः पुच्छाच्छादनं चक्रे इति कथा पुराणादनुसन्धेया । उपमा ॥ ४२ ॥

दधतइति । मुखे मस्तभागे मुखसन्धौ च विशालाः विस्तृताश्चानुपूर्व्याश्चानुक्रमेण तनिमानं तनुत्वं मुखादन्यत्र शरीरे उत्तरोत्तरं तनुत्वं दधतः अन्यत्र प्रतिमुखादिसन्धिषु गोपुच्छवत् संक्षिप्तत्वं दधानाः ऋषिश्रवसः सर्प्पाः भरतज्ञानाट्यशास्त्रज्ञः । भरतो नाट्यशास्त्रेऽपीति विश्वः । तेन कविना प्रणीतं प्रकल्पितं यत्काव्यं कविकर्म्म लक्षणया काव्यार्थः तथा वास्तु । शास्त्राणादिलात् शब्द

दधतस्तनिमानमानुपूर्व्या
बभुरक्लिश्रवसोमुखे विशालाः ।
भरतज्ञकविप्रणीतकाव्य
ग्रथिताङ्का इव नाटकप्रपञ्चाः ॥ ४४ ॥

सविषश्वसनोद्धतोरुधूम
व्यवधिम्लानमरीचि पन्नगानाम् ।
उपरागवतेव तिग्मभासा
वपुरौदुम्बरमण्डलाभमूहे ॥ ४५ ॥

मत्यय: । तत्र ग्रथिता गुम्फिताः अङ्काः परिच्छेदरूपाः अवान्तरसन्दर्भविशेषा येषु ते तथोक्ता नाटकप्रपञ्चा नाटकविस्तारा इव बभुरित्युपमा । प्रबन्धा इति क्वचित्पाठः । मत्यचनेतच्चरितो विन्दुवीजपुरस्कृतः । अङ्को नानाप्रकारार्थ संविदन्तरमाश्रय इति अङ्कलक्षणं । मुखं प्रतिमुखं गर्भोऽवमर्श उपसंहृतिरिति सन्धयः ॥ ४४ ॥

सइति । तिग्मभासा सूर्य्येण उपरागवता राहुग्रासवतेव राहुग्रस्तेनेत्यर्थः । उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि चेत्यमरवचनं ग्रासस्याप्युपलक्षणम् । पन्नगानां सविषैः श्वसनैः फूत्कारैः उद्धुतेनोरुधूमेन यो व्यवधिस्तिरोधानं तेन म्लानानि निष्प्रभा मरीचयो यस्य तत् । अतएवौदुम्बरमण्डलाभं ताम्रपिण्डसच्छायं । अथ ताम्रकं शुल्वं म्लेच्छमुखं द्वष्टं वरिष्ठोदुम्बराणि चेत्यमरः । वपुरूहे ऊढं । वहेः कर्म्मणि लिट् । यजादित्वात्सम्प्रसारणम् ॥ ४५ ॥

शिखिपिच्छकृतध्वजावचूल-
क्षणसाशङ्कविवर्त्तमानभोगाः ।
यमपाशवदाशु बन्धनाय
न्यपतन्वृष्णिगणेषु लेलिहानाः ॥ ४६ ॥

पृथुवारिधिवीचिमण्डलान्त-
र्विलसत्फेनवितानपाण्डराणि ।
दधति स्म भुजङ्गमाङ्गमध्ये
नवनिर्म्मोकरुचिं ध्वजांशुकानि ॥ ४७ ॥

शिखीति । पुनः पुनर्लेहनशीलाः लेलिहानाः सर्पाः लिहेर्यङ्लुगन्तात्ताच्छील्ये शानच्प्रत्यये गुणो यङ्लुकोरित्य भ्यासस्य गुणः । लिहेर्लिटः कानजिति वल्लभः । तदानीमभ्यास गुणानुपपत्तिः भूतार्थासङ्गतिश्च । शिखिपिच्छैर्मयूरबर्हैः कृतेभ्यो ध्वजानामवचूडेभ्यः प्रकीर्णेभ्यः क्षणं साशङ्काः जीवन्मयूरभ्रान्त्या सभयाः अतएव विवर्त्तमानकायाः व्यावृत्तदेहाः सन्तः आशु वृष्णि गणेषु यादवसङ्घेषु बन्धनाय यमपाशैस्तुल्यं यमपाशवत् काल पाशवदित्युपमा । न्यपतन् निपत्य बबन्धुरित्यर्थः ॥ ४६ ॥

पृथ्विति । भुजङ्गमाङ्गमध्ये पृथोर्वारिधिवीचिमण्डलस्यान्त र्मध्ये विलसन्तः फेना इव वितानपाण्डुराणि शुभ्रवर्णानीत्युपमा । ध्वजांशुकानि नवनिर्म्मोकरुचिं नवकञ्चुकशोभां दधति स्म । समौ कञ्चुकनिर्मोकावित्यमरः । निर्मोकरुचिमित्यत्रान्यधर्म्मस्यान्यासम्बन्धेन निर्मोकस्येवेति सादृश्याक्षेपादसम्बन्धनिदर्शना फेनपाण्डुरोपमयाङ्गेन सङ्कीर्य्यते ॥ ४७ ॥

कृतमण्डलबन्धमुल्लसद्भिः
शिरसि प्रत्युरसं विलम्बमानैः ।
व्यरुचज्जनता भुजङ्गभोगै
र्दलितेन्दीवरमालधारिणीव ॥ ४८ ॥
परिवेष्टितमूर्त्तयश्च मूला
दुरगैराशिरसः सरत्नपुष्पैः ।
दधुरायतवल्लिवेष्टिताना
मुपमानम्मनुजा महीरुहाणाम् ॥ ४९ ॥

कृतेति । जनता जनसमूहः । ग्रामजनेत्यादिना सामूहिकस्तल् प्रत्ययः । शिरसि कृतो मण्डलबन्धो वलयीभावो यस्मिन् कर्म्मणि तत्तथा उल्लसद्भिः प्रत्युरसं उरसि उरसि । प्रतेरुरसः सप्तमीस्था दिति समासान्तोऽच्प्रत्ययः । विलम्बमानैर्विशेषेण लम्बमानैः भुजङ्गभोगैरहिकायैः दलितेन्दीवरमालधारिणी विकसितनीलो त्पलमालधारिणीवेत्युत्प्रेक्षा । व्यरुचत् व्यरोचिष्ट । द्युद्भ्यो लुङीति विकल्पात्परस्मैपदम् ॥ ४८ ॥

परिवेष्टितेति । किञ्चेति चार्थः मूलात्पादमारभ्येत्यर्थः । ल्यब्लोपे पञ्चमी । आशिरसः शिरोऽन्तं । अभिविधावाङिति विकल्पादसमासः । रत्नैरेव पुष्पैस्तैः सह वर्त्तन्ते इति सरत्नपुष्पैः । तेन सहेति तुल्ययोगे इति बहुव्रीहिः । उरगैः परिवेष्टितमूर्त्तयो वेष्टिताङ्गाः मनुजा आयताभिर्वल्लीभिर्लताभिर्वेष्टितानां महीरुहाणां उपमानं सादृश्यं दधुरित्युपमा ॥ ४८ ॥

वङ्गलाञ्जनपङ्कपट्टनील-
द्युतयो देहमितस्ततः श्रयन्तः ।
दधिरे फणिनस्तुरङ्गमेषु
स्फुटपल्याणनिबद्धवद्ध्रलीलाम् ॥ ५० ॥
प्रसृतं रभसादथोऽभिनीला
प्रतिपादम्परितोऽभिवेष्टयन्ती ।
तनुरायतिशालिनी महाहे-
र्गजमन्दूरिव निश्चलञ्चकार ॥ ५१ ॥

वङ्गेति । वङ्गलाञ्जनस्य सान्द्रकज्जलस्य पङ्कपट्टः पङ्कघनस्तद्वन्नीलद्युतयः श्यामभासः । देहं शरीरमितस्ततः पुच्छपार्श्वादिस्थानेषु श्रयन्तो भजन्तः फणिनस्तुरङ्गमेषु स्फुटानि उज्ज्वलानि यानि पल्याणेषु पर्याणेषु निबद्धानि वद्ध्राणि वरत्राः । वद्ध्रं चर्म वरत्रयोरिति विश्वः । तेषां लीलां शोभां दधिरे दधुः । वद्ध्रलीलामित्यत्रासम्भवद्वस्तुसम्बन्धा निदर्शनालक्षणा ॥ ५० ॥

प्रसृतमिति । अथवा अथोवत् अभिनीला पादेषु प्रतिपादम् । विभक्त्यर्थेऽव्ययीभावः । अभिवेष्टयन्ती आयतेन आयत्या दैर्घ्येण शालते या सा आयतिशालिनी महाहेर्महोरगस्य तनुर्वपुरन्दूः शृङ्खलेव । अन्दूस्तु शृङ्खलायां स्त्रीति वैजयन्ती । रभसात्प्रसृतं प्रचरन्तं गजं निश्चलं चकार । उपमा ॥ ५१ ॥

अथेति । अथ नागपाशबन्धानन्तरं माधवेन कृष्णेन अवज्ञया अकिञ्चित्करत्वादनादरेण चलिता प्रेरिता एका उन्मिता उत्थिता च भूयस्मिन् कर्मणि तत्तया । गोस्त्रियोरुपसर्जनस्येति

अथ सस्मितवीक्षितादवश्या
चलितैकोन्नमितभ्रु माधवेन।
निजकेतुशिरःश्रितस्सुपर्णा
दुदपप्तन्नयुतानि पक्षिराजाम्॥ ५२ ॥

द्रुतहेमरुचः खगाः खगेन्द्रा
दलघूदीरितनादमुत्पतन्तः।
जगमैक्षिपतोऽस्य कैश्चमूभि
र्ज्वलतः सप्तरुचेरिव स्फुलिङ्गाः॥ ५३ ॥

ईषल्लम्। सस्मितं वैद्यमापस्यद्येनास्समन्दहासं वीक्षितात् निज केतुशिरःश्रितः निजध्वजाग्रस्थितात्। श्रयतेः क्विप्। सुपर्णात् पक्षिणां राजः राजानः तेषां पक्षिराजां पक्षिराजानां गरुत्मतां। राजा राट् पार्थिवइत्यमरः। अन्येभ्योऽपि दृश्यते इति क्विप्। अयुतानि अयुतसङ्ख्याउदपप्तन्नुत्पेतुः। पुषादित्वाल्लुङि च्लेरङा देशः। पतः पुमितिपुगागमः उदभूवन्निति पाठे भुवोवुगिति वुगागमः। माधवस्य सुपर्णवीक्षणावस्थोचितभ्रूविक्षेपादिचेष्टा विवरणात् स्वभावोक्तिः। तदुक्तं दण्डिना। नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती। स्वभावोक्तिश्च जातिश्चेति। जातिक्रियागुण द्रव्यस्वभावाख्यानमीदृशमिति च॥ ५२ ॥

द्रुतेति। द्रुतहेमरुचः प्रतप्तकाञ्चनभासइत्युपमा। अलघूच्चै रुदीरितनादं उच्चरितघोषं यथा तथा खगेन्द्रात् गरुत्मतः उत्पतन्तः उद्भवन्तः खगाः सुपर्णाः ज्वलतः प्रज्वलतः सप्तरुचेः सप्तार्चिषोऽग्नेरर्कैरूर्ध्वं प्रसृताः स्फुलिङ्गाइव चमूभिः

उपमानमलाभि लोलपक्ष
क्षणविक्षिप्तमहाम्बुवाहमत्यैः ।
गगनार्णवमन्तरा सुमेरोः
कुलजानाङ्गरुडैरिलाधराणाम् ॥ ५४ ॥

क्षणमैक्षिषत ईक्षिताः । ईक्षतेः कर्म्मणि लुङ् । अत्रोपमयोः सङ्करः ॥ ५३ ॥

उपमानमिति । गगनमर्णवइव गगनार्णवस्तमन्तरा तस्य मध्ये इत्यर्थः । अन्तरान्तरेण युक्त इति द्वितीया । अत्रार्णवस्यैकत्वेऽपि तदेकदेशापेक्षया भेदवत्त्वेन मध्यप्रतियोगित्वसम्भवान्न द्वितीयानुपपत्तिः । लोलैः पक्षैः क्षणाद्विक्षिप्तामहाम्बुवाहामत्स्याइव यैस्तैर्गरुडैर्गरुत्मभिः सुमेरोः कुलजानां हेमाद्रिवंश्यानां अन्येषामद्रिणामथनया गरुडसाम्यामभ्रवादित्यर्थः इलाधराणां भूधराणां अर्णवान्तस्थराणामित्यर्थः । गौरिला कुम्भिनी क्षमेति कोषः । उपमानं सादृश्यमलाभि अलम्भि । लभेः कर्म्मणि लुङि विभाषा चिण्मुलोरिति विकल्पान्नुमभावः । अत्रेलाधराणामुपमानमिति व्यस्तोपमाया अन्याभ्यां समासगताभ्यामङ्गाङ्गिभावेन सङ्करः ॥ ५४ ॥

पततामिति । परिस्फुरद्भिः स्वविषयसङ्क्रमात्स्यमन्तादुल्लसद्भिः अतएव परिपिञ्जीकृतानि मौवर्णत्वात्पिञ्जरीकृतानि दिङ्मुखानि यैस्तैः पततां पक्षिणां मयूखैः तपनः सूर्य्यस्तित्करपैस्तपनकिरणैः सङ्गमैरिति भावः । आत्मा स्वरूपं दृश्यतेऽत्र इत्यात्मदर्शोदर्पणइव सुतरां दुरोक्ष्यबिम्बः अभवत् । अतएव दुर्द्दर्शदाप्तोमतिदुर्द्दर्शी ।

पततामपरितः परिस्फुरद्भिः
परिपिञ्जीकृतदिङ्मुखैर्मयूखैः ।
सुतरामभवद्दुरीक्ष्यबिम्ब
स्तपनस्तत्किरणैरिवात्मदर्शः ॥ ५५ ॥

दधुरम्बुधिमन्थनाद्रिमन्थ
भ्रमणायस्तफणीन्द्रपित्तजानाम् ।
रुचमुक्षसमानवैनतेय
द्युतिभिन्नाः फणभारिणो मणीनाम् ॥ ५६ ॥

ऽभूदित्यर्थः । अत्र तपनस्य दुरीक्ष्यत्वासम्बन्धेऽपि सम्बन्धोक्तेरति शयोक्तिः ॥ ५५ ॥

दधुरिति । उक्षसमानाभिर्दीप्यमानाभिर्वैनतेयानां द्युतिभि र्भिन्नाः संवलिताः फणभारिणः फणाभृतः अम्बुधिमन्थने समुद्र मन्थने अद्रेर्मन्दराद्रेरेव मन्थस्य मन्थनदण्डस्य भ्रमणेनायस्तस्य निष्पीडितस्य फणीन्द्रस्य वासुकेः पित्तात् पित्तधातोर्जातास्तज्जास्ते षां । वैशाखमन्थमन्थानमन्थानोमन्थदण्डके इत्यमरः । मणेर्भावा दिकस्येदित्यात्तस्य च नुमागमः । तेषां मणीनां मरकतानां रुचं दधः वैनतेयपीतिमसम्भेदात् कृष्णोरगामरकतच्छायामापु रित्यर्थः । अत्रान्यस्यान्यधर्म्मायोगेन रुचमिवेति सादृश्याक्षेपाद सम्भवद्वस्तुसम्बन्धा निदर्शनालङ्कारः ॥ ५६ ॥

अभीति । अभितः उभयतः क्षुभितायोऽम्बुराशिः क्षुभिताम्बु राशिस्तद्वद्गुरुर्ध्वनिर्गभीरध्वनिरित्युपमा । आक्षिप्ताः पातिताः समूलाः पादपोः सावरणमूलावेन वः। अत्र पादपोन्मूलनासम्बन्धेऽपि

अभितः क्षुभिताम्बुराशिभीर
ध्वनिराश्लिष्टसमूलपादपौघः ।
जनयन्नभवद्युगान्तशङ्का
मनिलो नागविपक्षपक्षजन्मा ॥ ५७ ॥

प्रचलत्पतगेन्द्रपत्रवात
प्रसभोन्मूलितशैलदत्तमार्गैः ।
भयविक्लवमाशु दन्दशूकै
र्विवशैराविविशे स्वमेव धाम ॥ ५८ ॥

सम्बन्धोक्तेरतिशयोक्तिः । युगान्तशङ्कां जनयन् कल्पक्षयोत्प्रेक्षां जनयन्नित्यपि सैवातिशयोक्तिः । नागविपक्षपक्षजन्मा गरुडपक्षोद्भवोऽनिलोऽभवदुदभवदित्यर्थः ॥ ५७ ॥

प्रचलदिति । प्रचलतां पतगेन्द्राणां ये पत्रवातास्तैः प्रसभं उन्मूलितैराकृष्टैरुत्पाटितैः शैलैर्दत्तो मार्गो रन्ध्रं येभ्यस्तैः विवशैः परवशैर्निश्चेष्टैरित्यर्थः । गर्हितं दशन्ति भृशमिति दन्दशूकैः सर्पैः । दन्दशूको बिलेशय इत्यमरः । लुपसदचरेत्यादिना दंशे र्भावगर्हायां यङ् । जपजभदहदशभञ्जपशाञ्चेति अभ्यासस्य नुमागमः यजजपदशां यङ इति दंशेर्यङन्तादूकञ् प्रत्ययः । भयेन विक्लवं विह्वलं विचित्रं यथा तथा आशु स्वमेव धाम पातालमेव विवेश । तार्क्ष्यपत्रपवनोन्मूलितशैलरन्ध्रवर्त्मभिः पातालं प्रविष्टमित्यर्थः । विशेः कर्मणि लिट् । दन्दशूकानां रन्ध्रप्रवेशासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ५८ ॥

खचरैः क्षयमक्षयेऽहिसैन्ये
सुकृतैर्दुष्कृतवत्तदोपनीते ।
अयुगार्चिरिव ज्वलन्रुषाथो
रिपुरौदर्चिषमाजुहाव मन्त्रम् ॥ ५९ ॥
सहसा दधदुद्धताट्टहास
श्रियमुल्लासितजन्मना स्वनेन ।
विततायतहेतिबाहुरुच्चै
रथ वेतालवदुत्पपात वह्निः ॥ ६० ॥

खचरैरिति। खे चरन्तीति खचरैर्वैनतेयैः। चरेष्टः तत्पुरुषे कृति बहुलमिति लुग्विकल्पः। अक्षये अनन्ते अहिसैन्ये सर्पसङ्घे सुकृतैः हरिस्मरणादिपुण्यैर्दुष्कृतवद्ब्रह्महत्याद्येनोवत । तत्र तस्येवेति तवार्थे वतिप्रत्ययः। क्षयमुपनीते नाशङ्गमिते सति तदा तत्काले रुषा पौरुषवैफल्यरोषेण अयुगार्चिः सप्तार्चिरिव ज्वलन् दीप्यमानः असौ रिपुश्चैद्यः। उदर्चिषदृशमौदर्चिषमाग्नेयं मन्त्रं आजुहाव आहूतवान् जजापेत्यर्थः। ह्वयतेर्लिटि अभ्यस्तस्य चेति द्विर्वचनात्प्रागेव सम्प्रसारणम्। दुष्कृतवदिति तद्धितगता श्रौती पूर्णोपमा ॥ ५९ ॥

सहसेति। अथाग्नेयास्त्राह्वानानन्तरं उल्लासितजन्मना भीषितप्राणिकेन स्वनेन ध्वनिना उद्धताट्टहासश्रियं महाट्टहाससम्पदं दधत् तेनैवाट्टहासवान् सञ्जातनादवानित्यर्थः। वितताः प्रसारिताः आयता दीर्घाः हेतयो ज्वाला बाहव इव हेतिबाहवो

ज्वलितोद्धतधूमकेतनोऽसौ
रभसादम्बररोहिरोहिताश्वः।
द्रुतमारुतसारथिः शिखावान्
कनकस्यन्दनसुन्दरश्चचाल ॥ ६१ ॥

ज्वलदम्बरकोटरान्तरालं
बहुलार्द्राम्बुदपत्रबद्धधूमम्।
परिदीपितदीर्घकाष्ठमुच्चै
स्तरुवद्विश्वमुवोष जातवेदाः ॥ ६२ ॥

यस्य स वह्निर्वैतालीभूतविशेषः सइव सहसा झटिति उर्वेरूर्द्ध मुत्पपात उत्तस्थौ। उपमा ॥ ६० ॥

ज्वलितेति। ज्वलितश्चासौ उद्धतश्चोन्नतश्च धूमएव केतनं केतुर्यस्य सः रभसाद्वेगादम्बररोहिणोरोहिताश्वाहनस्थगा अश्वाइव यस्य सः द्रुतमारुताः शीघ्रवाताएव सारथिर्यस्य सः कनकस्यन्दनसुन्दरः कनकरथवद्रम्यइत्युपमा। असौ शिखाज्वाला अस्य सन्तीति शिखावान् आशुशुक्षणिश्चचाल ॥ ६१ ॥

ज्वलदिति। जातं वेदोधनं यस्माज्जातवेदास्तनूनपात्। अम्बरं कोटरमिव तस्यान्तरालमभ्यन्तरं ज्वलद्यस्य तत्। बहुलाः सान्द्राः आर्द्राम्बुदाः पत्राणीव तेषु बद्धधूमं। परिदीपिताः प्रज्वलिताः काष्ठादिशः काष्ठानीव यस्य। तदुच्चैरुन्नतं विश्वं जगत्। तरुणा तुल्यं तरुवत् तरुमिवेत्यर्थः। तुल्यार्थे वति प्रत्ययः। उवोष ददाह। उष दाहे लिट् लघूपधगुणे पश्चात् द्विर्भावः अभ्यासस्य

गुरुतापविशुष्यदम्बुशुभ्राः
क्षणमालग्नकृशानुताम्रभासः ।
क्रमसारतया मसीभवन्तः
पुनराकारमवापुरम्बुवाहाः ॥ ६३ ॥
ज्वलितानललोलपल्लवान्ताः
स्फुरदष्टापदपत्रपीतभासः ।
क्षणमात्रभवामभावकाले
सुतरामापुरिवायतिम्पताकाः ॥ ६४ ॥

सन्धौ इत्युवङादेशः अनादिष्टादचइति गुणस्य स्थानिवत्त्वाभावात् । स्पष्टोपमालिङ्गात् सर्व्वत्रोपमितसमासः ॥ ६२ ॥

गुर्व्विति । गुरुतापेनातिदाहेन विशुष्यदम्बवः शोष्यमाणोदकाः अतएव शुभ्राश्चेति विशेषणसमासः । ततः क्षणमालग्नेन कृशानुना ताम्रभासो रोहितवर्णाः अथाशारतया जलशोषान्निःसारतया मसीभवन्तः अम्बुवाहाः पुनः स्वमाकारं नीलरूपमवापुः । अत्र मेघानां मसीभावासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः ॥ ६३ ॥

ज्वलितेति । ज्वलितेन प्रज्वलता अनलेन अनलपातेन लोलाः पल्लवान्ताः अञ्चलाग्राणि यासां ताः स्फुरद्भिर्दीप्यमानैरष्टापदपत्रैः कनकरचनाभिः पीतभासः पिङ्गलवर्णाः पताका वैजयन्त्यः अभावकाले विनाशकाले क्षणमात्रभवां क्षणमात्रभाविनीं क्षणमात्रस्थायिनीमित्यर्थः आयतिं दैर्घ्यं सुतरामापुरित्यर्थः प्रदीपवदिति भावः अष्टसु लोहेषु पदं प्रतिष्ठा यस्य तदष्टापदम् । अष्टनः संज्ञायामिति

निखिलामिति कुर्व्वतश्चिराय
द्रुतचामीकरचारुतामिव द्याम् ।
प्रतिघातसमर्थमस्त्रमग्ने
रथ मेघङ्करमस्मरन्मुरारिः ॥ ६५ ॥
चतुरम्बुधिगर्भधीरकुक्षे
र्वपुषः सन्धिषु लीनसर्व्वसिन्धोः ।
उदगुः सलिलात्मनस्त्रिधाम्नो
जलवाहावलयः शिरोरुहेभ्यः ॥ ६६ ॥

दीर्घः । रुक्मं कार्त्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियामित्यमरः ॥ ६४ ॥

निखिलामिति । अथानन्तरं मुरारिः इतीत्थं निखिलां द्यामाकाशं द्रुतचामीकरचारुतां प्रतप्तहेमकर्बुरामिवेत्युत्प्रेक्षा । चारुतामित्यत्र । चिराय कुर्व्वतोऽग्नेः प्रतिघातसमर्थं प्रशमनक्षमं मेघान् करोतीति मेघङ्करं मेघजननम् । मेघर्त्तिभयेषु कृञः खच्प्रत्ययः अरुर्द्विषदजन्तस्य मुमिति मुमागमः । अस्त्रं वारुणास्त्रं अस्मरत् अध्याहरत् ॥ ६५ ॥

चतुरिति । चत्वारोऽम्बुधय एव गर्भास्तेन धीरो गम्भीरः कुक्षिर्यस्य तस्य वपुषः सन्धिषु लीनाः सर्व्वाः सिन्धवो नद्यो यस्य तस्य सलिलात्मनस्तोयात्मकस्य । त्रीणि धामानि स्थानानि भूरादीनि वमादीनि वा यस्य तस्य त्रिधाम्नो हरेः शिरोरुहेभ्यो जलवाहावलयः मेघपरम्परा उदगुः उद्बभूवुः । इणो गा लुङीति गादेशे गातिस्थेत्यादिना सिचो लुक् । अत्र केशेषु जीमूतानां सर्व्वासु

ककुभः क्षतनादमास्तृणन्त-
स्तिरयन्तः पटलानि भानुभासाम् ।
उदनंसिषुरभ्रमभ्रसङ्घाः
सपदि श्यामलिमानमानयन्तः ॥ ६७ ॥
तपनीयनिकर्षराजिगौर-
स्फुरदुत्तालतडिच्छटाट्टहासम् ।
अनुबद्धसमुद्धताम्बुवाह-
ध्वनिताडम्बरमम्बरम्बभूव ॥ ६८ ॥

सन्धिषु । कुक्षौ समुद्रास्तस्मै तोयात्मने नमः इत्यागमोक्तं प्रमाणमिति भावः ॥ ६६ ॥

ककुभ इति । क्षतनादं क्षतगम्भीरारावं यथा तथा ककुभः आस्तृणन्तः आच्छादयन्तः । स्तृणातेर्लटः शत्रादेशः आभ्यस्तयोरित्याकारलोपः । भानुभासामर्कांशूनां पटलानि तिरयन्तस्तिरस्कुर्वन्तः । तिरःशब्दात्तत्करोतीति ण्यन्ताल्लटः शत्रादेशः णाविष्ठवद्भावाद्टिलोपः । अभ्रमाकाशं श्यामलिमानमानयन्तः श्यामलत्वं प्रापयन्तः । अभ्रसङ्घाः मेघौघाः सपदि सद्य उदनंसिषुरुत्पेतुः । उत्पूर्वान्नमतेर्लुङि यमरमनमातां सक्चेति सगिडागमौ नेटीति वृद्धिप्रतिषेधः । स्वभावोक्तिः ॥ ६७ ॥

तपनीयेति । तपनीयस्य हेम्नो निकर्षराजयः कषणरेखा इव गौर्यः पीताः । गौरोऽरुणे सिते पीते इत्यमरः । स्फुरन्त्य उत्ताला उद्भूतास्तडिच्छटा विद्युल्लता एवाट्टहासो यस्य तत्तथोक्तं अनुबद्धोऽनुसृतस्समुद्धतस्तारोऽम्बुवाहानां ध्वनिताडम्बरो गर्जिताडम्बरो यस्य

सवितुः परिभावुकैर्मरीची
नचिराभ्युद्गमतङ्गजाङ्गभाभिः ।
जलदैरभितः स्फुरद्भिरुच्चै
र्विदधे केतनतेव धूमकेतोः ॥ ६९ ॥

ज्वलतः शमनाय चित्रभानोः
प्रलयाप्लावमिवाभिदर्शयन्तः ।
ववृषुर्वृषनादिनो नदीना
मतटारोपितवारि वारिवाहाः ॥ ७० ॥

तदम्बरं बभूव तदाम्बुवाहैर्विद्युत्प्रभाभिर्गर्जिताडम्बरैश्चाद्भुतार्थं कुर्वद्भिरिन्द्राम्बरमभादित्यर्थः । यथाक्रमयोगाद्गम्योत्प्रेक्षा ॥ ६८ ॥

सवितुरिति । सवितुर्मरीचीन् मयूखान् परिभावुकैस्तिरस्कुर्वद्भिः । लषपतेत्यादिना उकञ्प्रत्यये न लोकेत्यादिना षष्ठीप्रतिषेधः । अचिराभ्युद्गमस्य सद्यःकृताभ्युद्गमस्य मतङ्गजाङ्गस्य नागदेहस्येव भा येषां तैस्तथोक्तैः । भोभगो इत्यादिना रोर्यकारस्य हलि सर्वेषामिति लोपः । अभितः स्फुरद्भिर्भ्रममाणैरुच्चैरुन्नतैर्जलदैर्धूमकेतोरग्नेः केतनता केतुत्वं विदधदिव विहितेव धूमकेतोः केतुत्वं प्राप्तमित्यर्थः । उत्प्रेक्षालङ्कारः ॥ ६९ ॥

ज्वलत इति । ज्वलतश्चित्रभानोरग्नेः प्रशमनाय प्रलये कल्पान्ते य आप्लावो महापूरः तमभिदर्शयन्त इवेत्युत्प्रेक्षा । वृषवद्वृषभवत् नदन्ति गर्जन्तीति वृषनादिनः । कर्त्तर्युपमाने इति णिनिः । अत एवापमा । वारि वहन्तीति वारिवाहा मेघाः । कर्मण्यण् । नदीनां

मधुरैरपि भूयसा स मेघैः
प्रशमम्प्रत्युत वारिभिर्दिदीपे ।
पवमानसखस्ततः क्रमेण
प्रणयक्रोध इवाशमद्विवादैः ॥ ७१ ॥

प्रतटेषु प्रतीरेषु आरोपितानि भावितानि वारीणि यस्मिन् कर्मणि तद्यथातथा ववृषुः प्रलयकालमेघवद्वर्षन्नित्यर्थः ॥ ७० ॥

मधुरैरिति । इतीत्थं पवत इति पवमानो वायुः । पूङ्यजोः शानच् । तस्य सखा पवमानसखः अग्निः । राजाहःसखिभ्यष्टच् । मैत्री भावविवक्षायामयन्निर्देशः स्वसहकारिणो मैत्रीति नियमात् सहकारित्वाविवक्षायां वैपरीत्यात् वज्रमोधै तु न समासान्तः । स्वामी तु रोहिताश्वो वायुसखेति पवमानसखपाठेन वज्राग्निमाह । तथापि तथा पाठे न कश्चिदुपद्रवः । सोऽग्निः मधुरैः प्रियैरपि विवादैर्विविधवाक्यैः प्रणयक्रोधः प्रणयप्रयुक्तकोप इव मधुरैः स्वादुभिः अनुद्दीपकैरित्यर्थः मेघैर्मेघभवैः । दिगादिभ्यो यत् । वारिभिः प्रशमं प्रत्युत वैपरीत्येनापि प्रत्युतेति वैपरीत्य इति गण व्याख्याने भूयसात्यन्तं भृशमित्यर्थः दिदीपे प्रजज्वाल ततः क्रमेण अशमत् शान्तोऽभूत् । शाम्यतेर्लुङि पुषादित्वात् च्लेरङादेशः । यथा इतोऽग्निर्ज्वलितो नश्यति प्रणयकोपोऽपि प्रियैः भृशायितो शाम्यतीति प्रसिद्धम् । उपमा ॥ ७१ ॥

परितइति । परितः प्रसभेन बलात्कारेण शरवर्षैर्नीरन्ध्रैः । शर नीरे शरो बाण इति विश्वः । अवपातमववर्दं नीयमानः । शनी कुम्भकः आपन्न आसीदिति भावाद्योऽग्निः । कर्मधारय् । प्रसमेषु

परितः प्रसभेन नीयमानः
शरवर्षैरवसायमाश्रयाशः ।
अबलेषु बली चकार विद्यु-
द्व्यपदेशेन घनेष्वनुप्रवेशम् ॥ ७२ ॥

प्रयतः प्रथमं हुताशनस्य
क्वचिदालक्ष्यत मुक्तमूलमर्चिः ।
बलभित्प्रहितायुधाभिघात-
त्रुटितस्यापि पतत्त्रिपतेरिवैकपक्षम् ॥ ७३ ॥

घनेषु मेघेषु विद्युद्व्यपदेशेन तडिच्छलेन अनुप्रवेशं चकार । अस्त्राग्निर्विद्युद्रूपेण मेघेष्विव प्रविष्टः । बलवताभिभूतस्य विदेशगमनं तदनुप्रवेशो वेति नीतेरिति भावः । अत्र विशेषणसाम्यादप्रकृतदुर्बलत्वप्रतीतेः समासोक्तिः ॥ ७२ ॥

प्रयत इति । प्रथमं आद्यं प्रयतः गच्छतः । प्रैतीति प्रयन् तस्य प्रयतः । इणः शतरि यणादेशः । हुताशनस्याग्नेः वर्त्मनि मुक्तमूलं त्यक्तमूलं त्यक्ताश्रयमर्चिर्ज्वाला । ज्वालाभासोर्नपुंस्यर्चिरित्यमरः । बलभिदा शक्रेण प्रहितस्य प्रयुक्तस्यायुधस्य वज्रस्याभिघातात् प्रहारात् त्रुटितं छिन्नं पक्षिपतेः पक्षिराजस्य गरुत्मत एकं पक्षं पक्षमिव क्वचिदालक्ष्यत अदृश्यत इत्युपमा । पुरा मातुर्दास्यविमोक्षायामृतमाहरता गरुत्मतेन्द्रप्रयुक्तवज्रगौरवादेकं पत्रं त्यक्तमित्यागमः ॥ ७३ ॥

व्यगमदिति । घनाघनौघाः वर्षुकाब्दसमूहाः । [illegible] वर्षुकाब्दे घनाघना इत्यमरः । शिखिनमग्निं शमयितुं [illegible]

व्यगमन् सपदि दिशां मुखेभ्यः
शमयित्वा शिखिनः कृतानां घनौघाः।
उपकृत्य निसर्गतः परेषा-
मुपरोधन्न हि कुर्वते महान्तः॥ ७४॥
कृतदाहमुदर्चिषः शिखाभिः
परिषिक्तम्मुहुरम्भसा नवेन।
विगताम्बुधरव्रणमापेदे
गगनन्तापितपायितासिलक्ष्मीम्॥ ७५॥

दिशां मुखेभ्यो व्यगमन्नपयन्तु:। गमेर्लुङि पुषादित्वात् च्लेरङादेशः। तथा हि महान्तो निसर्गतः स्वभावादेव परेषां उपकृत्य उपकारं कृत्वा उपरोधं न हि कुर्वते। महतां निष्फलावस्थानं परोपरोधायेति भावः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥ ७४॥

कृतेति। उदर्चिषोऽग्नेः शिखाभिः ज्वालाभिः कृतदाहं विहिततपनं ततो नवेनाम्भसा मुहुः परिषिक्तं विगताम्बुधरा एव व्रणा दोषा यस्य तद्गगनं पूर्वन्तापितस्तापं प्रापितः स चासौ पायितः पानं कारितः। पिबतेर्ण्यन्तात्कर्मणि क्तः। शाच्छासाह्वाव्यावेपां युगिति युगागमः। तथा तापितपायितस्य तप्तसिक्तस्यासेः खड्गस्य लक्ष्मीं प्रपेदे प्राप। इति निदर्शनालङ्कारः अम्बुधरव्रणेति रूपकसङ्करोऽयं॥ ७५॥

हृतीति। हृतीत्यं क्षिप्रं करोतीति क्षिप्रकारी शीघ्रप्रयोक्ता अन्यत्र विकारकारी नरपतिश्चैद्यः प्रकुपितः प्रक्षुभितः सन् यद्

इति नरपतिरस्त्रं यद्यदाविश्चकार
प्रकुपित इव रोगः क्षिप्रकारी विकारम्।
भिषगिव गुरुदोषच्छेदिनोपक्रमेण
क्रमविदथ मुरारिः प्रत्यहंस्तत्तदाशु ॥७६॥

शुद्धिङ्गतैरपि परामृजुभिर्विदित्वा
बाणैरजय्यमविघट्टितमर्म्मभिस्तम्।
मर्म्मातिगैरनृजुभिर्नितरामशुद्धै-
र्वाक्सायकैरथ तुतोद तदा विपक्षः ॥ ७७॥

यदस्त्रं आविश्चकार रोगो विकारमिव अथ क्रमवित्परिपाटीवेदी मुरारिर्भिषग्वैद्य इव गुरुदोषच्छेदिना गुरुदोषप्रतिघातकेन दोषनिवर्त्तकेन चोपक्रमेणोपायेन प्रत्यस्त्रप्रयोगेणेत्यर्थः अन्यत्र महौषधप्रयोगेण तत्तदस्त्रं आशु शीघ्रं तद्विकारमिवेति भावः प्रत्यहन् प्रतिजघान । हन्तेर्लङ् अदादित्वाच्छपो लुक् हन्त्या वितितिलोपे । उपमा ॥ ७६ ॥

शुद्धिमिति । तदा तस्मिन् समये विपक्षोऽरिश्चैद्यः परामुत्कृष्टां शुद्धिं शोधशुद्धिं गतैर्ऋजुभिरप्यविघट्टितमर्म्मभिरस्पृष्टमर्म्मस्थानैः तं हरिमजय्यं जेतुमशक्यं । क्षय्यजय्यौ शक्यार्थे निपातः । विदित्वाथास्मिन्नवसरे मर्म्माणि अतिगच्छन्तीति मर्म्मातिगैर्मर्म्मभेदिभिरनृजुभिर्वक्रैः नितरामशुद्धैरपवित्रैः वाच एव सायकास्तैः वाक्सायकैरिति रूपकं तुतोद व्यथयामास । वक्रप्रयोगस्याय मुपोद्घात इति भावः । अत्र वाक्सायकानां प्रसिद्धसायकव्यतिरेकोक्तेर्व्यतिरेकरूपकयोः सङ्करः । वसन्ततिलका वृत्तम् ॥ ७७ ॥

राजस्त्रीस्तनयोरकारि सहसा येनाश्रयालिङ्गन
व्यापारैकविनोददुर्ल्ललितयोः कार्कश्यवन्ध्यीर्थ्यया।
तेनाक्रोशत एव तस्य मुरजित्तत्कालखोलानल
ज्वालापल्लवितेन मूर्द्धविकलं चक्रेण चक्रे वपुः॥७८॥
श्रिया जुष्टन्दिव्यैः सपटहरवैरन्वितमथुव्यवर्षै
र्वपुश्चैद्यस्य क्षणमृषिगणैस्तूयमानन्निरीय।
प्रकाशेनाकाशे दिनकरकरान्विक्षिपद्विस्मिताक्षै
र्नरेन्द्रैरौपेन्द्रं वपुरथ विशद्धाम वीक्षाम्बभूवे॥७९॥

॥ अथ कविवंशवर्णनम् ॥

सर्व्वाधिकारी सुकृताधिकारः
श्रीधर्म्मनाभस्य बभूव राज्ञः।
आसक्तदृष्टिर्विरजाः सदैव
देवोऽपरः सुप्रभदेवनामा॥८०॥

काले मितं वाक्यमुदर्कपथ्यन्तथागतस्येव जनः सुचेताः।
विनानुरोधात्स्वहितेच्छयैव महीपतिर्यस्य वचश्चकार
॥८१॥

तस्याभवद्दत्तकइत्युदात्तः क्षमी मृदुर्धर्म्मपरस्तनूजः।
यं वीक्ष्य वैयासमजातशत्रोर्वचोगुणग्राहि जनैः प्रतीये
॥८२॥

सर्व्वेण सर्व्वाश्रयइत्यनन्दमानन्दभाजा जनितञ्जनेन।
यश्च द्वितीयं स्वयमद्वितीयोमुख्यः सताङ्गौणमवाप नाम
॥८३॥

श्रीशब्दरम्यकृतसर्गसमाप्तिलक्ष्म
लक्ष्मीपतेश्चरितकीर्त्तनचारु माघः।
तस्यात्मजः सुकविकीर्त्तिदुराशयादः
काव्यं व्यधत्त शिशुपालवधाभिधानम्।

इति श्रीशिशुपालवधे महाकाव्ये
श्रीदत्तकसूनुकविश्रीमाघविरचिते
शिशुपालवधोनाम विंशतितमः सर्गः समाप्तः ॥२०॥

॥ समाप्तमिदमुत्तरार्द्धम् ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ
काव्यव्याख्याने सर्वङ्कषाख्ये विंशतितमः सर्गः समाप्तः ॥ २० ॥

॥ अथ टीकायां पाणिनीयव्याकरणानुयायिन्यां प्रमापकाः ॥

| | | |
|---|---|---|
| श्रुतिः | सज्जनः | मार्त्तण्डकोषः |
| स्मृतिः | भट्टोत्पलः | मेदिनीकोषः |
| पुराणम् | वल्लभः | त्रिकाण्डशेषकोषः |
| वाल्मीकिः | जैमिनिः | रत्नावलीकोषः |
| महाभरतम् | हरिकारिका | अभिधानचिन्तामणिः |
| पाणिनिः | वाङ्कुः | काव्यप्रकाशः |
| वार्त्तिकम् | अमरकोषः | अलङ्कारसर्व्वस्वम् |
| भाष्यकारः | हेमचन्द्रकोषः | दण्डी |
| कैयटः | विश्वप्रकाशकोषः | वृत्तरत्नाकरः |
| माधवः | हलायुधकोषः | वृत्तरत्नाकरटीका |
| शाकटायनः | शाश्वतकोषः | नीतिवाक्यामृतम् |
| न्यासोद्योतः | वैजयन्तीकोषः | कामन्दकः |
| काशिका | शब्दार्णवकोषः | वसन्तराजीयम् |
| वामनः | यादवकोषः | हयलीलावती |
| क्षीरस्वामी | केशवकोषः | दशरूपकम् |

॥ इति टीकाप्रमापकाः ॥